न्यायविशारद न्यायाचार्य श्रीमद्यशोविजयोपाध्यायविरचित

# ज्ञानसार

## पं० श्रीगंभीरविजयजीगणिकृतटीकायुक्त.

श्रीगोघाबंदर निवासी श्राविका रामबा आणंदजीनी आर्थिकसहायथी छपावी प्रकट करनार

**श्री जैनधर्मप्रसारक सभा—भावनगर.**

वीर संवत २४३९ विक्रम संवत १९६९ शाके. १८३४

मुंबई—गुजराती प्रीन्टिंग प्रेस.

## खास सूचना.

आ ग्रंथ संस्कृतना अभ्यासी उत्तम साधु साध्वीओने तेमज श्राविकाओने
खास भेट आपवानो छे. तेमज लखी पुस्तकोना भंडार खाते
भेट आपवानो छे. मुनिवर्गे पत्र लखी मंगाववो अने
भंडाराधिपतिओए पोस्टेज मोकली
मंगाववानी कृपा करवी.

आ ग्रंथ भावनगरनी श्री जैनधर्मप्रसारक सभानी वती शा. कुंवरजी आणंदजीए छपावेल छे.

आ पुस्तक इच्छाराम सूर्यराम देसाईने " गुजराती प्रिंटिंग प्रेसमां छापिने
प्रसिद्ध कर्युं ". कोट सर्कल सासुन बिल्डिंग–मुंबई.

# प्रस्तावना.

प्रसिद्धमिदं शास्त्रविशारदानां यत्किल गतिचतुष्टयरूपभवभ्रमणतथाविधसामग्रीवशतो लब्धमानुषभवत्वक्षस्य पुरुषार्थचतुष्टयमेव फलं। तत्र सद्धर्माचरणस्यार्थकामसिद्धिरानुषंगिकी क्षेत्र इव तृणनिष्पत्तिर्मोक्षस्तु धान्यवन्मुख्यं फलं। तत्संपादनैकान्तकारणं ज्ञानदर्शनादिरत्नत्रयमेव। तच्चोत्तेजितुं प्रदर्शितानि पूर्वसूरिभिर्भव्यसार्थोपकाराय शास्त्रसूक्तानि। सत्स्वप्यनेकेष्वध्यात्मविषयग्रन्थेषु विहाय मुक्तिसौधसोपानपंक्तिसमद्वात्रिंशद्विषयाष्टकात्मकममुमष्टकापरपर्यायज्ञानसारनामानमन्वर्थं ग्रन्थमन्यः कोऽपि नैव वरिवर्ति स्वपरदर्शनेषु सरसर्जुताल्पप्रयासं स्वानुभवकारकः। प्रत्यष्टकं चास्य संक्षिप्तमप्यल्पमतीनामपि सौकर्येण स्फुटतरविषयं दरीदृश्यते। अध्यात्मज्ञानदानदीक्षितोऽयं संपूर्णोपकारकस्तत्त्वान्वेषिसन्मार्गग्राहकमाध्यस्थ्यवृत्तिमुमुक्षुभिक्षूणामिति निःसंदेहमवगन्तव्यं पुद्गलादिपरभावत्यागपूर्वकस्वभावाविर्भावरूपमोक्षसाधनाग्रगण्यत्वादस्य।

जगद्विख्याताश्चैतद्ग्रन्थप्रणेतारः काशीनामकविद्याक्षेत्रोपार्जितसकलदर्शनसद्विद्यास्तद्विद्वत्समाजाधिगतन्यायविशारदबिरुदा उपाध्यायपदालंकृताः श्रीमद्यशोविजयाह्वया जैनागमतत्त्वज्ञानज्ञातारोऽनेकग्रन्थग्रन्थकलब्धप्रतिष्ठात्वप्रमाणीभूतवचनाः कदा समजायन्त काँस्काँश्च ग्रन्थान्निर्मितवन्त इत्याद्यस्मन्मुद्रापितयशोविजयजीकृतग्रन्थमालास्थप्रस्तावनातोऽवगन्तव्यं तज्जिज्ञासुभिः। अयं च ग्रन्थः

पूज्यैर्निष्पादितो दीपोत्सवीसमये सिद्धपुरस्थितैरिति स्पष्टं चरमाष्टके, परं न सम्यग्ज्ञायते तत्संवत्सरस्तथापि श्रीमद्विनयविजयकृतश्रीपालरासनाम्नि ग्रन्थे सर्वसमृद्ध्यष्टकनामदर्शनादनुमीयते प्रागष्टात्रिंशदधिकसप्तदशशताद्रचित इति, श्रीपालरासस्य तदा पूर्णत्वदर्शनात् । अमीषामष्टकानां मध्ये माध्यस्थ्यनामकमष्टकं सोसूच्यतेऽद्भुतां माध्यस्थ्यवृत्तिं माध्यस्थाग्रगण्यानां ग्रन्थकर्तॄणाम् । चरमे चाष्टकेऽध्यात्मलीनचित्तानां परमानन्दरसास्वादाभिज्ञानां योगिनां समवृत्तिरेव संसारमोक्षविषयेति स्वानुभवपूर्वकमिवालेखि पूज्यैः । तथाहि—

निर्विकारं निराबाधं ज्ञानसारमुपेयुषाम् । विनिवृत्तपराशानां मोक्षोऽत्रैव महात्मनाम् ॥ ५ ॥

(सर्वनयाश्रयाष्टकम्)

ईदृग्विधानां महात्मनां मोक्षाभिलाषोऽपि न भवतीति स्पष्टं ज्ञायतेऽनेन सूक्तेन स्वानुभवप्रख्यापकेन ।

ग्रन्थस्यास्यालेखि टबार्थः पूज्यपादैरेव कस्यचिच्छ्राद्धस्याग्रहेण तदुपकृत्यै । ततश्च संवत १७९६ वर्षे मुनिवरैर्देवचन्द्राह्वयैरकार्यस्योपरि ज्ञानमञ्जरी नाम सविस्तरा टीका संस्कृतगद्येन । किं च तट्टीकापद्धतिर्नयनिक्षेपपरत्वाद्बालजीवानां नातीवोपयुक्तेत्यल्पप्रचारास्ते । ततश्च संवत १९५४ वर्षेऽस्यैव माहात्म्यवतो ग्रन्थस्योपरि व्यरचि विवरणं संस्कृतभाषयैव श्रीमद्वृद्धिविजयमुनिचन्द्राणां पत्कजचञ्चरीकैर्मुख्यान्तेवासिभिः प्रज्ञांश ( पंन्यास ) पदालंकृतैर्गम्भीरविजयगणिभिर्दृष्टपूर्वोक्तटबार्थटीकैः । पूज्यपादाश्चेमे जैनागमरहस्यकोविदा बहुश्रुतगणाग्रगण्या वृद्धपरंपराज्ञातारश्चेत्येतट्टीकाविलोकनेन पुस्फुट्यते सहृदयानां हृदयादर्शेषु । पूज्यैश्चै-

भिनेयकर्णिकोपरि संवत १९४१ वर्षे संस्कृतटीका रचितास्ति, सा च मुद्रापिता प्रसिद्धैव । तथोपाध्यायश्रीयशोविजयविरचिताध्यात्मसारनामग्रन्थोपरि संवत १९५२ वर्षे श्लोकसप्तसहस्रप्रमाणा विनयविजयकृतशान्तसुधारसग्रन्थोपरि चास्मिन्नेव संवत्सरे श्लोकसहस्रत्रयपरिमिता संस्कृतटीका गद्यमयी विरचिताऽस्ति । सामान्यगीर्वाणभाषाज्ञातारोऽपि मूलग्रन्थरहस्यं सौकर्येण प्राप्नुयुरित्यनुग्रहपरैरेवामीभिः पूज्यैः सरला भाषाङ्गीकृता । इदानींतनानां व्यावहारिकाध्ययनरतानां गृहिणां प्राथमिकाध्ययनपराणां संयमिनां चेदृश्यष्टीका अतीवोपकारकारिण्य इति ज्ञात्वेयं मुद्रापिता । किं चात एवापरं टीकाद्वयमपि अध्यात्मसारशान्तसुधारसस्य मुमुद्रापयिषवो वयमिति ॥

द्वात्रिंशदष्टकरत्नानि चेमानि ज्ञानसूत्रग्रथितानि कृत्वा कंठेन हृदये धारितानि चेन्मुक्तिपुरीपाथेयान्यज्ञानद्रव्यचिचीषा नावशिष्यत इति पाठकाधिकारिवर्गः स्वयमेव ज्ञास्यतीत्युनुपमं वस्त्विदं कल्पितोपमया हीनमाहात्म्यीकर्तुं नेच्छाम इति शम् ॥

प्रकाशयित्री.

**श्री जैनधर्मप्रसारक सभा.**

भावपुर.

# अष्टकविषयानुक्रमः


| | पत्राङ्क. |
|---|---|
| १ पूर्णाष्टकं | १ |
| २ मग्नाष्टकं | ४ |
| ३ स्थिराष्टकं | ६ |
| ४ मोहाष्टकं | ८ |
| ५ ज्ञानाष्टकं | १० |
| ६ शमाष्टकं | १२ |
| ७ इन्द्रियजयाष्टकं | १४ |
| ८ त्यागाष्टकं | १७ |
| ९ क्रियाष्टकं | २१ |
| १० तृप्त्यष्टकं | २३ |
| ११ निर्लेपाष्टकं | २५ |
| १२ निःस्पृहाष्टकं | २७ |
| १३ मौनाष्टकं | २९ |
| १४ विद्याष्टकं | ३२ |
| १५ विवेकाष्टकं | ३४ |
| १६ माध्यस्थ्याष्टकं | ३७ |
| १७ निर्भयाष्टकं | ३९ |
| १८ अनात्मशंसाष्टकं | ४१ |
| १९ तत्त्वदृष्ट्यष्टकं | ४४ |
| २० सर्वसमृद्ध्यष्टकं | ४६ |
| २१ कर्मविपाकाष्टकं | ४८ |
| २२ भवोद्वेगाष्टकं | ५० |
| २३ लोकसंज्ञात्यागाष्टकं | ५३ |
| २४ शास्त्राष्टकं | ५५ |
| २५ परिग्रहाष्टकं | ५७ |
| २६ अनुभवाष्टकं | ६० |
| २७ योगाष्टकं | ६२ |
| २८ नियागाष्टकं | ६५ |
| २९ पूजाष्टकं | ६७ |
| ३० ध्यानाष्टकं | ६९ |
| ३१ तपोऽष्टकं | ७१ |
| ३२ सर्वनयाश्रयाष्टकं | ७४ |

# अथ सटीको ज्ञानसारः ।

## अथ प्रथमं पूर्णाष्टकम् ।

ॐ नमः सिद्धेभ्यः

नत्वा वीरं जगद्ध्येयं ध्यात्वा च गुरुशारदे । ज्ञानसारेऽत्र संक्षेपाद्व्याख्या काचिद्विधीयते ॥ १ ॥

**ऐन्द्रश्रीसुखमग्नेन लीलालग्नमिवाखिलम् । सच्चिदानन्दपूर्णेन पूर्णं जगदवेक्ष्यते ॥ १ ॥**

ऐन्द्रेति–ऐन्द्रश्रीसुखमग्नेन–सकलैश्वर्यसुखभोगित्वादिन्द्रो जीवस्तत्संबन्धिनी या श्रीर्ज्ञानादिरूपा लक्ष्मीस्तया जनितं यत्सुखं प्रमोदस्तस्मिन् यो मग्नः सर्वाङ्गीणतया तन्मयस्तेन । सच्चिदानन्दपूर्णेन–सद्यथार्थस्वसत्तारूपेण सर्वकालं विद्यमानस्वभावत्वं, चित् सकलज्ञेयज्ञापकज्ञानस्वभावत्वं, आनन्दः सहजपरमाह्लादस्वभावत्वं, तैस्त्रिभिः स्वात्मस्वभावविज्ञानैः पूर्णो भृतः, छद्मस्थश्च दृष्टिलक्ष्यत्वेन पूर्णस्तेन ब्रह्मस्वरूपवेदिना पुंसा कर्तृभूतेन । अखिलं समस्तं जगत्त्रिभुवनवर्तिप्राणिगणः । पूर्णं स्वस्वसत्तागतत्रिस्वभावगुणराशिना भृतं । अवेक्ष्यते विलोक्यते । स स्वयं पूर्णत्वात् स्वात्मवत्सर्वजीवगणं पूर्णमेव पश्यति । सुखिनः सुखमयमिव सर्वं भाति, अयमनेन स्वगुणेन न्यून इत्येवं तस्य न प्रतिभाति । किंभूतमिवेत्याह–लीलालग्नमिव लीला स्वगुणविलासरूपक्रीडा तस्यां मोहवशवर्तित्वे-नालग्नमपि लग्नमिवात्यर्थमासक्तमिवेति यावत् । पूर्णदृष्टिवता जगद्दृश्यते । अनेन श्लोकव्याख्यानेनेदमावेदितम्–यतः सर्वोऽपि जीवः

स्वगुणराशिना समृद्ध एवास्ति ततः सर्वैरर्हन्मतविद्भिर्जातिकुलरूपबलतपोलाभश्रुतबुद्ध्यादिमदं विहाय स्वसंपत्पूर्णतानिष्पत्तये यत्नप-रैर्भाव्यमिति सूचितमित्यर्थः ॥ १ ॥

शिष्यः प्राह-सा पूर्णता केनोपायेन सुप्रापा स्यात्? गुरुराह—भो भद्र! वक्ष्यमाणप्रकारेण ज्ञानदृष्टिं जागरूकां कुरु । इति प्रतिज्ञातप्रकारमाह-

**पूर्णता या परोपाधेः सा याचितकमण्डनम् । या तु स्वाभाविकी सैव जात्यरत्नविभानिभा ॥ २ ॥**

पूर्णतेति—हे भव्य त्वमिति जानीहि । परोपाधेः परेऽन्ये धनरमणीदेहस्वजनरूपसौभाग्यबलयौवनैश्वर्यादिपौद्गलिकाः पदार्थास्तेषां य उपाधिः प्राप्तिरूपसंबन्धस्तस्मात्समुद्भूता । या पूर्णता बहिःसमृद्ध्या समग्रता । सा सर्वापि तव पूर्णानन्दस्य । याचितकमण्डनं याचितमेवयाचितकम् । याचनेनाधिगतं प्राप्तं स्वीकृतमिति यावत् यन्मण्डनं कंकणकुण्डलाद्याभरणविशेषस्तत्सदृशी । यादृशी याचितालंकारेण पूर्णता तादृशीति यावत् । अयं भावः—यथोक्तमाभरणं कुत्सितं भवति परकीयत्वेनोपहतत्वात् । द्विविधं ह्यलंकारफलं दृष्टं तत्र निर्वाहे सति परिशुद्धाभिमानिकसुखजनिका शरीरशोभा स्यात्, कथंचिन्निर्वहणाभावे तेनैव निर्वाहः । न च याचितकमण्डने एतद्द्वितयमप्यस्ति । तद्वत्परोपाधिकृतया पूर्णतयाप्यात्मन इह भवे उपशान्तेरभावः परत्र च दुर्गतिरमोक्षश्चेति । तु पुनर्या पूर्णता जीवस्य । स्वाभाविकी स्वस्य जीवस्यात्मीया ये भावा ज्ञानादिधर्मास्तेभ्य आगता स्वाभाविकी । सैव प्रोक्तरूपैकैव । जात्यरत्नविभानिभा जातौ भवं जात्यं स्ववर्गे श्रेष्ठं प्रधानतमं यद्रत्नं चिन्तामणिवैडूर्यादि तस्य या विभा कान्तिस्तया निभा सदृशी यावद्द्रव्यभावितयाऽभिन्नतया तुल्येति यावत् भवति । अयं भावः—यथा श्रेष्ठरत्नकान्तिः रत्नस्थितिं यावद्भवति तस्मादभिन्ना भवति, तथैव जीवस्य स्वाभाविकी पूर्णता आकालं स्वरूपादवियुक्ता भवति । अतः सैव मेऽस्तु किमन्ययेत्यर्थः ॥ २ ॥

ननु परकृता पूर्णतापि जनस्येह भवे सुखदास्तीति कश्चिद्भ्रान्तो वदति, तन्मिथ्येत्याह—

**अवास्तवी विकल्पैः स्यात्पूर्णताब्धेरिवोर्मिभिः । पूर्णानन्दस्तु भगवान् स्तिमितोदधिसन्निभः ॥ ३ ॥**

अवास्तवीति—भो भव्य ! अवास्तवी वस्तु सर्वकालस्थायी आत्मरूपपदार्थः तस्येयं तत्संबन्धिनी तद्धर्मनिष्पन्नत्वात् वास्तवी । न वास्तवी अवास्तवी । पूर्णता सर्वप्राप्तिमत्ता । विकल्पैर्भ्रान्तिभिः संसर्गारोपपर्यायैरेवेति यावत् । अस्ति न तु वस्तुवृत्त्या । यथाहं रूपवानस्मीति । कथमिव ? ऊर्मिभिर्वायुप्रेरितोन्नतैर्जलकल्लोलैः । अब्धेरिव समुद्रस्य पूर्णतेव मिथ्यास्ति । यथा समुद्रजलमनुन्नतमपि वातप्रेरितं सत्समुन्नतं दृश्यते, तथेयमपि असत्यपि सतीव भासते । कुत एवं ज्ञायत इत्याह—तुशब्द उक्तशंकानिवृत्तौ । हे आत्मन् । यः पूर्णानन्दः शरीरादिभ्यो भिन्नः सकलस्वगुणपूर्ण आत्मा वर्तते स तु । भगवान् ज्ञानाद्यैश्वर्यवान् । स्तिमितोदधिसन्निभः स्तिमितो निश्चलो वायुना प्रेरयितुमशक्य इति यावत् । स चासावुदधिः समुद्रस्तेन सन्निभः सदृशोऽस्ति, विकल्पातीतत्वात् । ततः सा विकल्पजा पूर्णता आत्मनि नास्तीति ज्ञेयं, अतः कथं तस्याः सकाशाज्जीवस्य सुखं भवेत् ? न कथमपि, विधर्मत्वादित्यर्थः ॥ ३ ॥

अथ पूर्वोक्तार्थस्य फलं साक्षात्कुर्वन्नाह—

**जागर्ति ज्ञानदृष्टिश्चेत्तृष्णाकृष्णाहिजांगुली । पूर्णानन्दस्य तत्किं स्याद्दैन्यवृश्चिकवेदना ॥ ४ ॥**

जागर्तीति—हे सुशील ! चेद्यद्येवमुक्तप्रकारेण तृष्णाकृष्णाहिजांगुली तृष्णाऽप्राप्तसुखभोगादेः प्राप्तये प्राप्तस्य च संरक्षणाय लोभोदयाल्लिप्सातुरता गृद्धिरासक्तिरिति यावत् । सैव कृष्णो घनतरश्यामवर्णो महाभीमविषवेगभृदहिः सर्पस्तस्य दमने विषवेगहरणे

समर्था जांगुली गारुडीविद्याभूता। ज्ञानदृष्टिः प्रोक्तप्रकारा यथास्थितवस्तुस्वरूपग्राहिणी बोधपरिणतिः। यस्य पूर्णानन्दस्य परमसहजाह्लादमयस्य भगवतो हृदि जागर्ति उन्निद्रविकस्वरा भवति। तस्य भगवतस्तत्तस्मात् पूर्वोक्तविकल्पस्वरूपकारणात्ः। दैन्यवृश्चिकवेदना दीनस्य भावः कर्म वा दैन्यं दीनताऽप्राप्तप्राप्तये मुखम्लानिपूर्विकाऽरतिरर्तिर्वा तदेव वृश्चिको विषकंटकोपेतकीटकविशेषस्तेन कृता या वेदना पीडा सा किं स्यात्? अपि तु न स्यात्। अयमत्र भावार्थः—यस्य हृदये पूर्वोक्ता ज्ञानदृष्टिर्जागरूका स्यात्तस्य कृष्णलेश्यारौद्रध्यानभृता तृष्णापि नश्यति, तर्हि जाग्रत्स्वभाववज्ज्ञानदृष्टिभृत्पूर्णानन्दस्य विकल्पजदीनताकृतवेदनाहरणे किमुच्यते इत्यर्थः ॥ ४ ॥

अथ पुरुषोत्तमानां दृष्टिरीदृशी स्यादित्याह—

**पर्यन्ते येन कृपणास्तदुपेक्षैव पूर्णता। पूर्णानन्दसुधास्निग्धा दृष्टिरेषा मनीषिणाम् ॥ ५ ॥**

पूर्यन्त इति—येन धनधान्यादिबाह्यवस्तुसंग्रहेण। कृपणा मन्दमतयः। पूर्यन्ते प्रचुरतरोद्यमेन संगृह्यजातपूर्णसुखमप्यात्मानं सुखपूर्णमिव मन्यन्ते। तस्य पूर्वोक्तस्य धनादिवस्तुन उपेक्षा त्यागः इदं न मम स्यादित्यनपेक्षणं सैव। पूर्णता समाप्तकार्यता स्यात्, न तु तत्संग्रहेण। तेनेच्छाया अपूर्णत्वात्। मनीषिणां यथास्थितवस्तुज्ञानपंडितानां। एषा पूर्वप्रोक्तस्वरूपा। दृष्टिर्ज्ञानचक्षुः। पूर्णानन्दसुधास्निग्धा पूर्णानन्दः परमोपेक्षया स्फुरद्रूपपूर्णताजनित आनन्दः स एव सुधाऽमृतं तेन स्निग्धा स्नेहला वर्त्तते। बाह्यवस्तुनस्त्यागत एव पूर्णतेत्यर्थः ॥ ५ ॥



---

१ अर्तिः पीडा।

अथ पूर्णानन्दस्य चमत्कारमाह—

**अपूर्णः पूर्णतामेति पूर्यमाणस्तु हीयते। पूर्णानन्दस्वभावोऽयं जगदद्भुतदायकः ॥ ६ ॥**

अपूर्ण इति–हे शान्तस्वान्त अयं पूर्वप्रोक्तस्वरूपः पूर्णानन्दस्वभावः परिशुद्धप्रमोदमयस्तव नैसर्गिको धर्मः । जगदद्भुतदायकः जगतस्त्रिभुवनवर्तिजनस्याद्भुतस्य चमत्कारस्य दायकः प्रापको वर्तते। कुत एवं यतोऽपूर्णः काञ्चनादिभिरपूर्यमाणः संग्रहमकुर्वन् सन्नपि । पूर्णतां संपूर्णतां । एति प्राप्नोति अनिच्छकत्वेन ज्ञानादिभिः सहजानन्दपूर्णो भवति। इतरकोशागारादीनि त्वपूर्यमाणानि रिक्तीभवन्ति अत एवास्याद्भुतत्वं प्रोक्तं । तु पुनः पूर्यमाणो धनादिसंग्रहेण भृतः सन् हीयते इच्छया वर्धितसंतापतो निरानन्दो भवति। लौकिकास्तु पूर्यमाणा भृताः संपद्यन्त इत्यनेनाप्ययमद्भुतचरित्रोऽस्तीत्यर्थः ॥ ६ ॥

अथ परभावेषु स्वकीयत्वारोपणेनापि पूर्णता नास्त्येवेत्याह—

**परस्वत्वकृतोन्माथा भूनाथा न्यूनतेक्षिणः। स्वस्वत्वसुखपूर्णस्य न्यूनता न हरेरपि ॥ ७ ॥**

परस्वेति–परस्वत्वकृतोन्माथाः परे धनकुटुंबाद्यात्मव्यतिरिक्तपदार्थाः तेषु यत्स्वत्वं स्वकीयत्वं मदीया एते इति बुद्धिरिति यावत्। तेन कृत उन्माथः प्रशमस्थैर्यवत्परिणतेर्विलोडनं वा रागादिबन्धनं वाऽनिच्छापरिणामविहिंसनं येषां ते तथाविधाः। भूनाथा ये राजानश्च-क्रवर्त्यादयस्तेऽपि । न्यूनतेक्षिणो न्यूनतां परेभ्यः स्वस्यापूर्णतां गर्ह्यतां वा ईक्षन्ते पश्यन्तीत्येवंशीला भवन्ति। स्वस्वत्वसुखपूर्णस्य स्वे

स्वकीये ज्ञानादिगुणधन स्वत्वं मदीयत्वबुद्धिस्तस्य तत्कृतं वा यत्सुखं शर्म तेन यः पूर्णः संभृतस्तस्य पुरुषस्य । हरेरपि सुरेन्द्रतोऽपि । न्यूनता केनचिदूनत्वम् । न विद्यते । स्वधर्मेण सर्वोऽपि समोऽस्तीत्यर्थः ॥ ७ ॥

पूर्णतावृद्धेरवसरज्ञापनपूर्वकमुपसंहरति—

**कृष्णपक्षे परिक्षीणे शुक्ले च समुदञ्चति । द्योतते सकलाध्यक्षा पूर्णानन्दविधोः कला ॥ ८ ॥**

कृष्णपक्ष इति–कृष्णपक्षो जीवस्य धर्मप्राप्तेरनर्हः कालोऽर्धपुद्गलपरावर्तपरिणामादधिका संसारपरिभ्रमणशक्तिरित्यर्थः । चन्द्रपक्षे तु जनप्रसिद्धोऽर्धमासः । तस्मिन् परिक्षीणे सर्वस्मिन् विलयं गते सति । च पुनः शुक्ले शुक्लपक्षो जीवस्यापार्धपुद्गलपरावर्तमात्रशेषसंसारस्तस्मिन् । समुदञ्चति सम्यक् प्रकारेण सम्यक्त्वज्ञानचारित्रशुद्ध्या सुध्यानवैराग्योपशान्तवृत्त्यादिना च वृद्धिं गच्छति सति । सकलाध्यक्षा सकलाः सर्वे विश्वभावा अध्यक्षाः प्रत्यक्षा यस्यां सा । चन्द्रपक्षे तु सर्वेषां प्रत्यक्षाह्लादनकरी । पूर्णानन्दविधोः पूर्णानन्दः सहजानन्दस्वरूपश्चेतनः स एव विधुश्चन्द्रस्तस्य । चन्द्रपक्षे पूर्णायां पूर्णिमा निशायामानन्दो यस्य स चासौ विधुश्चन्द्रः तथा तस्य । कला ज्ञानज्योतिः केवलज्ञानमिति यावत् । चन्द्रपक्षे कला षोडशभागपूर्णा ज्योतीरूपा । द्योतते विश्वस्वरूपे प्रकाशते शोभते च । यदुक्तम्–"जेसिमवड्ढपुग्गलपरिअट्टो सेसउ अ संसारो । ते सुक्कपक्खिया खलु अवरे पुण कण्हपक्खिया ॥ १ ॥ जो किरियावाइ सो भव्वो णियमा सुक्कपक्खिउ । अंतपुग्गलपरिअट्टस्स सिज्झइ नियमा ॥ २ ॥" इति दशाचूर्णिवचनाद्व्याख्यातमित्यर्थः ॥ ८ ॥

॥ इति प्रथमं पूर्णाष्टकम् ॥ १ ॥

# ॥ अथ द्वितीयं मग्नाष्टकम् ॥ २ ॥

अथ मग्नाष्टकं व्याख्यायते । तत्र चायमभिसंबन्धः-प्रथमाष्टके पूर्णानन्दस्वभाव उक्तः, स तु मग्नस्य भवतीत्यतो मग्नत्वमत्रोच्यते । अथवा साध्यमुक्त्वा साधनमुच्यते इत्यनेन संबन्धेनायातस्यास्यायमादिमः श्लोकः—

**प्रत्याहृत्येन्द्रियव्यूहं समाधाय मनो निजम् । दधच्चिन्मात्रविश्रान्तिं मग्न इत्यभिधीयते ॥ १ ॥**

प्रत्याहृत्येति—इन्द्रियव्यूहं पञ्चेन्द्रियगणं । प्रत्याहृत्य प्रत्येकमिन्द्रियं शब्दादिस्वस्वविषयराशिभ्य आहृत्योपयोगदंडप्रहारेण निवारयित्वा । निजं स्वकीयं । मनोऽन्तःकरणं । समाधाय वक्ष्यमाणस्वस्वरूपोपयोगेनोपयोगान्तरेभ्यो रुद्ध्वा । चिन्मात्रविश्रान्तिं चित् आत्मनश्चैतन्यस्वभावो ज्ञानस्वभावो वा तन्मात्रा तत्स्वरूपा वा तन्मात्रेऽन्यपरिहारेण चैतन्यमात्रे या विश्रान्तिरुपयोगस्थिरता तन्निश्चलतेति यावत् तां । दधत् धारयन् कुर्वन् लयमाप्तो भवन्नित्यर्थः । इतीत्थंप्रकारापन्न एव । मग्नः सर्वांगीणतया समालीनः । अभिधीयेत कथ्यते तत्स्वरूपवेदिभिः सर्वज्ञैः । हे आत्मंस्त्वमप्येवंविधो मग्नो भवेत्यात्मनि ध्येयमित्याशयः इति ॥ १ ॥

अथ मग्नस्य परब्रह्मण्येव प्रेमगरिष्ठता समुत्पद्यते इत्यावेदयन्नाह—

**यस्य ज्ञानसुधासिन्धुपरब्रह्मणि मग्नता । विषयान्तरसंचारस्तस्य हालाहलोपमः ॥ २ ॥**

यस्येति—हे पूर्णानन्देच्छो शिष्यमणे।यस्य स्वपरस्वरूपविवेचनशीलस्य।ज्ञानसुधासिन्धुपरब्रह्मणि ज्ञानं यथास्थितसर्ववस्तुस्वरूपावभासिकेवलज्ञानदर्शनात्मकं तदेव सुधाऽमृतं तस्य सिन्धुरिव सिन्धुः समुद्रस्तद्रूपं यत्परं सर्वोत्कृष्टं ब्रह्म सकलकर्मघनपटलवर्जितशुध्धचैतन्य-

सत्ता तस्मिन् । मग्नता नितरामुपयोगपरतास्ति । तस्य परब्रह्ममग्नस्य । विषयान्तरसंचारः परब्रह्म विहायान्यत्र विषये ज्ञेयरूपपदार्थांतरे
॥ ४ ॥ संचार उपयोगप्रवृत्तिः हालाहलोपमो हालाहलो विषविशेषस्तेनोपमा सादृश्यं यस्य स तथा भातीत्यर्थः ॥ २ ॥

हे आत्मन् परभावेषु ते कर्तृत्वं नास्ति ततस्त्वं निवृत्तिं कुर्वित्येवमात्मनैवात्मोपदेष्टव्य इत्याशयेनाह—

**स्वभावसुखमग्नस्य जगत्तत्त्वावलोकिनः । कर्तृत्वं नान्यभावानां साक्षित्वमवशिष्यते ॥ ३ ॥**

स्वभावेति—स्वभावसुखमग्नस्य स्वकीया आत्मीया ये भावा अनपेक्षतादिधर्मास्तेषां तैः कृतं वा यत्सुखमानन्दस्तस्मिन् यो मग्नो लीनस्तस्य । जगत्तत्त्वावलोकिनो जगतां त्रिभुवनवर्तिसचेतनाचेतनरूपपदार्थानां तत्त्वं परमार्थसारमवलोकयति स्याद्वादितया ज्ञान-चक्षुषा पश्यति यः तस्य पुरुषस्य । अन्यभावानां स्वात्मव्यतिरिक्तसकलपदार्थानां । कर्तृत्वं शुभाशुभभावयोरुत्पादविनाशविधातृत्वं । नैवास्ति । सर्वोऽपि भावः स्वयमेव स्वपर्यायधर्मतया समुत्पद्यते । ननु घटादिकार्याणां कुलालादयः कर्तारः कथं भवेयुरित्याशंक्याह— साक्षित्वं तत्र कार्योत्पादविनाशे चैतन्यस्य ज्ञातृत्वमेव यथाऽयमनेन प्रकारेणोत्पन्नो विनष्टो वेति द्रष्टृत्वं अवशिष्यते । परभावेषु चेतनस्य ज्ञानरूपैव क्रियाऽधिकाऽस्ति । परमार्थेन मृदादयः स्वयमेव घटादितया परिणमन्तीत्यर्थः ॥ ३ ॥

उपदेशमेव पुनराह— ॥ ४ ॥

**परब्रह्मणि मग्नस्य श्लथा पौद्गलिकी कथा । क्वामी चामीकरोन्मादाः स्फारा दारादराः क्व च ॥ ४ ॥**

परब्रह्मणीति—यो जनः परब्रह्मणि सर्वोत्कृष्टसुविशुद्धचैतन्यस्वरूपे मग्नस्य संलीनचित्तस्य पुरुषस्य । पौद्गलिकी कथा शब्दा-

दिपुद्गलसंबन्धिनी कथा अस्य ध्वनिर्मनोहरो दुष्टो वेत्यादिरूपा वार्ताऽपि । श्लथा दुर्बला विरला वाऽस्ति । तर्हि तस्य अमी सुदूरतरं यावत् प्रसृततया साक्षाद्दृश्यमानाः । चामीकरोन्मादाश्चामीकरं स्वर्णं तेन कृता य उन्मादाश्चित्तस्य विभ्रमकरावेशाः । क्व कुत्र भवन्ति ? न कुत्रापीत्यर्थः । तथा च स्फारा अतिप्रधाना उदारा इति यावत् । दारादरा दारायां दारैर्नारीभिर्वा कृता ये आदरा हावभावशृंगारादिप्रेमोत्पादकक्रियाविशेषास्तेऽपि । क्व कुत्र चित्तविभ्रमकरा भवेयुः ? न क्वापीत्यर्थः । अर्थकामयोर्निमित्तेषु निरिच्छत्वादित्यर्थः ॥ ४ ॥

अथोक्तलक्षणस्य साधोश्चतुर्भिः श्लोकैः प्रभावं दर्शयन्नाह—

**तेजोलेश्याविवृद्धिर्या साधोः पर्यायवृद्धितः । भाषिता भगवत्यादौ सेत्थंभूतस्य युज्यते ॥ ५ ॥**

तेजोलेश्येति—साधोर्मुनेः । पर्यायवृद्धितो मासादारभ्य द्वादशमासं यावत् क्रमेण संयमपर्यायस्य दीक्षाकालस्य या वृद्धिरधिकाधिकतरत्वं तस्याः सकाशात् । या वक्ष्यमाणस्वरूपा । तेजोलेश्याविवृद्धिस्तेजश्चेतसः सुखलाभरूपं तदेव लेश्याशयविशेषः सुखरूपाशय इति यावत् । तस्या या विविधा विचित्रा वा वृद्धिरुपचयः पुष्टिरिति यावत् । भगवत्यादौ पंचमांगादौ । भाषिता श्रीवर्धमानस्वामिना कथिता । सा पूर्वोक्ता सुखवृद्धिः । इत्थंभूतस्य पूर्वोक्तप्रकारेण परब्रह्मणि मग्नस्य । युज्यते घटते यदुक्तं—"मासादिपर्यायवृद्ध्या द्वादशभिः परं तेजः । प्राप्नोत सर्वदेवेभ्य उत्तमं शर्म ॥ १ ॥ आलापकस्तु प्रोक्तांगादवसेयः विस्तरभयान्नोच्यत इति ॥ ५ ॥

**ज्ञानमग्नस्य यच्छर्म तद्वक्तुं नैव शक्यते । नोपमेयं प्रियाश्लेषैर्नापि तच्चन्दनद्रवैः ॥ ६ ॥**

ज्ञानमग्नस्येति–ज्ञाने पुर्वोक्तलक्षणे मग्न एकतानमनास्तस्य । यत् सर्वज्ञप्रत्यक्षं शर्म सुखं वर्तते । तत्पूर्वोक्तं सुखं । वक्तुं जिह्वास-

 

हस्तेनापि परस्मै कथयितुं । नैव शक्यते वयं न शक्नुमः तत्सुखं । प्रियाश्लेषैर्दिव्यांगनासमालिंगनसुखैरपि । नोपमेयं नोपमातुं योग्यं साह-श्यतया वक्तुमशक्यमिति यावत् । च पुनः । चन्दनं मलयजं श्रीखण्डं तस्य ये द्रवा रसा आर्द्रपंका इति यावत् 'घोल' इति लोके प्रसिद्धम् तैरपि । उपमातुमशक्यं । ज्ञानसुखस्य स्वाधीनत्वात्स्वाभाविकत्वान्निरपायत्वाच्च । इतरसुखस्य तु तद्विपरीतत्वादित्यर्थः ॥ ६ ॥

**शमशैत्यपुषो यस्य विप्रुषोऽपि महाकथा । किं स्तुमो ज्ञानपीयूषे तत्र सर्वांगमग्नताम् ॥ ७ ॥**

शमशैत्येति—यस्योक्तवक्ष्यमाणलक्षणस्य ज्ञानपीयूषस्य संबन्धिनो विप्रुष आत्मनि लग्नस्यैकबिन्दोरपि । महाकथा महावार्ता भवतीति शेषः । कथंभूतस्य विप्रुषः शमशैत्यपुषः शमः शान्तपरिणामस्तेन जातं यच्छैत्यमात्मपरिणतेः शीतलत्वं तत्पुष्णातीति तस्य शान्तप-रिणामजनितशैत्यपोषणकारकस्येत्यर्थः । तत्र तस्मिन् पूर्वोक्तस्वरूपे । ज्ञानपीयूषे ज्ञानामृतसिन्धौ । या सर्वांगमग्नता आत्मनः सर्वात्मना मज्जनता तां । वयं किं स्तुमो वर्णयामः न कथमपि वर्णयितुं शक्नुम इत्यर्थः स्तोतुमशक्यत्वादिति ॥ ७ ॥

**यस्य दृष्टिः कृपावृष्टिर्गिरः शमसुधाकिरः । तस्मै नमः शुभज्ञानध्यानमग्नाय योगिने ॥ ८ ॥**

यस्येति—यस्य ज्ञानध्यानमग्नस्य योगिनः । दृष्टिर्नेत्रप्रसारणमवलोकनं वा प्राणिनां । कृपावृष्टिः करुणाघनमंडलीवर्षणं वर्तते । गिरः सदुपदेशमय्यो वाचः । शमसुधाकिरः प्रशमामृतच्छटावर्षिण्यो भवन्ति । तस्मै प्रोक्तरूपाय । शुभज्ञानध्यानमग्नाय शुभे स्वपरहितकारके ज्ञानध्याने ज्ञानं च वस्तुसद्भावप्रकाशिबोधो ध्यानं च धर्म्यं शुक्लरूपं कर्मवनदाहकार तयोर्विषये यो मग्नः स्थिरा नबद्धचित्तस्तस्मै । योगिने योगीश्वराय । नमो मदीयनमस्कारोऽस्त्विति ॥ ८ ॥ 

॥ इति मग्नाष्टकम् ॥ २ ॥

# ॥ अथ तृतीयं स्थिराष्टकम् ॥ ३ ॥

द्वितीयाष्टके मग्नतोक्ता । सा च जीवे स्वस्वभावे स्थिरतां प्राप्ते सति भवतीत्यतस्तृतीयेऽष्टके स्थिरतामाह—

**वत्स किं चञ्चलस्वान्तो भ्रान्त्वा भ्रान्त्वा विषीदसि । निधिं स्वसन्निधावेव स्थिरता दर्शयिष्यति ॥१॥**

वत्स इति—हे मग्नताकांक्षिन् वत्स हे बन्धो आत्मन् । त्वं चञ्चलस्वान्तः सुखप्राप्तये चञ्चलं चपलमस्थिरमिति यावत स्वान्तं मनःपरिणामो यस्य स तथाभूतः सन् भ्रान्त्वा भ्रान्त्वा परेषु सुखगवेषणां कुर्वाणोऽटित्वाटित्वा भ्रमणां कृत्वा कृत्वेति यावत् । किं किमर्थं व्यर्थतयैव । विषीदसि क्लिश्यसि कष्टभाग् भवसीति यावत् । अत्रायं भावः— तव प्राप्तव्यं सुखं वनितादिष्वन्येषु नास्ति। तव प्रापणीयौ धर्ममोक्षावपि निमित्तभूतेषु परेषु न विद्येते । किं तु यत्त्वमपेक्षसे तत्सर्वमपि त्वयि विद्यतेऽतः स्वस्मिन् स्थिरतां भज । एतदेवाह— यतः स्थिरता स्वस्वभावे निश्चलता। निधिं निधानं पूर्णानन्दरूपसकलसुखरत्नभृतकोशागारं स्वसन्निधौ एव। एवकारोऽत्रावधारणे, स्थानान्तरपरिहारेण स्वसमीप एव। तव दर्शयिष्यति ज्ञानचक्षुर्विषये साक्षाद्विधास्यति। पूर्णानन्दस्य परस्मिन् स्वस्यानाभावात् तस्मात्त्वं हृच्चांचल्यं परिहृत्य स्वात्मनी स्थिरो भवेति॥ १ ॥

अथ स्थिरताया अभावे जीवस्यापाय एव स्यादित्याह—

**ज्ञानदुग्धं विनश्येत लोभविक्षोभकूर्चकैः । अम्लद्रव्यादिवास्थैर्यादिति मत्वा स्थिरो भव ॥ २ ॥**

ज्ञानेति–हे गुरुभक्त अम्लद्रव्यादिवाम्लरसयुक्तकांजिकादिपदार्थात् दुग्धमिव। अस्थैर्यात् स्थिरो निश्चलपरिणामस्तस्य भावः कर्म वा स्थैर्यं न स्थैर्यमस्थैर्यं तस्मात् भोगतृष्णादिना परिणामचांचल्यात्। ज्ञानदुग्धं ज्ञानं शुध्धात्मस्वरूपावधारणसमर्थः शुध्धबोधस्तदेव

दुग्धमिव दुग्धं । मधुरत्वात् सध्धर्मपुष्टिकरत्वाच्च तस्य दुग्धौपम्यं । तद्विनश्येत स्वकार्यकरणेऽसमर्थत्वेन क्षीयेत । कैः कर्तृभूतैः? लोभविक्षोभ-कूर्चकैर्लोभः कश्चिज्जीवस्याभिलाषविशेषस्तेन कृता ये विक्षोभा इतस्ततश्चित्तस्य व्यर्थसंचालनानि त एव कूर्चका रजोमिश्रिततृणपुञ्जास्तैर्हे-तुभूतैः । अभूतपूर्वमात्मदर्शनं तैरावृतो न लभते तथाविधस्य ज्ञानस्याभिलाषदोषेण विनाशितत्वात् । इति पूर्वोक्तं । मत्वा सम्यग्ज्ञात्वा । त्वं स्थिरो भव निश्चलचित्तस्वभावे तिष्ठेत्यर्थः ॥ २ ॥

चित्ते अस्थिरे सति शिवदापि क्रिया निष्फला स्यादित्याह—

**अस्थिरे हृदये चित्रा वाङ्नेत्राकारगोपना । पुंश्चल्या इव कल्याणकारिणी न प्रकीर्तिता ॥ ३ ॥**

अस्थिर इति—हे गुरुदैवत हृदये मनसि । अस्थिरे भोगादितृष्णया चञ्चलतां प्राप्ते सति । चित्रा विविधा । वाग् वाणी भाषणं वा, नेत्रे चक्षुषी, आकारः शरीरावयवानां चेष्टा, तेषां या गोपना विकारोत्पत्ते रक्षणक्रिया सा । पुंश्चल्या इव कुलटाया कृत्रिमलज्जया वाङ्-नेत्रादिचेष्टागोपना इव । कल्याणकारिणी ज्ञानादिसंपद्वृध्धिकरिणी विपन्निवारिणी वा । पुंश्चलीपक्षे स्वाभिमतयशःसुखदायिनी । न प्रकी-र्तिता ज्ञानिभिर्न कथितेति । एवं तव क्रियापरिश्रमोऽस्थैर्यान्निष्फलो मा भवत्वित्यर्थः ॥ ३ ॥

अस्थैर्यं जीवस्य हृदि शल्यतुल्यं भवतीत्याह—

**अन्तर्गतं महाशल्यमस्थैर्यं यदि नोध्धृतम् । क्रियौषधस्य को दोषस्तदा गुणमयच्छतः ॥ ४ ॥**

अन्तर्गतमिति—हे शिष्य यदि यस्यां क्रियायां क्रियमाणायां त्वया । अन्तर्गतं स्वहृदि स्थितं । अस्थैर्यमस्थिरपरिणामरूपं ।

महाशल्यं महच्च तच्छल्यं च कीलकादि विषं वा तत् । नोध्धृतं हृद्देहान्न निष्कासितं । तदा तर्हि । गुणं स्वगुणसिद्धिरूपं । अयच्छतोऽददतः । क्रियौषधस्य क्रिया सदावश्यकादिव्यापारः सैवौषधं रोगनाशकद्रव्यं तस्य । को दोषः कोऽपराधः । न कोऽपीत्यर्थः । स्वप्रमत्ततायाः एव दोष इति तात्पर्यार्थः ॥ ४ ॥

अथाष्टकसमाप्तिं यावत् स्थिरतायाः फलं दर्शयन्नाह—

**स्थिरता वाङ्मनःकायैर्येषामंगांगितां गता । योगिनः समशीलास्ते ग्रामेऽरण्ये दिवा निशि ॥ ५ ॥**

**स्थिरतेति**—येषां योगिनां । वाङ्मनःकायैः वाग् वचनव्यापारः, मनो मानसिकश्चिंतनव्यापारः, कायः शरीरस्य गमनविलोकनादिव्यापारस्तैर्हेतुभूतैः । स्थिरता निश्चलता । अङ्गाङ्गितां अङ्गस्य ध्यानादिसाधनयोगव्यापारस्य, अङ्गिनः साधकयोगिसर्वात्मप्रदेशराशेश्च, तयोरभेदधर्मधर्मिसंबन्धेन गौणमुख्यत्वेनैकत्र परिणमनं तद्भावस्तत्ता तां । गता प्राप्तास्ति । ते प्रोक्तरूपाः । योगिनो मुनयः । ग्रामे जनसंकीर्णे नगरादौ । अरण्ये निर्जने वनादौ । दिवा सप्रकाशेऽहनि । निशि सान्धकारायां रात्रौ । समशीलास्तुल्यस्वभावा भवन्ति । देशकालभेदेऽपि तेषां परिणतिभेदो न भवतीत्यर्थः ॥ ५ ॥

**स्थैर्यरत्नप्रदीपश्चेद्दीप्रः संकल्पदीपजैः । तद्विकल्पैरलं धूमैरलंधूमैस्तथाश्रवैः ॥ ६ ॥**

**स्थैर्येति**—चेद्यदि योगिहृदये स्थैर्यरत्नप्रदीपः स्थिरस्य भावः स्थैर्यं तदेव रत्नमयः प्रदीपो ज्योतीरूपः । दीप्रो जाज्वल्यमानः सप्रकाश इति यावत् । स्यादिति गम्यं । तत्तर्हि । संकल्पदीपजैः संकल्पाः परचिन्तानुगा अशुद्धचपलतारूपा मनोरथा वा त एव दीपा

अग्नितैलशरावकवर्त्तिभिः रचनारूपा लोकप्रसिद्धास्तेभ्यो जातास्तैः । विकल्पाः पुनः पुनः तत्स्मरणरूपास्त एव धूमा मलिनधर्मत्वाद्धूमौपम्यं तैरलं पर्याप्तं सृतमिति यावत् । तथाऽलंभूतैरत्यन्तमलिनैः । आश्रवैः कर्मबन्धहेतुभिर्धूमरूपैरलं पर्याप्तं । तैरस्माकं न किञ्चित्साध्यम् । अतो निर्धूमः स्थैर्यरत्नप्रदीप आदरणीय इत्यर्थः ॥ ६ ॥

**उदीरयिष्यसि स्वान्तादस्थैर्यपवनं यदि । समाधेर्धर्ममेघस्य घटां विघटयिष्यसि ॥ ७ ॥**

उदीरेति—हे दृढभक्ते यदि मोहोदयेन त्वयि निरुपयोगासावधाने सति । स्वान्तादन्तःकरणमध्यतः । अस्थैर्यपवनं चंचलपरिणामरूपमारुतं । त्वमुदीरयिष्यसि प्रेरयित्वा आविष्करिष्यसि । तदा त्वं समाधेः समाधिः क्वचिद्ध्येये त्रियोगस्यैकाग्रता तस्य । कथंभूतस्य? धर्ममेघस्य धर्मः स्वस्वभावस्तद्रूपांकुरोद्गमकारी स एव मेघ इव मेघो जलधरस्तस्य । यद्वा धर्ममेघस्य धर्ममेघइतिनाम्ना प्रसिद्धस्य समाधेः समाधिभावस्य । घटा गरिष्ठत्वं प्रचुरतारूपाऽभ्रमाला तां विघटयिष्यसि वियोजयिष्यसि । यथा वायुप्रेरिता मेघघटा विलयं याति तथाऽस्थैर्यपरिणामेन समाधिरूपधर्ममेघस्य घटा विलयं गच्छतीत्यर्थः ॥ ७ ॥

अथ स्थिरताष्टकमुपसंहरन् मुनिभिः स्थिरतानिष्पादने प्रचुरोद्यमपरैर्भाव्यमित्युपदिशति—

**चारित्रं स्थिरतारूपमतः सिद्धेष्वपीष्यते । यतन्तां यतयोऽवश्यमस्या एव प्रसिद्धये ॥ ८ ॥**

चारित्रमिति—अतो वक्ष्यमाणहेतुतः स्थिरतारूपं स्थिरता आत्मप्रदेशानां ज्ञानदर्शनात्मकोपयोगस्य च निश्चलता, सैव रूपं स्वरूपनिष्पत्तिर्यस्य तत्तथा । चारित्रं जीवस्य निजगुणः । सिद्धेष्वपि सकलकर्मघनवियुक्तमुक्तिस्थजीवेष्वपि । इष्यते मन्यते । जिनेश्वरैरिति शेषः । तर्हीतरेषु तस्या अभावे चारित्रं न स्यादित्यत्र किमुच्यते ? । ततोऽवश्यं निश्चयेन । एवशब्दोऽवधारणे । ततश्चास्या

एव अन्यपरिहारेण स्थिरताया एव । प्रसिद्ध्यै निष्पत्त्यै । यतयो योगीश्वराः । यतन्तां प्रचुरोद्यमपरा भवन्तु यदागमे सिद्धानां चारित्रं निषिद्धं तत्क्रियात्मकं निषिद्धमिति ज्ञेयमिति ॥ ८ ॥

॥ इति स्थिरताष्टकम् ॥ ३ ॥

# ॥ अथ मोहत्यागाष्टकम् ॥ ४ ॥

अथ तृतीयाष्टके स्थिरतोक्ता । सा च त्यक्तमोहस्य भवतीत्यतो मोहत्यागाष्टकमाह—

**अहंममेतिमंत्रोऽयं मोहस्य जगदांध्यकृत् । अयमेव हि नञ्पूर्वः प्रतिमंत्रोऽपि मोहजित् ॥ १ ॥**

अहमिति—हे स्थिरताभिगामिन् त्वमिति जानीहि–मोह आत्मभिन्नेषु पदार्थेष्वात्मीयत्वबुद्धिजनकं मोहनीयकर्म मूढतेति यावत् तस्य । अहं देवदत्तादिरस्य धनादेः स्वामी संबन्धी वास्मि । ममेदं द्रव्यादिकं मदीयं । इतीत्थं प्रोक्तप्रकारेणाहंममेत्येवंरूपचतुरक्षरात्मकः । अयं प्रत्यक्षेण जनैर्दृश्यमानः श्रूयमाणः स्मर्यमाणश्च । मंत्रो देवताधिष्ठिताऽक्षरावलिः । जपितः सन्नेव जगदांध्यकृत् जगतो विश्ववासिजीवगणस्यान्ध्यं अन्धस्य भावः कर्म वान्ध्यं ज्ञानचक्षुर्विकलत्वं स्वस्वरूपादर्शित्वभावं करोतीति जगदान्ध्यकृद्भवति । अयमेव पूर्वदर्शितोऽहंममेतिनामकमंत्र एव । हि निश्चयेन । नञ्पूर्वो नकारपूर्वको नाहमस्य स्वामी संबन्धी वा भवामि, न ममेदं धनादिकमित्येवंरूपो जपितो भवति । तदा मोहजित् मोहं मूढस्वभावं जयति हठाद्बलान्निराकरोतीति मोहजित् । प्रतिमंत्रोऽपीति । अपि च नञ्पूर्वोऽयं नाहं न ममेति महामन्त्रः । मोहस्योक्तरूपस्य प्रतिमंत्रः प्रतिकूलो विनाशकारी निजपरस्वरूपदर्शिज्ञाननेत्रविमलताकारीति यावत् । मंत्रोऽप्येवंविधो भवतीत्यर्थः ॥ १ ॥

प्रतिमंत्रजपस्यैव स्वरूपं दर्शयन्नाह—

**शुद्धात्मद्रव्यमेवाहं शुद्धज्ञानं गुणो मम । नान्योऽहं न ममान्ये चेत्यदो मोहास्त्रमुल्बणम् ॥ २ ॥**

शुद्धेति—हे अधिकारिन् त्वयाऽहर्निशमिति ध्येयं-शुद्धात्मद्रव्यं शुद्धं सकलकर्ममलवर्जितं निर्विकल्पविमलं यदात्मद्रव्यमनुत्पन्नाविनष्टचैतन्यसत्तामात्रवस्तु तदेवाहमस्मि, न त्वन्यदहं । तथा शुद्धज्ञानं शुद्धं सकलावरणवर्जितकेवलाभासमयं यज्ज्ञानं सर्वज्ञापकस्वभावरूपं तदेव । मम गुणः मदीयो धर्मः न त्वन्ये वर्णादयः । अन्यः स्वात्मव्यतिरिक्तपदार्थः । अहं न भवामि । च पुनः । अन्ये देहादयः । मम न स्युः । इतीत्थं । अदः स्पष्टं सर्वज्ञोपदेशतो ज्ञायमानं । उल्बणं व्यक्तं स्पष्टतया तीक्ष्णं वा । मोहास्त्रं दुर्भेदमोहशरीरभेदनेऽवन्ध्यशक्ति वज्रादिरूपं क्षेप्यायुधं भवेदित्यर्थः ॥ २ ॥

यो जितमोहो भावेष्वरक्तद्विष्टः स पापकर्मणा न बध्यत इत्याह—

**यो न मुह्यति लग्नेषु भावेष्वौदयिकादिषु । आकाशमिव पंकेन नासौ पापेन लिप्यते ॥ ३ ॥**

यो नेति—यो विगतरागद्वेषः । औदयिकादिषु उदयः कर्मणः स्वस्थितिपाकेन स्वफलदानं प्रत्यभिमुखत्वं तस्मिन् भवो यः स औदयिकः । स आदिर्येषां तेषु । आदिशब्दादौपशमिकक्षायोपशमिकौ अप्रशस्तौ ग्राह्यौ । येषामेव परमार्थेनोपेक्षणीयतास्ति न तु क्षायिकपारिणामिकयोः । भावेषु जन्तो रागादिपरिणामोत्पादकेषु । विषयेषु लग्नेषु उदयप्राप्तेषु सत्सु । न मुह्यति तत्कृतव्यामोहेऽपि स्वोपयोगान्न चलति । असावीदृगात्मा । पापेन पापकर्मणा । न लिप्यते न बध्यते रागादिविकल्पवर्जितत्वात् । रागादय एव जीवस्य बन्ध-

हेतवो भवन्ति, न तु शब्दादिविषयाः । तेभ्य आत्मनः सर्वथा भिन्नत्वात् । घटपटवत् । नान्योऽन्यस्य बन्धहेतुः, अतिप्रसंगात् । किं तु विषया इन्द्रियगोचरगता रागाद्युत्पत्तेरेव हेतवो भवन्तीत्यलं विस्तरेण । केन किमिव ? पंकेन कर्दमेन आकाशमिव गगनमिव न लिप्यत इत्यर्थः ॥ ३ ॥

अथ मोहविगमाज्ज्ञाततत्त्वो जीवः संसारे परिभ्रमन्नपि न खिद्यत इत्याह—

**पश्यन्नेव परद्रव्यनाटकं प्रतिपाटकम् । भवचक्रपुरस्थोऽपि नामूढः परिखिद्यते ॥ ४ ॥**

**पश्यन्निति**–भवचक्रपुरस्थोऽपि भवा जीवस्य जन्मान्तरविशेषास्तेषां चक्रं वृन्दं तदेव पुरं नगरं संसारात्मकं कर्मनृपराजधानीति यावत् । तस्मिन् तिष्ठति निवसतीति तथाविधोऽपि । अमूढो मिथ्यात्वादिमोहत्यागाद्विज्ञाततत्त्वः । न परिखिद्यते परितः सर्वभावेन न क्लिश्यते दुर्गत्याद्यतिसंक्लेशस्य मिथ्यात्वमोहेन सह परिक्षीणत्वात् । किंतु स स्वल्पं गर्भावासादिरूपं क्लेशं स्वल्पकालं वेदयति, संसारस्य क्लेशमयत्वात् । किं कुर्वन्नपि न परिखिद्यते ? प्रतिपाटकं पाटकं पाटकं प्रति एकाक्षविकलाक्षादिनगरप्रदेशेष्विति यावत् । परद्रव्यनाटकं पराणि स्वजीवसत्ताव्यतिरिक्तानि द्रव्याणि जीवपुद्गलादीनि तेषां नाटकं तज्जनितनवनवपरिणामरूपं नृत्यं । पश्यन् चतुर्गतिषु विलोकयन् स्वयमनुभवन्नपीत्यर्थः ॥ ४ ॥

मोहफलं दर्शयन्नाह—

**विकल्पचषकैरात्मा पीतमोहासवो ह्ययम् । भवोच्चतालमुत्तालप्रपञ्चमधितिष्ठति ॥ ५ ॥**

**विकल्पेति**–हे शान्त । हि निश्चयेन त्वं जानीहि । किं तदित्याह–विकल्पचषकैर्विकल्पाः परपदार्थानां सुन्दरासुन्दरत्वकल्पना-

रूपमनोरथास्त एव चषका मद्यपानपात्राणि तैः । पीतमोहासवः पीतो मोहासवो मोहमदिरा येन सः । अयमंगुल्या निर्दिश्यमानः सर्वः संसारी । आत्मा जीवः । भवोच्चतालं भवः प्रभूतजन्मान्तरमयचतुर्गतिरूपसंसारः स एवोच्चस्तालो हस्ततालो यत्र मदिरापानगोष्ठ्यां तमुच्चतालरूपं । अयं भावः—यथा मद्यपानगोष्ठ्यां जना मत्ततयोच्चैर्हस्ततालदाने तत्परा भवन्ति, तथैव मोहमत्ता भवे हर्षशोकभरतयोन्मत्तभाषणादिनोरस्ताडनादिना चेष्टन्ते । उत्तालप्रपञ्चमुत्तालोऽतिमहानुत्कटः प्रपञ्चो जन्मजरामरणविस्तारस्तं । अधितिष्ठत्याश्रयति प्राप्नोति । ततस्त्वं मोहविकल्पेभ्यो विरमेत्यर्थः ॥ ५ ॥

पुनरपि मोहकृत्यमेव दर्शयन्नाह—

**निर्मलं स्फटिकस्येव सहजं रूपमात्मनः । अध्यस्तोपाधिसंबन्धो जडस्तत्र विमुह्यति ॥ ६ ॥**

निर्मलमिति—हे विनीत विलोकय यत् आत्मनो जीवस्य । सहजं निरुपाधिकं स्वाभाविकं । रूपं स्वभावसौन्दर्यं । स्फटिकस्येव स्फटिकमणेरिव । निर्मलं सकलकर्ममलकलंकवर्जितं वर्तते । तद्विमुच्य अध्यस्तोपाधिसंबन्धोऽध्यस्तोऽस्वत्वेऽपि स्वत्वेनारोपित उपाधिना कर्मणा कृतो देहादिरूपो यः संबन्धः संयोगोऽस्ति । तत्र तस्मिन्नेवारोपितस्वत्वसंयोगे । जडो मूढोऽज्ञ इति यावत् । मुह्यति निजत्वेन पश्यन् हर्षशोकाभ्यां व्याकुलो भवतीत्यर्थः ॥ ६ ॥

मोहत्यागिनां मोहिजनाग्रे सहजसुखं कथयितुमपि वाक्शक्तिर्न प्रवर्तत इत्याह—

**अनारोपसुखं मोहत्यागादनुभवन्नपि । आरोपप्रियलोकेषु वक्तुमाश्चर्यवान् भवेत् ॥ ७ ॥**

अनारोपेति—हे विवेकज्ञ आत्मन् मोहमाहात्म्यं पश्य । यद्योगी मोहत्यागान्मोहस्याज्ञानस्य मोहनीयकर्मणस्त्यागात् क्षयात् परमार्थेन तु तत्क्षयादाविर्भूतातिशायिज्ञानात् । अनारोपसुखं न विद्यत आरोपोऽसुखे सुखोपचारो यत्र तदनारोपं स्वाभाविकं सुखं परमानन्दस्तत् । अनुभवन्नपि साक्षात्कुर्वन्नपि न तु परोक्त्या जानन्निति अपेरर्थः । सोऽपि आरोपप्रियलोकेषु आरोप उपचारः कल्पनेति यावत् । स प्रिय इष्टो येषां ईदृशा ये लोका जनास्तेषु श्रोतुमुपस्थितेषु सत्सु । वक्तुं कथयितुं । आश्चर्यवान् भवेत् चमत्कारवान् स्यात् । तेषां हृदयेषु तत्स्वरूपावतारे वाक्छक्तेरभावादेतेषां ग्रहिलानामग्रे किं वदामीत्यर्थः ॥ ७ ॥

मोहत्यागफलदर्शनपूर्वकमुपसंहरति—

**यश्चिद्दर्पणविन्यस्तसमस्ताचारचारुधीः । क्व नाम स परद्रव्येऽनुपयोगिनि मुह्यति ॥ ८ ॥**

यश्चिदिति—हे नित्यानन्दातुर यो योगी । चिद्दर्पणविन्यस्तसमस्ताचारचारुधीः चित् आत्मा ज्ञानं च तदेव दर्पण आदर्शस्तस्मिन् विन्यस्तः प्रतिबिंबत्वेन स्थापितः समस्तः सर्वोऽपि य आचारो ज्ञानाचारादिक्रियाभरो येन अत एव चार्वी स्वस्वरूपग्रहणाभिमुखत्वेन निर्दोषत्वेन च मनोहरा धीर्बुद्धिर्यस्य स तथा । अयं भावः—आत्मानमेव ज्ञानदर्शनरत्नत्रयं मन्यमानस्तेन तज्ज्ञापके ज्ञाने सर्वमारोपयतीति । स प्रोक्तलक्षणो योगी । अनुपयोगिनि न विद्यत उपयोग आत्मनो भोगभावो यस्मिंस्तस्मिन् । परद्रव्ये स्वात्मव्यतिरिक्तान्यवस्तुनि । नामेति संभावने । क्व कदापि कुत्रचित् मुह्यति नाम तस्य मोहसंभवोऽपि नास्ति तस्मात् हर्षशोकौ न गच्छतीत्यर्थः ॥ ८ ॥

इति मोहत्यागाष्टकम् ॥ ४ ॥

# ॥ अथ ज्ञानाष्टकम् ॥ ५ ॥

चतुर्थेऽष्टके मोहत्याग उपदिष्टः स तु ज्ञानिनो भवतीत्यतो ज्ञानाष्टकमाह—

**मज्जत्यज्ञः किलाज्ञाने विष्ठायामिव शूकरः । ज्ञानी निमज्जति ज्ञाने मराल इव मानसे ॥ १ ॥**

मज्जतीति—हे मोहोत्सर्गाकाङ्क्ष आत्मन् त्वमेवं ज्ञात्वा ज्ञानी भव । एवमिति किमित्याह—अज्ञोऽप्राप्तरागादिवैरिवारनिवारकस्वपरवस्तुविवेचननिपुणयथार्थज्ञानविशेषो जीवः, न तु निरक्षर एव । किलेत्यनुशये महासंतापजनकापूर्ववैरितुल्ये । अज्ञाने नास्ति ज्ञानफलं यस्मान्मिथ्याज्ञानात्तदज्ञानमन्यथावस्तुस्वरूपोद्भावकं शास्त्रं तस्मिन् । मज्जति मग्नो भवति । कस्यां क इव ? विष्ठायां पुरीषे शूकर इव । यथा वराहः स्वादिष्ठकणभक्षणादिकं हित्वा विष्ठायामापतति, तथैव सम्यग्ज्ञानविकलोऽपि सकलदुःखतृड्हन्तृसुधोदधितुल्यं सर्वज्ञोक्तशास्त्रं विहाय कुशास्त्रे समवतरतीत्यर्थः । ज्ञानी हेयोदासितव्योपादेयभेदेन सम्यग्वस्तुज्ञाता । ज्ञाने मोहान्धकारहन्तृरागादिदोषपंकशोषणांशुमालिरूपे सर्वज्ञोक्तशास्त्रे । निमज्जति सर्वात्मना समवतरति । कस्मिन् क इव ? मानसे मानससरोवरे मराल इव । यथा राजहंसो मानससरसि रमते, तथा सम्यग्ज्ञान्यपि आत्मस्वरूपविवेचकनिर्धारकारिणि ज्ञाने रमत इत्यर्थः ॥ १ ॥

अथास्यैव पारमार्थिकस्वरूपं दर्शयन्नयोगं व्यवच्छिनत्ति—

**निर्वाणपदमप्येकं भाव्यते यन्मुहुर्मुहुः । तदेव ज्ञानमुत्कृष्टं निर्बन्धो नास्ति भूयसा ॥ २ ॥**

निर्वाणेति—हे शुद्धाचरण तज्ज्ञानमेवंविधमेव कार्यकारि त्वया ज्ञेयं । एवमिति किमित्याह—यत् येन ज्ञानेन । निर्वाणपदं

निर्वाणं शान्तसकलसंतापत्वान्मोक्षस्तदेव पदं जीवस्य निजस्वरूपावस्थानरूपं स्थानं । तदेकमपि, यद्यन्यत्किमपि नायाति तदा तदेकमेव । मुहुर्मुहुर्वारंवारं । भाव्यते भावनया वासितं क्रियते आत्मा तन्मयः क्रियते । तदेव ज्ञानं बोधः । उत्कृष्टमितराशेषज्ञानेभ्यः प्रधानं ज्ञेयं । भूयसा प्रभूततरजल्पनात्मकशास्त्रपाठेन । निर्बन्ध आग्रहः । नास्ति न विद्यते । यदुक्तं—"तज्ज्ञानमेव न भवति यस्मिनुदिते विभाति रागगणः । तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातु ॥ १ ॥" इति ॥ २ ॥

उक्तार्थमेव विशिनष्टि—

**स्वभावलाभसंस्कारकारणं ज्ञानमिष्यते । ध्यान्ध्यमात्रमतस्त्वन्यत्तथा चोक्तं महात्मना ॥ ३ ॥**

स्वभावेति—स्वभावलाभसंस्कारकारणं स्वीयो भावः स्वभावोऽनन्तज्ञानदर्शनानन्दमयात्मस्वरूपस्तस्य लाभः प्राप्तिर्निरावरणत्वेनाविर्भाव इति यावत् । तदर्थं यः संस्कारः स्मृतिधारणाक्षमादिरूपसाधनैः सह संसर्गस्तस्य कारणं हेतुः । तदेव ज्ञानं आत्मनो हितकारी बोधः । इष्यते प्रोच्यते । तु पुनः । अतोऽस्मादन्यत् स्वरूपलाभेऽकारणभूतं तत्तु । ध्यान्ध्यमात्रं धियो बुद्धेरान्ध्यमात्रमन्धकारत्वरूपं । यद्वा केवलशब्दरणत्कारमात्रं निष्फलमिति यावत् । एतद्विषये महात्मना श्रीहरिभद्रसूरिणा योगदृष्टिसमुच्चये प्रोक्तमिति ॥ ३ ॥

योगदृष्टिसमुच्चये यत्प्रोक्तं तदेवाह—

**वादांश्च प्रतिवादांश्च वदन्तोऽनिश्चितांस्तथा । तत्त्वान्तं नैव गच्छन्ति तिलपीलकवद्गतौ ॥ ४ ॥**

वादानिति—वादान् पूर्वपक्षरूपान् । यथा यत्सद्वस्तु तन्नित्यरूपमिति मे पक्षोऽस्तीति । च पुनः । प्रतिवादान् तदुत्थापनायोत्तरपक्षरूपान् । यथा तत्त्वदुक्तं न सिध्यति, वस्तुनोऽनित्यत्वात् क्षणिकत्वादभावत्वाद्वा इति । तथाऽनिश्चितान् अनिर्धारितपदार्थान् । यथां-

गुष्ठपर्वमात्र एवात्मा, भ्रूणे तृतीये मासि जीवनिष्पत्तिरित्येवंविधान्। वदन्तो भूरिशास्त्राभ्यासात्प्रज्ञातिशयाच्च जल्पन्तः। तत्त्वान्तं पारमार्थिकवस्तुस्वरूपस्य पारं। नैव गच्छन्ति प्रोक्तरूपाः पुमांसो नैव प्राप्नुवन्ति। अत्र दृष्टान्तमाह—तिलपीडकवत् तीलपीडकस्तैलिक वृषस्तद्वत्। गतौ गमने। यथा तिलपीडकवृषो गमनेऽन्तं न लभते तथा। यदुक्तम् "शास्त्राण्यधीत्य वादान् प्रतिवादाँश्चापि शोभनान् तन्वन्। तैलिकगौरिव गच्छन् सायं यावन्न याति तत्वान्तम्॥१॥ इति" ततो वादबुद्धिपाण्डित्यदर्पं परिहृत्य परमार्थग्राहिज्ञाने प्रचुरोद्यमो विधेय इत्यर्थः॥४॥

अथ ज्ञानस्योत्तमां प्रवृत्तिमाह—

**स्वद्रव्यगुणपर्यायचर्या वर्या पराऽन्यथा। इति दत्तात्मसंतुष्टिर्मुष्टिज्ञानस्थितिर्मुनेः॥ ५ ॥**

स्वद्रव्येति—हे आत्मन् त्वमेवंविधां ज्ञानस्थितिं कुरु। किंविधामित्याह—स्वद्रव्यगुणपर्यायचर्या स्व एव आत्मैव द्रव्यं च गुणश्च पर्यायश्चेति त्रयाणां द्वन्द्वः। द्वन्द्वादौ श्रूयमाणत्वात्स्वशब्दस्य प्रत्येकं संबन्धः। ततश्च स्वद्रव्यं सकलगुणपर्यायाधारत्वादसंख्यप्रदेशराशिरूपत्वादुत्पादव्ययध्रौव्ययुक्तत्वाच्चात्मैव द्रव्यं। स्वगुणः सहभाविज्ञानदर्शनचारित्रसन्दोहः। स्वपर्यायः क्रमभाविद्रव्यगुणाश्रितोऽर्थव्यञ्जनभेदभिन्नो धर्मसमूहविशेषः। तेषु तद्वती वा या चर्या प्रवृत्तिर्वर्तनेति यावत्। सा वर्या सर्वोत्तमा मुख्या वा भवति। परा परद्रव्यगुणपर्यायवती चर्या। अन्यथाऽनुत्तमाऽप्रधाना वा वर्तते। इतीत्थं पूर्वोक्तप्रकारेण स्वस्वरूपास्वादरूपेण। दत्तात्मसंतुष्टिर्दत्ता समुत्पादिता आत्मनि जीवे संतुष्टिः संतोषवृत्तिर्यया सा। मुष्टिज्ञानस्थितिर्मुष्टिमेयं संक्षेपरूपं वा कर्मशरीरे मुष्टिप्रहारतुल्यं यज्ज्ञानं तस्य स्थितिर्मर्यादा मुनेः साधोः ज्ञेयेत्यर्थः॥ ५ ॥

अथ त्रिभिः श्लोकैः प्रोक्तरूपं ज्ञानं स्तौति—

**अस्ति चेद्ग्रन्थिभिज्ज्ञानं किं चित्रैस्तंत्रयंत्रणैः । प्रदीपाः क्वोपयुज्यन्ते तमोघ्नी दृष्टिरेव चेत् ॥ ६ ॥**

अस्तीति—चेद्यदि योगीश्वरे । ग्रन्थिभिद्ज्ञानं ग्रन्थिं दुर्भेद्यकर्मजन्यनिबिडरागद्वेषमिथ्यात्वपरिणतिं भिनत्ति । विदारयति तादृशं यज्ज्ञानं बोधः । अस्ति प्राप्तं भवेत् । तदा चित्रैर्नानाविधैः । तंत्रयंत्रणैः शास्त्रबन्धनैस्तेषां रचनापाठकरणैः । किं प्रयोजनं ? न किमपी-त्यर्थः अत्र दृष्टान्तमाह—चेद्यदि । दृष्टिरेव नेत्रमेव । तमोघ्नी रात्र्याद्यन्धकारहंत्री भवेत् । तदा प्रदीपा दीपकश्रेण्या कृताः प्रकाशाः । क्व कुत्र । उपयुज्यन्ते विलोक्यन्तेऽपेक्ष्यन्त इति यावत् । न तैः कदाचित्प्रयोजनमित्यर्थः ॥ ६ ॥

ज्ञानवतो न कुतश्चिद्भीरित्याह—

**मिथ्यात्वशैलपक्षच्छिज्ज्ञानदंभोलिशोभितः । निर्भयः शक्रवद्योगी नन्दत्यानन्दनन्दने ॥ ७ ॥**

मिथ्यात्वेति—मिथ्यात्वशैलपक्षच्छिज्ज्ञानदंभोलिशोभितो मिथ्यात्वं वस्तुस्वरूपग्रहणे मतेर्विपर्यासहेतुःकर्म तदेव शैलोऽतिदुर्लंघ्यपर्व-तस्तस्य पक्षौ असद्भूतोद्भावनभूतनिह्नवपरिणामस्थानापन्नौ, तौ छिनत्ति समूलमुन्मूलयति ईदृग् यज्ज्ञानं सम्यग् बोधस्तदेव दंभोलिर्वज्रं तेन शोभितोऽलंकृतः । योगी शुभध्यानादिसमृद्धिमान् यतीन्द्रः । शक्रवत् सुरेन्द्रवत् । निर्भयो जरामरणादिसर्वभयरहितः । आनन्दन-न्दने स्वाभाविकपरमानन्दरूपनन्दनवने । नन्दति विलसति । इति ॥ ७ ॥

अथ ज्ञानमेव सर्वमद्भुतमपूर्वं चेत्याह—

**पीयूषमसमुद्रोत्थं रसायनमनौषधम् । अनन्यापेक्षमैश्वर्यं ज्ञानमाहुर्मनीषिणः ॥ ८ ॥**

नेन प्रसिद्धपीयूषवदनुत्पादितं ईदृशं पीयूषममृतं। आहुः वदन्ति। इत्येवं सर्वत्र क्रियापदं योजनीयं। तथाऽनौषधं औषधप्रयोगेणानिष्पन्नं। रसायनं धर्मशरीरसौन्दर्यपुष्टिवृद्धिकारकसिद्धताम्रजस्माद्यौषधरूपमाहुः। तथाऽनन्यापेक्षं नास्त्यन्येषां हस्त्यश्वरथधनादीनामपेक्षा संयोजना यत्र। अनन्याक्षेपमिति पाठान्तरकल्पने तु नास्ति अन्येभ्य आक्षेपः पराभवो यत्रेत्यपि संभवति तत्तथाविधं। ऐश्वर्यं महर्द्धिकस्वामित्वपदमाहुरिति ॥ ८ ॥

॥ इति ज्ञानाष्टकम् ॥ ५ ॥

## ॥ अथ शमाष्टकम् ॥ ६ ॥

पञ्चमेऽष्टके ज्ञानं दर्शितं, तत्तथारूपं सफलं शान्तपरिणतेर्भवतीत्यतः शमाष्टकमाह। तत्र तावच्छमलक्षणमाह—

**विकल्पविषयोत्तीर्णः स्वभावालंबनं सदा। ज्ञानस्य परिपाको यः स शमः परिकीर्तितः ॥ १ ॥**

विकल्पेति—हे ज्ञानोत्कंठ त्वमीदृक्शमवान् भव। यो वक्ष्यमाणलक्षणो ज्ञानस्य परिपाकः स शमो भवतीति संबन्धयोजना। किंविशिष्टो यः? विकल्पविषयोत्तीर्णः विकल्पाः शुभाशुभमनःसंकल्पप्रभेदास्तेषां यो विषयोऽभिलाषाज्ञानभ्रान्तिस्वभावादिरूपाश्रयस्तस्मादुत्तीर्णः परतीरं प्राप्तः सुदूरं गतः। तथा सदा सर्वकालं। स्वभावालंबनं स्वभावानामात्मीयधर्माणामालंबनमाश्रयो ग्रहणवृत्तिरिति यावत्। ज्ञानस्य बोधस्वभावस्य यः परिपाको नैपुण्यविशेषः। स उक्तरूपो ज्ञानपरिपाक एव। शमः शान्तभावोऽन्तरिन्द्रियदमनमयत्वात्। परिकीर्तितः प्रोक्तः सर्वज्ञैरर्हद्भिरिति ॥ १ ॥

अस्यैव कृत्यविशेषदर्शनपूर्विकां फलप्राप्तिमाह—

**अनिच्छन् कर्मवैषम्यं ब्रह्मांशेन समं जगत् । आत्माभेदेन यः पश्येदसौ शिवं गमी शमी ॥ २ ॥**

अनिच्छन्निति—हे शिष्य त्वमप्येवंविधः शमी भव । एवमिति किमित्याह—यः शमी । जगज्जीवेषु । कर्मवैषम्यं कर्मभिरष्टविधैर्ज्ञानावरणीयादिभिर्जातं यद्वैषम्यं विषमस्य भावो वैषम्यं हीनतोत्तमतारूपेण विसदृशत्वं विप्रकृत्रियवैश्यशूद्रैकद्वित्रिचतुःपञ्चेन्द्रियजातिभेदेन सुबुद्धिदुर्बुद्धिसधननिर्धनज्ञान्यज्ञान्यादिरूपभावभेदेन च तारतम्यरूपमिति यावत् । वर्तते तत् अनिच्छन् परकृतत्वाज्जीवेष्वगृह्णन् । आत्माभेदेनात्मस्वरूपादभिन्नेन स्वतुल्येन वा । ब्रह्मांशेन निर्विकारशुद्धचैतन्यसत्तारूपेण । जगत्त्रिभुवनोदरवर्तिप्राणिगणं । समं तुल्यरूपं । पश्येद्विलोकयेत् । असावुक्तलक्षणः शमी परिशुद्धनिपुणज्ञानी । शिवं गमी मुक्तिगमनयोग्योऽस्तीत्यर्थः॥२॥

बाह्यक्रियापि शमहेतुरस्त्यतः शमप्राप्तिं यावत्तस्यामादरो न त्याज्य इत्याह—

**आरुरुक्षुर्मुनिर्योगं श्रयेद्बाह्यक्रियामपि । योगारूढः शमादेव शुध्यत्यन्तर्गतक्रियः ॥ ३ ॥**

आरुरुक्षुरिति—योगं शमतारूपं परब्रह्मप्राप्त्युपायं । आरुरुक्षुरारोढुमिच्छुः । मुनिर्योगी । तदारोहणहेतुभूतां बाह्यक्रियामपि देवगुरुवंदनावश्यकप्रत्युपेक्षणाहारशुध्यादिकामपि । श्रयेत् सेवेत । तस्याः शमप्रकर्षप्राप्तावालंबनत्वात् । यो योगारूढो योगं शमताध्यानादिरूपपूर्णानन्दप्राप्त्युपायमारूढः परप्रकर्षं प्राप्तः सः । अन्तर्गतक्रियोऽन्तर्मनउपयोगमध्ये जीवस्वरूपाभ्यन्तरे च गता ज्ञानादिवैमल्यं प्राप्ता क्रिया प्रवृत्तिर्यस्य सोऽन्तर्गतक्रियो योगी । शमादेव ज्ञानादिप्रकर्षवच्छान्तस्वभावादेव । शुध्यति विगतकर्ममलनिजस्वरूपस्थसाद्यनन्तस्थितिमान सिद्धो भवति नत्वन्यबाह्यालम्बनाद्यपेक्षणात् ॥ ३ ॥

अथ शमप्राप्तौ दोषहानिं दर्शयन्नाह—

**ध्यानवृष्टेर्दयानद्याः शमपूरे प्रसर्पति। विकारतीरवृक्षाणां मूलादुन्मूलनं भवेत् ॥ ४ ॥**

ध्यानेति—ध्यानवृष्टेर्ध्यानं धर्म्यशुक्लरूपं मुहूर्तं यावदाज्ञादिष्वन्यतमे ध्येये मनस ऐकाग्र्यं तद्रूपा या वृष्टिरखण्डधारा तस्याः सकाशात्। दयानद्या दया कारुण्यभावनाऽवधवृत्तिरिति यावत्। सैव नदी गम्भीरा विस्तीर्णा च सरित् तस्याः। शमपूरे शान्तरसप्रवाहे। प्रसर्पति प्रकर्षेण वृद्धिं गच्छति सति। विकारतीरवृक्षाणां विकारा आत्मसंपद्वृद्धौ प्रतिकूलभूता मोहादयो दोषास्त एव तीरवृक्षा नदीकूलजाततरुगणास्तेषां। मूलात् सत्तातः। उन्मूलनमुत्पाटनं। भवेत्संपद्येतेति ॥ ४ ॥

अथ शमवतां गुणप्राप्तिप्रकर्षमाह—

**ज्ञानध्यानतपःशीलसम्यक्त्वसहितोऽप्यहो। तं नाप्नोति गुणं साधुर्यं प्राप्नोति शमान्वितः ॥ ५ ॥**

ज्ञानेति—अहो हे विनम्रचित्त। त्वमाश्चर्यं पश्य। किं तदित्याह—ज्ञानध्यानतपःशीलसम्यक्त्वसहितोऽपि ज्ञानं मतिश्रुतरूपं, ध्यानं पिण्डस्थपदस्थादिरूपं, तपोऽनशनाचाम्लादि, शीलं वनवासादिना स्त्रीसेवावर्जनरूपं ब्रह्मचर्यं वा सकलसाध्वाचाररूपं, सम्यक्त्वं शुद्धदेवगुरुजिनोक्ततत्त्वश्रद्धानरूपक्षायोपशमिकादिकं, तैः सहितोऽपि तत्प्राप्तियुक्तोऽपि। साधुर्मुनिः। तं वक्ष्यमाणस्वरूपं। गुणं प्रोक्तधर्मसमूहस्य फलं। न प्राप्नोति न लभते। तं कं? यं गुणं प्रभावामति यावत्। परेषामपि जातिवैराद्युपशामकं स्वस्यावधिमनःपर्यायकेवलज्ञानलाभं। शमान्वितः शान्तस्वभाववान् क्षानाद्यन्वितोऽनन्वितो वा। प्राप्नोति लभते। ज्ञानादिसाधनेभ्यः शमसाधनं बलवत्तरमित्यर्थः ॥ ५ ॥

अनन्यसाधारणगुणः समतावान्मुनिः केनाप्युपमेयो न भवतीत्याह—

**स्वयंभूरमणस्पर्द्धिवर्धिष्णुसमतारसः । मुनिर्येनोपमीयेत कोऽपि नासौ चराचरे ॥ ६ ॥**

स्वयंभूरमणेति—स्वयंभूरमणस्पर्द्धिवर्धिष्णुसमतारसः स्वयंभूरमणः सर्वान्तिमो जलधिः स च सर्वद्वीपसागरेभ्योऽपि विशालोऽगाधजलभृतोऽस्ति तं स्पर्द्धत इत्येवंशीलः स्वयंभूरमणस्पर्द्धी, तथा वर्धत इत्येवंशीलो वर्धिष्णुः तिरस्कारकरणेन साद्दश्येन वा स चासौ स च स्वयंभूरमणस्पर्धिवर्धिष्णुः एताद्दशः समतारसः समता सर्वत्र तुल्यवृत्तिस्तद्रूपो रसो रुचिप्रवाहो यस्य सः । मुनिः साधुः । येन देवेन्द्रादिना उपमेयमूलेन । उपमीयेत उपमापदं प्राप्येत सद्दशीक्रियेतेति यावत् । असौ ताद्दग् तन्मुनितुल्यपदार्थः । चराचरे स्थावरजंगमात्मके विश्वत्रये । कोऽपि कश्चिदपि । न विद्यते । तस्य सर्वदुःखापहारित्वादित्यर्थः ॥ ६ ॥

शमवतां रागादिकृता वेदनैव न भवतीत्याह—

**शमसूक्तसुधासिक्तं येषां नक्तंदिनं मनः । कदापि ते न दह्यन्ते रागोरगविषोर्मिभिः ॥ ७ ॥**

शमसूक्तेति—येषां योगिनां । मनोऽन्तःकरणं । नक्तंदिनमहोरात्रं । शमसूक्तसुधासिक्तं शमः सकलकषायत्यागाज्जातः शान्तपरिणामस्तस्य स्वरूपप्रतिपादकानि यानि सूक्तानि सर्वज्ञोक्तशास्त्रानुगतसुभाषितानि सुवचांसीति यावत् । तान्येव सुधा जीवस्याजरामरत्वकारिपीयूषं तया सिक्तमभिषिक्तं वर्तते । ते योगिनः । रागोरगविषोर्मिभिः रागो जीवस्य क्वचिद्वस्तुन्यभिष्वंगपरिणामः स एवोरगो भुजंगस्तस्य यद्विषं गरलं तस्मादुत्थिता ये ऊर्मयो विषकल्लोलतुल्यतृष्णातरंगास्तैः । कदापि कस्मिंश्चिदपि महाविपत्कालेऽपि । न दह्यन्ते न संक्लेश्यन्त इति ॥ ७ ॥

अथास्याष्टकस्योपसंहारेण स्वरूपदर्शनपूर्वकमाशीर्वाददानेन शमवतां साम्राज्यसंपदं स्तौति—

**गर्जज्ज्ञानगजोत्तुंगरंगध्ध्यानतुरंगमाः । जयन्ति मुनिराजस्य शमसाम्राज्यसंपदः ॥ ८ ॥**

गर्जदिति—मुनिराजस्य मुनिः शमवान् साधुः स एव राजा सर्वेषां चक्रवर्तिवन्मान्यः । यद्वा मुनीनां राजा मुनिराजस्तस्य । शमसाम्राज्यसंपदः शमः पूर्वोक्तस्वरूपः स एव सर्वोत्तमत्वात्सर्वैः सद्भिः प्रार्थनीयत्वाच्च साम्राज्यं सार्वभौमत्वं तत्संबन्धिन्यः संपद समृध्द्यः । जयन्ति सर्वोत्कृष्टतया वर्तन्ते । कथंभूतास्ताः? गर्जज्ज्ञानगजोत्तुंगरंगध्ध्यानतुरंगमाः गर्जन्तो मदोन्मत्तत्वेन गल्लगर्ज्जीं कुर्वाणा इव स्वाध्यायघोषेण गर्जन्तः स्वप्रकाश्यं प्रकाशयन्तो ज्ञानगजा ज्ञानरूपा हस्तिनस्तैरुत्तुंगा अत्युच्चतां प्राप्ताः । यद्वा उत्तुंगा अतिप्रधानाः, तथा रंगंतो हर्षेणोल्लसन्तो गतिवेगेन नृत्यमाना ध्यानतुरंगमा ध्यानानि शुभ्रधर्मशुक्लमयमनोभावनास्तान्येव तुरंगमा जात्याश्वा यासु ताः । काश्च ताः गर्जज्ज्ञानगजोत्तुङ्गरङ्गध्ध्यानतुरङ्गमाः शमसाम्राज्यसंपदो जयन्ति । अत्र ज्ञानस्य स्वाध्यायघोषात्मकत्वेन गजरूपता, ध्यानस्य च लयलीलातरंगायितत्वेन तुरंगरूपतेत्यर्थः ॥ ८ ॥

॥ इति शमाष्टकम् ॥ ६ ॥

## ॥ अथेन्द्रियजयाष्टकम् ॥ ७ ॥

अनन्तराष्टके शमः प्रोक्तः, स त्विन्द्रियजयाद्भवतीत्यतः सप्तमेऽष्टके इन्द्रियजयार्थमुपदिशति—

**बिभेषि यदि संसारान्मोक्षप्राप्तिं च कांक्षसि । तदेन्द्रियजयं कर्तुं स्फोरय स्फारपौरुषम् ॥ १ ॥**

बिभेषीति—हे शान्तात्मन् यदि जन्मादिदुःखस्वरूपे ज्ञाते सति त्वं संसाराज्जन्मजरामरणादिमहाकष्टपरिपूर्णचतुर्गतिभवभ्रमणरूपात्। बिभेषि भयं प्राप्नोषि। च पुनर्यदि मोक्षप्राप्तिं मोक्षः सकलक्लेशलेशवर्जितपरमसहजसुखमयी मुक्तिस्तस्य प्राप्तिर्लाभस्तां। काङ्क्षसि सत्वरमिच्छसि चेत्। तदा त्वमिन्द्रियजयमिन्द्रियाणि श्रोत्रादीनि तेषां जयः स्वस्वविषयाभिलाषप्रवृत्तिरोधनेन वशीकारस्तं। कर्तुं विधातुं। स्फारपौरुषं स्फारमतिप्रचुरं पौरुषं पुरुषस्यात्मन इदं कर्म वा पौरुषमात्मीयं महापराक्रमं। स्फोरय विस्तारय। यथेन्द्रियाणि त्वामुत्पथे नेतुं न शक्नुयुः तथा त्वमात्मपौरुषमंगीकुरु इत्यर्थः॥ १॥

अवशीकृतेन्द्रियगणस्यापायमाह—

**वृद्धास्तृष्णाजलापूर्णैरालवालैः किलेन्द्रियैः। मूर्छामतुच्छां यच्छन्ति विकारविषपादपाः॥ २॥**

वृद्धा इति—किलेत्यनुशये हे आत्मन् अयं महान् पश्चात्तापोऽस्ति। कोऽसावित्याह—तृष्णाजलापूर्णैस्तृष्णा विषयादिषु लौल्यं सैव जलं पानीयं तेनापूर्णैः सामस्त्येन भृतैः। इन्द्रियैरिन्द्रियरूपैः। आलवालैः पालीबद्धकेदारैः। वृद्धा वृद्धिं प्राप्ताः। विकारविषपादपा विकारा आत्मनः स्वभावत्यागादार्तरौद्रादिरूपाः सर्वेऽपि विभावपरिणामास्त एव विषपादपा विषवृक्षा धर्मजीवनापहारित्वात्। अतुच्छामतिगहनतरामनिवार्यामिति यावत्। मूर्छां चैतन्यविलुप्तमविवेकतामिति यावत्। यच्छन्ति जन्तून् प्रापयन्ति इति मे पश्चात्तापोऽतस्त्वमिन्द्रियगणजयं कुर्वित्यर्थः॥ २॥

अथ येऽतृप्तिस्वभाववतामिन्द्रियाणां तृप्तिप्राप्तये प्रौढोद्यमा भवन्ति ते मूर्खा एवेत्याह—

**सरित्सहस्रदुष्पूरसमुद्रोदरसोदरः। तृप्तिमान्नेन्द्रियग्रामो भव तृप्तोऽन्तरात्मना॥ ३॥**

**सरिदिति**—हे भद्रशील अयमिन्द्रियग्रामः पञ्चेन्द्रियसमूहः । सरित्सहस्रदुष्पूरसमुद्रोदरसोदरः सरितां नदीनां यत्सहस्रं सहस्रशः संख्या तेनापि दुष्पूरं पूरयितुमशक्यं यत्समुद्रस्य जलधेरुदरं महानगाधगर्तस्तस्य सोदरः समानः, त्रिभुवनगतसर्वसंपद्भरेणापि असंपूर्णाभिलाषत्वात् । तृप्तिमान् संपूर्णाखिलेच्छावान् । नैव भवति । अतस्त्वं तं मूर्खत्वलक्षणमिन्द्रियाभिलाषपूरणोद्यमं परिहृत्य । अन्तरात्मना योऽन्तर्निजसत्तामध्यवर्तिरत्नत्रयरूपगुणकदंबं स्वत्वेन विदंस्तत्रैव विलसन् शरीरेन्द्रियधनकुटुंबादीनां साक्षीभूत आत्मा, सोऽन्तरात्मा निजगुणास्वादविलासिपरिणामरूपस्तेन । तृप्तः पूर्णाभिलाषो भवति ॥ ३ ॥

अथेन्द्रियाणां नीचजातित्वं विज्ञाय तत्संगं स्वस्यापायहेतुं मत्वा तत्परिहारः कार्य इत्युपदिशति—

**आत्मानं विषयैः पाशैर्भववासपराङ्मुखम् । इन्द्रियाणि निबध्नन्ति मोहराजस्य किंकराः ॥ ४ ॥**

**आत्मानमिति**—हे अनुवर्त्तिन् मोहराजस्य मोहो मिथ्यात्वकषायविषयाभिलाषपरिणामफलदं मोहनीयकर्म स एव राजा सकलकर्मरूपप्रजानायकस्तस्य । किंकरा गृहकर्मकरा नीचदासाः । पाणीन्द्रियाणि श्रोत्रादीनि । भववासपराङ्मुखं भवो जन्मादिरूपक्लिष्टानेकदुःखभृतः संसारस्तस्मिन् यो वासः स्थितिरूपनिवासस्तस्मात् पराङ्मुखो निवृत्तभवपतनाभिलाषस्तं । आत्मानं जीवं । विषयैः शब्दादिरूपैः । पाशैर्नियंत्रणरज्जुभिः । निबध्नन्ति नितरां बन्धनैः संयमितांगं कुर्वन्ति । अत्रायं भावः—कर्माधीनो विषयाभिलाषस्तदाज्ञावशवर्तीनि चेन्द्रियाणीति नीचदासत्वं तान्येव जीवं विषयाभिलाषजनितपापकर्मरज्जुभिर्बध्ध्वा भवचारकनिक्षेपयोग्यं कुर्वन्तीत्यपायकारित्वमित्यर्थः ॥ ४ ॥

अथेन्द्रियमोहितानां विपरीतदर्शित्वं सद्धस्त्वन्धत्वं चाह—

**गिरिमृत्स्नां धनं पश्यन् धावतीन्द्रियमोहितः । अनादिनिधनं ज्ञानं धनं पार्श्वे न पश्यति ॥ ५ ॥**

गिरीति—हे शिष्य पश्य इन्द्रियमोहित इन्द्रियैः श्रोत्रादिभिर्मोहितस्तद्विषयसुखप्राप्तये व्याकुलहृदयत्वेनाविवेकत्वेन मूढो लोकः । गिरिमृत्स्नां गिरेः पर्वतस्य संबन्धिनीं मृत्स्नां मृत्तिकां । धनं पश्यन् स्वस्य निर्वाहकारिकांचनरत्नादिरूपवित्तं विलोकमानः । धावति स्वजनादीन् विमुच्य तदर्थं शीघ्रमेव वेगवत्या गत्याऽखंडप्रयाणैस्तल्लाभार्थं विदेशादिषु गच्छति । तथा तैर्मोहित एवानादिनिधनं न विद्येते आदिनिधने प्रथमान्तिमदिनरूपेणोत्पत्तिविनाशौ यस्य तदनाद्यनन्तस्थितिरूपं । ज्ञानं बोधस्वभावं तद्रूपं यद्धनमनन्तकालं यावन्निर्वाहकारिद्रव्यं पार्श्वे समीपस्थमपि । न पश्यति न विलोकयतीति ॥ ५ ॥

पुनस्ते कीदृशा भवन्तीत्याह—

**पुरः पुरः स्फुरत्तृष्णा मृगतृष्णानुकारिषु । इन्द्रियार्थेषु धावन्ति त्यक्त्वा ज्ञानामृतं जडाः ॥ ६ ॥**

पुरः पुर इति—जडा अप्राप्तबोधा मूर्खशेखराः । ज्ञानामृतं ज्ञानं मोक्षप्राप्तेर्मुख्यांगभूतं बोधकौशलं तदेवामृतं सकलाधामयहरणासमर्थं पीयूषं । त्यक्त्वा परिहृत्य । पुरः पुरः स्फुरत्तृष्णाः पुरः पुरोऽग्रेऽग्रे प्राप्तलाभतोऽधिकाधिकोत यावत् स्फुरन्ती विस्तारं गच्छन्ती जाग्रती वा तृष्णा लोभोदयपूरो येषां ते तथाविधाः सन्तः । मृगतृष्णानुकारिषु मृगतृष्णा ग्रीष्मर्तौ मध्याह्नेऽजलेऽपि जलपूरवद्दृश्यमाना रविकिरणसंतप्ता भूमेरुष्मता तामनुकुर्वन्ति भ्रान्तिकारित्वेनासत्त्वेन सदृशा भवान्त ये तेषु । इन्द्रियार्थेषु शब्दादिविषयेषु तन्निमित्तभूतेषु धनादिषु । धावन्ति रागातुराः सन्तो द्रुततरं गच्छन्तीत्यर्थः ॥ ६ ॥

अथैकस्यापीन्द्रियस्य विषयः प्रबलतां गतः सन् दुःखाय भवतीत्युपदिशति—

**पतंगभृंगमीनेभसारंगा यान्ति दुर्दशाम् । एकैकेन्द्रियदोषाच्चेद्दुष्टैस्तैः किं न पञ्चभिः ॥ ७ ॥**

पतंगेति । हे सौम्य चेद्यदि एकैकेन्द्रियदोषात् एकं चैकं चैकैकं यदिन्द्रियं चक्षुरादि तस्य दोषस्तद्ग्राह्यविषयकृतगाढासक्ति-रूपापराधस्तस्मात् । पतंगभृंगमीनेभसारंगाः पतंगाः शलभाः, भृंगा मधुकराः, मीना मत्स्याः, इभा हस्तिनः, सारंगा हरिणाः, तेषां द्वन्द्वसमासः । एते दुर्दशां प्राणहानिरूपदुःखावस्थां । यान्ति प्राप्नुवन्ति । तर्हि तैः प्रोक्तरूपैर्दुष्टैर्निर्दयतया सर्वभक्षणप्रवणैः पञ्चभिः पञ्चसंख्यैरिन्द्रियैः । वशीकृतजीवस्येति शेषः । किमिति किं नाम दुःखं न भवेदपि तु सर्वं भवेदित्यर्थः ॥ ७ ॥

अथेन्द्रियगणकृतानर्थदर्शनपुरःसरं जितेन्द्रियं स्तौति—

**विवेकद्विपहर्यक्षैः समाधिधनतस्करैः । इन्द्रियैर्न जितो योऽसौ धीराणां धुरि गण्यते ॥ ८ ॥**

विवेकेति—यो वक्ष्यमाणगुणः । असौ प्रत्यक्षविज्ञायमानो योगी । विवेकद्विपहर्यक्षैर्विवेकः स्वपरस्वरूपयोर्भेदज्ञानं स एव द्विपो गुणजातौ प्रधानत्वाद्गजेन्द्रस्तस्य विनाशे हर्यक्षैः सिंहसदृशैः तत्र तेषां स्फुरच्छौर्यत्वात् । समाधिधनतस्करैः समाधिर्मनोवाक्काय-योगस्वास्थ्यं स एव धनं सकलसुखकारणं वित्तं तस्य तस्करैश्चौररूपैः तस्य तेषामुपद्रवकारकत्वात् । इन्द्रियैः प्रोक्तरूपैः । न जितस्तेषां वशवर्ती न जातः । असौ योगी । धीराणां निष्प्रकंपस्थिरचित्तानां धुरि मुख्यः शिरोमणिः । गण्यते संख्यायते कीर्त्यत इति यावत् । यदुक्तम्—"धन्यास्ते ये विरक्ता गुरुवचनरतास्त्यक्तसंसारभोगा, योगाभ्यासे विलीना गिरिवनगहने यौवनं ये नयन्ति । तेभ्यो धन्या विशिष्टाः प्रबलवरवधूसंगपश्चाग्नियुक्ता, नैवाक्षौघे प्रमत्ताः परमनिजरसं तत्त्वभावं श्रयन्ति ॥ १ ॥" इति ॥ ८ ॥

॥ इतीन्द्रियजयाष्टकम् ॥ ७ ॥

## ॥ अथ त्यागाष्टकम् ॥ ८ ॥

सप्तमाष्टके इन्द्रियजय उक्तः, स तु त्यागिना कर्तुं शक्यत इत्यतोऽष्टमाष्टके त्यागमाह—

**संयमात्मा श्रये शुद्धोपयोगं पितरं निजम् । धृतिमंबा च पितरौ तन्मा विसृजतं ध्रुवम् ॥ १ ॥**

**संयमात्मेति**—संयमः स्वभावाभिमुखसकलविभावनिवृत्तिगतात्मपरिणामः स एव तद्रूपो वा य आत्मा जीव आत्मनस्तत्परिणामत्वात्कथंचिदभिन्नत्वात् स संयमात्मा । चिन्तयतीत्यध्याहार्यं । शुद्धोपयोगं शुद्धो मिथ्यात्वसंशयविपर्यासानध्यवसायादिदोषरहितो य उपयोगो भेदज्ञानपरिणतिस्तं । निजं स्वकीयं । पितरं सकलेष्टसंपादकं जनकं । श्रये भजे । तथा धृतिमात्मरतिरूपां स्थिरपरिणतिमंबां जीवशिशोः परिपालनकारिणीं मातरं श्रये । तत्तस्मात्सहजयोः सनातनरूपयोः पित्रोर्लाभात् । हे पितरौ हे लौकिकजनकजनन्यौ युवां । मां पुत्रत्वेन प्रतिपन्नं । ध्रुवं निश्चयेन । विसृजतं मम मुत्कलनं कुरुतं मुञ्चतमिति यावत्, युवयोरामृत्युकालं निर्वाहकत्वाभावात् तत्त्याग एव युक्त इत्यक्षरार्थः । भावार्थस्तु वक्ष्यमाणकथानकतोऽवसेयः । तथाहि—भरतक्षेत्रे मगधजनपदे सुवप्रानगर्यामरिदमनो न्यायविधौ कुशलो वज्रजंघो महीपतिः । तस्य धारिणी नाम प्रिया । तयोर्देवकुमार इव सुन्दरः सुभानुनामा कुमारः । स चानुक्रमेण विद्वत्पुरन्दरो लावण्यलीलावनं यौवनं प्राप्तोऽपि स्वभावेनैव जैनधर्मे जिनपूजने मुनिवन्दने च तत्परोऽभूत् । स सप्रमोदाभ्यां पितृभ्यां रूपलावण्यशीलकलिताः शतं राजकन्याः परिणायितः । ताभिः सार्धं विषयसुखं भुञ्जानस्तिष्ठति । तत्र चैकदा सुबहुभिः केवलिभिरनेकैर्विपुलमतिभिर्ऋजुमतिभिरवधिज्ञानिपूर्वधराचार्योपाध्यायतपोधननवदीक्षितादिसाधुसाध्वीदेवदेवी-

भिश्च परिवृतः श्रीसंभवनाथोऽर्हन् सर्वज्ञः सर्वदर्शी आकाशगतेन छत्रत्रयेण सपादपीठसिंहासनेन महेन्द्रध्वजेन धर्मचक्रेण च विभूषितः सितचामराभ्यां वीज्यमानो धर्मरूपेण विराजमानः पुरीपरिसरे समवसृतः । देवैः समवसरणं कृतं । भगवतो वन्दनाय नगरजनपरिषन्निर्गता । वनपालकेन भगवदागमनवार्तया कुमारो वर्धापयित्वा प्रोचे—"हे कुमार यस्य दर्शनं त्वं सदैवाभिलषसि स सर्वजगज्जीववत्सलः संभवनाथतीर्थेश्वरस्त्वत्पुण्ययोगेनात्र समवसृतः" । तदा स कुमारः स्त्रीशतेन परिवेष्टित आसीत् तेन ता भणिताः—"हे वल्लभाः शृणुत । मम तारको निर्ममो निरहंकारोऽकिंचनः सर्वज्ञः सर्वदर्शी जिनो वीतरागः शुद्धधर्मोपदेशकोऽत्रागतोऽस्ति । तद्वन्दनार्थं गच्छामि । यूयमप्यागच्छत" । इति भणित्वा पुलकितांग उत्थाय चलितो जिनवन्दनार्थं । मार्गेऽपि स्त्रीव्यूहमुद्दिश्य—"अहो निर्ममो मे भगवान्, अहोऽकिंचनो मे भगवान्, अहो अनीहो मे भगवान्, भो यदि यूयं सुखार्थिनस्तदा तं वन्दध्वं, भो अत्रागच्छत, युष्माकं सर्वसंशयच्छेदकं परमेश्वरं दर्शयिष्ये" । इति वदन् स्त्रीभिः सह वनं प्राप्तः । दृष्टभगवदतिशयो निजकान्ताः प्रति भणति स्म "हे भद्रकारिण्यः अस्ति कोऽप्येतादृशस्त्रिभुवनजनचमत्कारकारी सर्वदेवेन्द्रौघवन्द्यमानचरणपंकजः?" । एवं हर्षभरपूरितः संमुखं जिनं विलोक्य प्रफुल्लवदनकमलः पुनरप्युवाच—"अहो मे पुण्यांकुरोऽद्य फलं प्राप्तः । अहो मेऽवपुष्यद्य पीयूषघनवृष्टिरभूत्, यद्वीतरागदर्शनं जातं" । एवं स्वमभिनन्दन् यावत् पंचाभिगमपूर्वकं तीर्थकृच्चरणद्वन्द्वं वन्दित्वा स्तुवन्नास्ते, तावच्चारित्रमोहस्य क्षयोपशमेन जातविरतिपरिणामो भणति स्म—"हे नाथ अशरणशरणमहासार्थवाह भवसमुद्रनिर्यामक मह्यं सामायिकस्वरूपमुपदिश, येन कषायत्यागो भवेत्" । एवं प्रोक्ते भगवता सामायिकमुपदिष्टं । सोऽपि तच्छ्रुत्वा गृहीतव्रतः श्रमणो जातः । तावदेवायुःक्षये जाते मृतः स कुमारश्रमणः । तदाकर्ण्य तस्य जनको राजा सपरिच्छद आगतः । सुतं मृतं दृष्ट्वा

तौ मातापितरौ भृशं विलापं चक्रतुः । ततः स सुज्ञानुजीवदेवस्तद्वृत्तमवधिना ज्ञात्वा शीघ्रं समागत्य जिनचरणसमीपे विलपन्तौ तौ पितरौ प्रति जगाति स्म—"क एष दुःखज्वरो येन परमसुखदायकं जिनचरणं प्राप्तावपि युवां रोदनं कुरुथः ?" । ताभ्यां प्रोक्तं—"अस्माकं परमप्रियः पुत्रोऽयं व्यापन्नः । तद्वियोगज एष दुःखज्वर आवां पीडयति." ततः सुरेण गदितं—"हे राजन् कथय, किं भवतां तच्छरीरमिष्टं स जीवो वा ? यदि भवतां स जीव इष्टस्तदा सोऽहमेव, कुरुष्व मयि रागं । यदि तच्छरीरमिष्टं तर्हि तत्त्यक्तं कलेवरं, तेन रंजय मानसं । अनयोर्मध्ये कस्मिंस्त्वदीयं पुत्रत्वमस्ति येन वियुक्तो रोदिषि ?" राज्ञा प्रोक्तं—"अनयो-र्विषये सप्रेमोल्लासो न जायते" । देवेनोक्तं—"तर्हि प्रेमहेतुपुत्रादित्वमज्ञानमेवास्ति । तत्रावस्तुरूपे संबन्धे विकल्पे कथं मूर्छितौ युवां ?" इति देववचसा प्रतिबुद्धाः सर्वे प्रव्रज्यां प्रतिपन्नाः । इत्येवं सर्वोऽपि संबन्धो भ्रमरूपोऽस्ति, ततस्तत्त्याग एव श्रेयानित्यर्थः ॥ १ ॥

सर्वोऽपि संबन्धकल्पनाऽज्ञातात्मस्वरूपेऽस्तीत्याह—

**युष्माकं संगमोऽनादिर्बन्धवोऽनियतात्मनाम् । ध्रुवैकरूपान् शीलादिबन्धूनित्यधुना श्रये ॥ २ ॥**

युष्माकमिति-हे श्रेयःसाधक । युष्माकं भवतां । संगमः संबन्धः । अनादिः संतत्याऽनादिकालमारभ्य प्रवर्तते । सोऽनियतात्मनां न नियतोऽविनाशिसकलसंबन्धरहितचैतन्यमात्रोऽहमस्मि न कस्यापि पितृमातृसुतदुहितृभ्रातृभगिनीभार्यादि भवा-मीत्येवं स्वचित्ते निश्चितत्वेन नानुभवित आत्मा जीवस्वभावो यैस्तेषामिष्टो भवति न तु निश्चितात्मनां । यद्वा न नियतो न नियं-

त्रितो व्रतशीलध्यानाध्ययनादिधर्मेषु आत्मा चैतन्योपयोगो यैस्तेषां भवति, नियमितात्मनां न भवतीति शेषः । यद्वा अनियतात्मनामनियतोऽरिमित्राद्यनेकभावभाग् आत्मा येषां तेषां । तादृशां युष्माकं संबन्धोऽस्तीति योजना । इतीत्थंप्रकारेण ज्ञातज्ञेयत्वादवस्तुभूतान् संबन्धान् विमुच्येति योजनां कृत्वाऽग्रेऽर्थयोजना कार्या । अधुना संप्रति । ध्रुवैकरूपान् ध्रुवं निश्चलमपरावर्तनीयमिति यावत् एकं सर्वनानात्वपरिहारेण सर्वदा सर्वस्य हितदायित्वादनन्यात्मकं रूपं स्वरूपं येषां तान् । शीलादिबन्धून् शीलं ब्रह्मचर्यं सर्वसाध्वाचारव्यवहारो वा तदादि येषां । आदिपदात्सत्यसंतोषशमदमक्षान्त्यादयो ग्राह्याः । त एव बन्धवो विपन्निवारणसमर्था त्रातरस्तान् । श्रये भजे इति ॥ २ ॥

पूर्वोक्तबन्धूनेव व्यक्तीकरोति--

**कान्ता मे समतैवैका ज्ञातयो मे समक्रियाः । बाह्यवर्गमिति त्यक्त्वा धर्मसंन्यासवान् भवेत् ॥ ३ ॥**

**कान्ता इति**—मे मम । एकाऽन्यासां परिहारेणाद्वितीया । समतैव ममत्वत्यागात्सर्वत्र तुल्यपरिणतिरेव, न त्वन्या । कान्ताऽलौकिकप्रिया, तस्याः सदैवात्मोपभोगानुकूलस्वभावत्वात् । समक्रियाः समाना सर्वसावद्यव्यापारपरिहारेण स्वपरापायपरिहाररूपेण च तुल्या क्रिया साधुसमाचारो येषां ते समक्रियाः साधवो मे मम ज्ञातयः पितृपितामहादिवंशोद्भवा गोत्रिणः स्वजनाः, तैरेवाद्यपर्यन्तं समुपदिष्टसकलात्मैश्वर्यप्राप्त्युपायात् । इतीत्थं भावनाप्रकारेण । बाह्यवर्गं बाह्यानामनात्मीयपदार्थानां वर्गः समूहस्तं । त्यक्त्वा परिहृत्य । धर्मसंन्यासवान् धर्मो बाह्यसंबन्धत्यागरूपस्तस्य यः संन्यासः सम्यग् विधिनात्मनि स्थापनं सर्वविरतिस्वीकरणेन त्याग इति यावत् । स विद्यतेऽस्येति तथा । भवेत् स्यादिति ॥ ३ ॥

अथ पञ्चभिः श्लोकैरुत्तरोत्तरधर्मप्राप्त्या त्यागं विशेषयति—

**धर्मास्त्याज्याः सुसंगोत्थाः क्षायोपशमिका अपि । प्राप्य चन्दनगन्धाभं धर्मसंन्यासमुत्तमम् ॥ ४ ॥**

धर्मा इति—चन्दनगन्धाभं चन्दनः श्रीखंडतरुस्तस्य यो गन्धः परिमलस्तस्याभा इवाभा यस्य तं । उत्तममतिप्रधानं स्वाभाविकमिति यावत् । धर्मसंन्यासं धर्मः क्षायिकभावजो रत्नत्रयपरिणामस्तेन यः संन्यासस्त्यागविशेषस्तं । प्राप्य लब्ध्वा । सुसंगोत्थाः सुष्ठु शोभनो वा संगः सेवनापरिचयो देवगुरुधर्माराधनं तस्मादुत्थाः समुद्भवाः । क्षायोपशमिकाश्चारित्रमोहनीयादिकर्मणां विपाकोदयनिरोधरूपक्षयोपशमेन मिश्रभावेन जाता ये क्षायोपशमिकाः । धर्माः सम्यक्त्वज्ञानचारित्ररूपास्तेऽपि । त्याज्या योगिनां परिहार्या भवन्ति, तेषां किंचिदशुद्धत्वात् सादिसान्तभावेन जातत्वाच्चेत्यर्थः ॥ ४ ॥

**गुरुत्वं स्वस्य नोदेति शिक्षासात्म्येन यावता । आत्मतत्त्वप्रकाशेन तावत्सेव्यो गुरूत्तमः ॥ ५ ॥**

गुरुत्वमिति—यावता यावत्कालपर्यन्तं । स्वस्य स्वकीयस्यात्मनः । आत्मतत्त्वप्रकाशेनात्मनो जीवस्य यत्तत्त्वं परमार्थसदनारोपितस्वरूपं तस्य प्रकाशः स्पष्टता तेन । पुनः शिक्षासात्म्येन शिक्षा ग्रहणासेवनभेदेन द्विधा । तत्र ग्रहणशिक्षा व्रतधर्मषड्जीवनिकायादीनां स्वरूपपरिज्ञानरूपा । आसेवना तु तेषामेव परिपालनविधिरूपा तया सह सात्म्यं समान आत्मा स्वरूपं यस्य तस्य भावः सात्म्यमनन्यरूपाभेदभावो वा साम्यमिति पाठे तु गुरुशिक्षया सह तुल्यधर्मित्वं तेनाभेदपरिणामेन । गुरुत्वं ज्ञानित्वं । नोदेति नोच्छति सूर्योदयवत् । तावत्तावत्कालपर्यन्तं । गुरूत्तमो गुरुष्वाचार्यादिषूत्तमो ज्ञानक्रियासदेशनादिगुणैः प्रधानः । स सेव्यः सेवनीयोऽस्तु । तदुत्तरकालं तु स्वस्यैव गुरुत्वात् । नान्यगुर्वपेक्षेत्यर्थः ॥ ५ ॥

ज्ञानाचारादयोऽपीष्टाः शुद्धस्वस्वपदावधि । निर्विकल्पे पुनस्त्यागे न विकल्पो न वा क्रिया ॥६॥

ज्ञानाचारेति—ज्ञानाचारादयो ज्ञानस्यांगोपांगादिरूपश्रुतज्ञानस्याचारः कालविनयादिरूपोऽष्टविधस्तदाराधनप्रकारः, स आदिर्येषां । आदिपदाद्दर्शनाचारादयो ग्राह्याः । तेऽपि योगिनां शुद्धस्वस्वपदावधि शुद्धं पूर्णं निर्मलं वा स्वस्य स्वस्य यत्पदं केवलज्ञानादिरूपस्थानं तदेवावधिः संपूर्णशुद्धतारूपसीमा यस्मिन् कर्मणि यथा स्यात्तथा । इष्टास्तावदासेवनीयत्वेन संमताः । अत्रायं भावः—केवलज्ञानप्राप्तिं यावज्ज्ञानाचारः, क्षायिकसम्यक्त्वप्राप्तिं यावद्दर्शनाचारः, यथाख्यातचारित्रलाभं यावच्चारित्राचारः, सकलेच्छानिरोधशुक्लध्यानरूपतपःप्राप्तिं यावत्तपआचारः, अकरणवीर्यप्राप्तिं यावद्वीर्याचारः, इत्यादय इष्टाः तावत्परिपालनीयाः । तदुत्तरकाले तु ते सर्वे प्रदत्तस्वस्वसेवनफलाः स्वयमेव विनिवर्तन्ते, प्राप्ते सदने यानवत् । पुनर्भूयः । निर्विकल्पे निर्गता विकल्पास्तारतम्यरूपभेदाः प्रत्यक्षपरोक्षपौद्गलिकापौद्गलिकप्रमत्ताप्रमत्तसकषायनिःकषायसाभिलाषनिःस्पृहसकरणाकरणादयोऽनुक्रमेण ज्ञानादिषु प्रकारा यस्मादिति तस्मिन् । त्यागे विभावपरिहारे प्राप्ते सति । न विकल्पः पूर्वोक्तस्वरूपो विकल्पो न स्यात्, तत्र वस्तूनां स्वरूपस्य पूर्णत्वात् । वाशब्दः पक्षान्तरद्योतकः । क्रिया प्रत्युपेक्षणावश्यकादिरूपा न भवति, तस्याः समाप्तप्रयोजनत्वादिति ॥ ६ ॥

योगसंन्यासतस्त्यागी योगानप्यखिलांस्त्यजेत् । इत्येवं निर्गुणं ब्रह्म परोक्तमुपपद्यते ॥ ७ ॥

योगसंन्यासेति—यो मुनिर्योगसंन्यासतो योगा मनोवाक्कायव्यापारास्तेषां यः संन्यासो मूलतो निरोधस्वभावे स्थापनं तेषां व्यापाराभावप्रापणं सर्वात्मप्रदेशानां शुक्लध्यानतृतीयचतुर्थपादाभ्यां निःस्यन्दताकरणेनायोगीभवनमिति यावत् । तस्मात् योगत्यागेनात्मस्वरूपमात्रावस्थानतः । त्यागी समूलसकलहेयपरित्यागी । अखिलान् समस्तान् । योगान् मनोवाक्कायभेदान् । अपीति पूर्वोक्तामवस्थां प्राप्य । त्यजेत् आत्मनः पृथक्कुर्यात् । इतीत्यममुनोक्तप्रकारेण त्यक्तछाद्मस्थिकगुणो मुनिर्भवतीत्येवंप्रकारेण । परोक्तम् ॥७॥

**वस्तुतस्तु गुणैः पूर्णमनन्तैर्भासते स्वतः । रूपं त्यक्तात्मनः साधोर्निरभ्रस्य विधोरिव ॥ ८॥**

वस्तुत इति—त्यक्तात्मन इति त्यज्यते स्मेति त्यक्तः परिहृतः रागद्वेषमोहाद्यात्मको विभाव इत्यर्थः । त्यक्तसकलविभावश्चासावात्मा च त्यक्तात्मा तस्य ( त्यक्तः सकलविभावात्मकः आत्मा येन सः ) त्यक्तात्मनः साधोः प्राप्तकेवलज्ञानदर्शनस्य मुनेरित्यर्थः । आत्मेतिपदं मुक्तिपदं चात्रार्थवशात् प्राप्तं द्वयं तस्यात्मा कैवल्यावस्थायां मुक्तौ च छाद्मस्थिकैर्व्यावहारिकैश्च क्रमेण क्षायोपशमिकैर्ज्ञानादिभिः सत्वरजस्तमोभिर्गुणैः निर्गुणोऽपि स्ववृत्त्या मुक्तात्मा वा वस्तुतस्त्विति । तु शब्दोऽत्रापिशब्दार्थे, स योजित एव, प्रथमं वस्तुतः परमार्थतः आत्मवस्तुस्वभावतः स त्यक्तात्मा मुक्तावपि सांख्यादिभिर्निर्गुणत्वेन तत्र चानुमितत्वात् अतो मुक्तात्मेति ग्रहणं कृतं अनन्तैर्गुणैः पूर्णं रूपं भासत इति । न विद्यते अन्तो विनाशः पारः अवसानं वेति यावत् येषां ते अनन्ताः तैर्निरवधिकैर्गुणैः केवलज्ञानदर्शनादिभिः पूर्णं समग्रांशैर्भृतं न तु न्यूनं ईदृग्रूपं स्वभावरूपं भासते प्रकाशते शोभते इति यावत् अत्राहुः सांख्यादयः—ननु निस्तरंगमहोदधिकल्पे मुक्तात्मनि तरंगस्वभावानां ज्ञानादिगुणानां कथं संभवः स्यात् तथा संभवेऽपि मोक्षे समवायाभावात् तेन विना मुक्तात्मनः तैः सह कथं संबन्धो भवेत् न कथमपि । अत्र प्रतिविधीयते—स्वत इति स्वस्मादिति स्वतः स्वस्वरूपत एव तत्सिध्यति । इदमत्रोक्तं भवति-मुक्तात्मनां ज्ञानादिगुणमयं स्वरूपं स्वभावत एव भासते चेतनत्वात् चेतयति ज्ञानानीति व्युत्पत्त्या तस्य ज्ञानस्वरूपत्वं सिद्धमेव ज्ञानस्वरूपत्वादेव । अत्राहुः साङ्ख्याः—ननु निस्तरङ्गमहोदधिकल्पे मुक्तात्मनि सतरङ्गाणां ज्ञानादीनां कथं संभवः स्यात् भवस्थज्ञाने दृष्टसतरङ्गत्वात् । अत्रोच्यते—स्वत इति स्वस्माद्योऽनन्यः स स्वः तस्मात्स्वतः स्वत्वहेतुतो निस्तरङ्गत्वं मुक्तात्मज्ञाने सिद्धम् । अयमत्र भावार्थः—ये ज्ञानादिगुणाः ते आत्मैव स्वस्वभावत्वात् यश्च आत्मा सोऽपि ज्ञानाद्येव तेषामात्मस्व-

भावमयत्वात्। मुक्तत्वस्वभाववत्। ततो ज्ञानात्मनोर्द्वयोरपि स्वत्वमेव। तस्मात् स्वत्वहेतोः सिद्धं निस्तरङ्गत्वम् । तस्य हेतुपरत्वाभावादिति । यच्च हेतुत्वेनोक्तम् भवस्थज्ञाने दृष्टसतरङ्गत्वम् तदप्यविचारवत्त्वं सूचयति । यतो भवस्थज्ञाने सतरङ्गत्वम् तद्धि रागद्वेषेच्छामोहादिविभावकृतमस्ति न शुद्धज्ञानादिकृतं । शुद्धज्ञानादीनि तु वस्तुस्वभावबोधनैकस्वभावानि न वितर्कोत्पादकानि । वस्तुबोधस्तु तेषां केवलज्ञानोत्पत्तेराद्यसमये सर्वपदार्थराशेः सर्वोत्पादव्ययध्रौव्यादिका वर्तना भूतभवद्भाविसर्वकालिकी समग्रा विदिता भवति । सा च आद्यसमये जाता स्वभावविदिता तेषामागामिसर्वकालं तदवस्थज्ञाततैवावतिष्ठते न त्वपूर्वतया ज्ञातुं प्रवर्तत इति तर्हि का तरङ्गवार्तेत्यर्थः । वैशेषिकाः पुनरेवमाहुः—ननु भवविशेषगुणोच्छेद एव मोक्षः अतस्तत्र ज्ञानाभाव एव तर्हि कथमुक्तम् अनन्तैर्गुणैः पूर्णमिति तथा ज्ञाने सति समवायेनापि भवितव्यम् तेन विना ज्ञानात्मनोः सम्बन्धानुपपत्तेः । अत्रोच्यते—स्वत इति पुनरावर्तते । स्वत्वहेतुतो न तत्र ज्ञानादीनां समुच्छेदोऽस्ति । स्वतःपदस्य व्याख्या पूर्ववत्कार्या। ज्ञानस्य आत्मस्वरूपत्वे सति समुच्छेदानुपपत्तेः स्वरूपच्छेदे सति स्वप्नवत् अस्यात्मनोऽप्यभावापत्तेः कस्य मोक्षो वा कस्य न मोक्ष इति सर्वमसमंजसं स्यात् । ननु ज्ञानं तु विशेषगुणः । कथमात्मनः स्वरूपमिति चेच्छृणु—पुण्यादयो धर्मादयो गुणा अचेतनत्वेन जडाः बुद्ध्यादिरूपं ज्ञानमप्यशुद्धपौद्गलिकत्वात् स्वरूपमित्याकारकं न केवलं शुद्धात्मरूपम् ततस्तेषामुच्छेदोऽप्यविरुद्धः । आत्मा तु चेतनः केवलज्ञानादिशुद्धज्ञानं तस्य स्वरूपम् चेतति जानातीति चेतनः शुद्धज्ञानवानितिव्युत्पत्त्या शुद्धज्ञानस्वरूपात्मा सिद्धो मोक्षे चेतनत्वं तवापि सम्मतं इत्यनन्तैर्गुणैः रूपम् पूर्णमेवेति न सन्देहः । तच्च मुक्तात्मनः मुनेः स्वतः भासते कस्येव निरभ्रस्य घनघटाच्छादनवर्जितस्य विधोः विमलपूर्णचन्द्रमण्डलस्येवेत्यर्थः ॥८॥

॥ इति त्यागाष्टकम ॥ ८ ॥

## ॥ अथ क्रियागुणाष्टकम् ॥ ९ ॥

अथाष्टमाष्टके त्याग उक्तः, तं च क्रियावानेव प्राप्नोतीति नवमे क्रियागुणमाह—

**ज्ञानी क्रियापरः शान्तो भावितात्मा जितेन्द्रियः । स्वयं तीर्णो भवांभोधेः परं तारयितुं क्षमः ॥ १ ॥**

ज्ञानीति—हे आत्मन् यो ज्ञानी गुरुमुखाद्गृहीतशुद्धसर्वज्ञोक्तागमः । क्रियापरः क्रिया उभयकालावश्यकप्रत्युपेक्षणाहारशुद्ध्युग्रविहारादिकास्तासु परस्तत्परः सोद्यमः श्रेष्ठो वेति यावत् । शान्तस्त्यक्तविषयकषायसंगः । भावितात्मा भावितः सम्यक्त्वभावनाध्यानशुभाध्यवसायादिभिर्वासित आत्मा मानसिकोपयोगो येन सः । जितेन्द्रियो जितानि विषयेभ्यः परावर्त्य स्ववशे समानीतानि इन्द्रियाणि श्रोत्रादीनि येन सः । पूर्वोक्तसमग्रगुणयुक्तो मुनिः । भवांभोधेर्भव एवांभोधिः समुद्रस्तस्मात् । स्वयं स्वात्मना । तीर्णः पारं प्राप्तः । परमन्यं शरणागतम् । भव्यप्राणिनमपि । अयमेव तारयितुं भवाम्भोधेः परतीरं प्रापयितुं । क्षमः समर्थो भवेत् । अतस्त्वमप्येवं ज्ञानपूर्वकक्रियापरो भवेत्यर्थः ॥ १ ॥

अथ क्रियावर्जितज्ञानस्य कुत्सितत्वं दर्शयन्नाह—

**क्रियाविरहितं हंत ज्ञानमात्रमनर्थकम् । गतिं विना पथज्ञोऽपि नाप्नोति पुरमीप्सितम् ॥ २ ॥**

क्रियेति—हन्तेति कोमलामंत्रणे हे मृदुश्रद्धालो त्वं ज्ञानमात्रेण ‘ अहं धर्म्यस्मि ’ इति स्मयं मा गाः । कुत एवं ? यतः

---

१ वाटः पथश्च मार्गश्चेति त्रिकांडशेषः ।

क्रियाविरहितं क्रिया पूर्वदर्शिता तया विरहितं विशेषेणातिशयतो वर्जितं ज्ञानमात्रं ज्ञानमेवेति ज्ञानमात्रं 'अस्त्यात्मा, अस्ति धर्मः' इति संवेदनमात्रमेवेति यावत् । अनर्थकमसाधनत्वेन निष्फलमेव भवेत्, तस्य संवेदनमात्रकार्यकारित्वात्,' आरंभाद्यनिवर्तकत्वान्न मोक्षसाधकमिति । उक्तमर्थमर्थान्तरोपन्यासेन समर्थयति—पथज्ञोऽपि मार्गज्ञोऽपि जनः । गतिं विना गमनक्रियावर्जितः । ईप्सितं वाञ्छितं । पुरं नगरं । नाप्नोति न लभते । तद्वदिदमपि न मोक्षप्रापकं ॥ २ ॥

अथवा यो ज्ञानी स क्रियासु निरादरो न भवत्येवेत्याह—

**स्वानुकूलां क्रियां काले ज्ञानपूर्णोऽप्यपेक्षते । प्रदीपः स्वप्रकाशोऽपि तैलपूर्त्यादिकं यथा ॥ ३ ॥**

**स्वानुकूलामिति**—काले वर्तमानावसरे । ज्ञानपूर्णोऽपि ज्ञानेन केवलज्ञानाख्यबोधेन पूर्णः समग्रः सोऽपि केवल्यपि । स्वानुकूला स्वस्य केवल्यात्मनोऽनुकूलां समुचितां धर्मोपदेशविहारयोगनिरोधशैलेश्यगमनादिकां स्वयोग्यां क्रियां कर्तव्यात्मिकां । अपेक्षतेऽवलंबते । पूर्वोक्तक्रियां विना केवलिनामप्यवशिष्टानि कर्माणि न क्षीयन्ते, तर्हि छद्मस्थानां का वार्ता, ते तु तां सुतरां कुर्युरित्यपेरर्थः । दृष्टान्तमाह—यथा येन प्रकारेण । स्वप्रकाशोऽपि स्वेनात्मीयप्रकाशेनोद्योतेन प्रकाशते द्योतते, नापरं प्रकाशमपेक्षते इति यावत् । ईदृशः प्रदीपो ज्योतिरात्मा । तैलपूर्त्यादिकं तिलानां विकारस्तैलं स्नेहविशेषस्तस्य पूर्तिः पूरणं, सादिर्यस्य तत् । आदिपदाद्वर्तिशरावादयो ग्राह्याः, तत्सहकारितयाऽपेक्षते । तथैव ज्ञानमपि मोक्षसाधने सहकारिणीं क्रियामपेक्षत इत्यर्थः ॥ ३ ॥ 

अथ क्रियासु निरादरमनसां मूर्खत्वं व्यञ्जयन्नाह—

**बाह्यभावं पुरस्कृत्य ये क्रियाव्यवहारतः । वदने कवलक्षेपं विना ते तृप्तिकांक्षिणः ॥ ४ ॥**

बाह्येति—ये केचन पण्डितमानिनः । क्रियाव्यवहारतः क्रियासु पूर्वोक्तरूपासु यो व्यवहारो मुनीनां प्रवर्तनं तस्मात् । बाह्यभावं बाह्योऽनात्मीयपुण्यबन्धादिरूपो यो भावो देवसुखादिलाभस्तं । पुरस्कृत्य क्रियाफलमुख्यत्वेन प्ररूप्य तत्र निरादराः ' किं क्रियया ? ' इत्यादिवाक्यैस्तिरस्कुर्वन्तः सन्तो ज्ञानमात्रेण मोक्षमभिलषन्ति । ते पूर्वोक्ता यथार्थज्ञानविकलाः । वदने मुखे । कवलक्षेपं । वनाऽन्नादेर्ग्रासग्रहणमकृत्वैव । तृप्तिकांक्षिणः क्षुधोपशान्तिमाभिलषन्तीत्यर्थः ॥ ४ ॥

अथ श्लोकचतुष्टयेन क्रियागुणानाह—

**गुणवद्बहुमानादेर्नित्यस्मृत्या च सत्क्रिया । जातं न पातयेद्भावमजातं जनयेदपि ॥ ५ ॥**

गुणेति—हे साधो ! वक्ष्यमाणप्रकारेण क्रिया महोपकारिणी स्यात् । गुणवद्बहुमानादेर्गुणाः सम्यग्दर्शनज्ञानचारित्रादिश्रमणधर्मादयस्ते विद्यन्ते येषां ते गुणवन्तो महात्मानस्तेषां यो बहुमानः पूज्यबुद्धिपूर्वकाकृत्रिमप्रेमातिशयः, स आदिर्यस्य । आदिपदात्पश्चात्तापपापजुगुप्सातिचारालोचनदेवादिभक्त्युत्तरगुणश्रद्धादयो ग्राह्याः । तस्माद्धेतोः । च पुनः । नित्यस्मृत्या नित्यं निरन्तरं या स्मृतिर्गृहीतव्रतनियमादीनां स्मरणं तया हेतुभूतया । सत्क्रिया सती समीचीना सर्वज्ञोक्तत्वेन निरवद्येति यावत्, या क्रिया कर्तव्यता सा । जातं पूर्वनिष्पन्नं । भावं शुद्धाशयपरिणामं । न पातयेद्धीनतां न प्रापयेत् । अजातमलब्धमभिनवमपि भावं । जनयेत्समुत्पादयेत् । तत एवंगुणादा क्रिया कथं कर्तव्या न भवति ? अपि तु भवत्येव । यदुक्तं श्रीहरिभद्रसूरिणा विंशतिकानाम्नि ग्रन्थे—
“ तम्हा णिच्च सइए बहुमाणेणं च अहिगयगुणम्मि । पडिवक्खदुगंछाए परिणाइ आलोयणात्थं च ॥ १ ॥ तित्थंकरभत्तीए सुसाहुजणपज्जुवासणाए । उत्तरगुणसद्धाए इत्थ सया होइ जइयव्वं ॥ २ ॥ एवमसंतीविइ से जाइ जायाउ अ न पाडइ कइयावि ।

ता एवं बुद्धिमया अपमाउ होइ कायव्व ॥ ३ ॥ सुहपरिणामो णिच्चं चउसरणगमाइआयरं जीवो । कुसलपयडिउ बंधइ बद्धाउ सुहाणुबद्धाउ ॥ ४ ॥" इत्येवं क्रियागुणा ध्येया इत्यर्थः ॥ ५ ॥

**क्षायोपशमिके भावे या क्रिया क्रियते तया । पतितस्यापि तद्भावप्रवृद्धिर्जायते पुनः ॥ ६ ॥**

क्षायोपशमिक इति—क्षायोपशमिके उदयंगतानां कर्मणामनुभवनेन क्षपणमात्मप्रदेशेभ्यः पृथक्करणं क्षयः, उपशमश्चानुदितानां उदयं गतानां च कर्मणां विपाकतो रोधनं, क्षयश्च उपशमश्च क्षयोपशमौ ताभ्यां निष्पन्नः क्षायोपशमो नाम कोऽपि परिणामविशेषः स तु ज्ञानदर्शनावरणमोहान्तरायाणामेव भवति। तस्मिन् भवो निष्पन्नो यः स क्षायोपशमिकस्तस्मिन् । भावे सम्यक्त्वज्ञानचारित्रवीर्योल्लासरूपपरिणामे वर्तमानेन जीवेनेति शेषः । या देवगुरुवन्दनावश्यकादिका । क्रिया कर्मक्षपणार्थव्यापारः । क्रियते विधीयते । तया हेतुभूतया सत्या । पतितस्यापि कस्यचित्कथंचित् शुभपरिणामशिखरतोऽधोयातस्य स्खलितस्येति यावत् तस्यापि, किं पुनः प्रवर्धमानपरिणामस्य, तस्य त्वभिनवगुणवृद्धिः क्रियया स्यादेवेत्यपेरर्थः । पुनर्भूयोऽपि । तद्भावप्रवृद्धिः स एव पूर्वप्राप्त एव भावः सम्यक्त्वादिपरिणामस्तद्भावस्तस्य प्रकर्षवती पूर्वस्मात्प्रधानेत्यर्थः, वृद्धिः प्रवृद्धिः । जायते निष्पद्यते । यदुक्तं—" खाउगसमीगभावे दढजत्तकयं सुहअणुट्ठाणं । पाडिवयि अपि अहुज्जा पुणो वि तप्भाव वुड्ढिकरं ॥ १ ॥" ततो गुणावहा क्रिया हितैषिभिः करणीयेत्यर्थः ॥ ६ ॥

**गुणवृद्ध्यै ततः कुर्यात् क्रियामस्खलनाय वा । एकं तु संयमस्थानं जिनानामवतिष्ठते ॥ ७ ॥**

गुणेति—ततः पूर्वोक्तहेतुसमूहतो जीवस्याध्यवसायहानिवृद्धियुक्तत्वाच्च । गुणवृद्ध्यै गुणा ज्ञानादयस्तेषां या वृद्धिरपूर्वापूर्वशुद्धिप्रकर्षप्राप्तिस्तस्यै । वाऽथवा । तेषामेवास्खलनाय न स्खलनं पूर्वप्राप्तानां न पतनमस्खलनं तस्मै । मुमुक्षुरिति शेषः । क्रियां प्रोक्त-

रूपां । कुर्यात्समाचरेत् । तु पुनः । एकमद्वितीयमारोहावरोहाभावान्मोहादेः क्रियाच्च सदैवावस्थितैकप्रकारमिति यावत् । संयमस्थानं संयमाध्यवसायसन्निवेशे वसतिः । जिनानामेव केवलज्ञानभाजामेव, न त्वन्येषां । अवतिष्ठतेऽवस्थानं लभते । जिनानां सदैव निरन्तरानवच्छिन्नैकपरिणामधारा भवतीत्यतस्तेषां क्रियाप्रयोजनं नास्तीत्यर्थः ॥ ७ ॥

**वचोऽनुष्ठानतोऽसंगा क्रिया संगतिमंगति । सेयं ज्ञानक्रियाभेदभूमिरानन्दपिच्छला ॥ ८ ॥**

वच इति—वचोऽनुष्ठानतो वचः सर्वज्ञमुखारविन्दाद्विनिर्गतो वचनरूपतापन्नो जिनागमस्तस्यानुरोधेन यदनुष्ठानं तत्रोक्तक्रियायाः संपादनं तस्माद्धेतुतः । असंगा परालंबनसंगवर्जिता सहजस्वसंवेदनरूपा । क्रिया प्रवृत्तिः । संगतिं युक्तायुक्तयोग्यतां । अंगति लभते । सेयमसंगक्रिया वक्ष्यमाणरूपा । आनन्दपिच्छला परमानन्देन घना स्निग्धा च वर्तते । ज्ञानक्रियाभेदभूमिर्ज्ञानं च क्रिया च, तयोर्योऽभेदोऽभिन्नैकरूपता तद्रूपा भूमिरवस्था । सर्वत्र ज्ञानभावं परिणता प्रयत्नावचनालंबनं विनैव पूर्वाभ्यासातिशयात् स्वयं भाविनी ज्ञेयेति शेषः ॥ ८ ॥

॥ इति क्रियागुणाष्टकम् ॥ ९ ॥

## ॥ अथ तृप्त्यष्टकम् ॥ १० ॥

नवमाष्टके क्रिया प्रोक्ता, सा च लोके भोजनादिरूपाप्यस्ति, तया च केऽपि तृप्तिं मन्यन्ते, सा चात्यन्तिकी न भवतीत्यतो ज्ञानक्रियाजामात्यन्तिकीं तृप्तिं दर्शयन्नाह—

**पीत्वा ज्ञानामृतं भुक्त्वा क्रियासुरलताफलम् । साम्यतांबूलमास्वाद्य तृप्तिं याति परां मुनिः ॥ १ ॥**

पीत्वेति—मुनिर्ज्ञानक्रियावान् योगी। ज्ञानामृतं ज्ञानं स्वपरस्वरूपावभासकारिबोधस्तदेवामृतं सुधा तत्। पीत्वाऽनवच्छिन्नश्रवणमननिदिध्यासनधारया निपीय। क्रियासुरलताफलं क्रिया पूर्वोक्ता सैव सुरलता मनोऽभिमतसुखदा कल्पवृक्षशाखा तस्या यत्फलं स्वाभाविकानन्दादिप्राप्तिरूपं। भुक्त्वा विमलोपयोगदशनैः शनैश्चर्वणपूर्वकं सुधीजिह्वयास्वाद्य। साम्यतांबूलं साम्यं सर्वत्र तुल्यदृष्टित्वं तदेव तांबूलमात्मरूपानुरक्तत्वसुगन्धविभूषाकारिनागवल्लीदलं। आस्वाद्य साम्यतरंगितो भूत्वा तज्जन्यलीलामनुभूयेति यावत्। परां सर्वोत्कृष्टां तृप्तिं सर्वेच्छानिवृत्तिं। याति लभत इति ॥ १ ॥

अथैनामेव विशेषयन्नाह—

**स्वगुणैरेव तृप्तिश्चेदाकालमविनश्वरी। ज्ञानिनो विषयैः किं तैर्यैर्भवेत्तृप्तिरित्वरा ॥ २ ॥**

स्वगुणैरिति—चेद्यदि ज्ञानिनो यथार्थवस्तुस्वरूपवेदिनः। स्वगुणैः स्वस्यात्मनः स्वरूपभूता ये गुणा ज्ञानविरक्तिनिःस्पृहत्वादयो धर्मास्तैः। आकालं सर्वकालं यावत्। अविनश्वरी न विनश्यतीत्येवंशीला नित्यस्थायिनीति यावत्। तृप्तिरिच्छानिवृत्तिः। स्यात्तदा। तस्य यैरनन्तशो भुक्तैः सर्वजीवोच्छिष्टैरिति यावत्। इत्वरी गमनशीला अचिरस्थायिनी। तृप्तिरिच्छानिवृत्तिः। भवेज्जायेत। तैः पूर्वोक्तस्वरूपैः। विषयैः शब्दादिभोगैः किं? न किमपि प्रयोजनमिति ॥ २ ॥

अथ जिह्वेन्द्रियजये कृते सर्वेन्द्रियाणि जितानि भवन्तीति तद्विषयनिरासदर्शनपूर्वकं शान्तरसतृप्तिं स्तौति—

**या शान्तैकरसास्वादाद्भवेत्तृप्तिरतीन्द्रिया। सा न जिह्वेन्द्रियद्वारा षड्रसास्वादनादपि ॥ ३ ॥** 

या शान्तेति—हे क्रियोन्मुख या काप्यपूर्वा वक्तुमशक्या। शान्तैकरसास्वादात् शान्तः स्वभावानुयायिनिर्वेदस्थायिजीवपरिणाम-

स्तस्यैकस्य रसान्तरसंयोगवर्जितस्य, न तु घृतसितोपलादिवत् संयोजितस्य, रसस्य आस्वादस्तदनुभवप्रेमसंक्रमस्तस्मात् । अतोन्द्रिया-ऽतिक्रान्तेन्द्रियानुभवा रसनेन्द्रियादिभिर्ज्ञातुमशक्या, तैरप्राप्येति यावत् । तृप्तिर्निष्कामवृत्तिः । भवेत्स्यात् । सा पूर्वोक्ताऽतीन्द्रिया शान्तरसास्वादजा तृप्तिः । जिह्वेन्द्रियद्वारा जिह्वा रसना सैवेन्द्रियं करणं तद्रूपं द्वारमुपायो मुखं वा तेन । षड्रसास्वादनादपि षड्भिः संख्येया ये रसास्तिक्तकटुकषायाम्लमधुरलवणास्तेषां यदास्वादनं चर्वणं तस्मादपि । न स्यात् । एकरसास्वादात्तु क्व भवेदित्यपेरर्थः । तस्यास्तैरनुत्पाद्यस्वभावत्वात् । इति ॥ ३ ॥

अथ सांसारिकी तृप्तिर्भ्रान्तिरूपा तदन्या तु सत्येत्याह—

**संसारे स्वप्नवन्मिथ्या तृप्तिः स्यादाभिमानिकी । तथ्या तु भ्रान्तिशून्यस्य सात्मवीर्यविपाककृत् ॥४॥**

संसार इति—संसारे कर्मोदयजन्यजन्मादिरूपभवे । आभिमानिकी मोहोदयसंमिश्रिताहंताज्ञानमभिमानस्तस्येयमाभिमा-निकी मनःकल्पनयाऽसत्यपि सतीव मता भ्रान्तिमात्रेत्यर्थः । तृप्तिः किंचित्कालस्थायिन्यभिलाषशान्तिः । स्वप्नवत् रात्रौ स्वप्ने महा-राज्यादिप्राप्तिदर्शनतुल्या । मिथ्याऽसती भ्रान्तिरूपा । स्याज्जायेत । तु पुनः । तथ्या यथार्था सत्या स्वाभाविकी । आत्मवीर्यवि-पाककृत् आत्मवीर्यं सहजजीवशक्त्युल्लासस्तस्य विपाको विशिष्टवृद्धिस्तं करोति या । सा पूर्वोक्तरूपा तथ्या सत्या तृप्तिरभिलाष-शान्तिः । भ्रान्तिशून्यस्य भ्रान्तिर्भ्रमस्तया शून्यो रहितः सज्ज्ञानोपयुक्त इति यावत् । तस्य भवतीत्यर्थः ॥ ४ ॥

अथ सजातीयः सजातीयेन तृप्तिं लभत इत्याह—

**पुद्गलैः पुद्गलास्तृप्तिं यान्त्यात्मा पुनरात्मना । परतृप्तिसमारोपो ज्ञानिनस्तन्न युज्यते ॥ ५ ॥**

 

पुद्गलैरिति—हे साधुशीले पुद्गलैराहारवस्त्रालंकारपञ्चविषयादिरूपं प्राप्तैः पदार्थैः । पुद्गला देहेन्द्रियमनआदिपुद्गलजन्याः पदार्थाः । तृप्तिमिच्छापूर्तिं । यान्ति प्राप्नुवन्ति, उपचयानुपचयादिभिः समानस्वभावत्वात् । पुनरात्मा जीवस्तु । आत्मना स्वधर्मेणानिच्छादिस्वभावेनैव तृप्तो भवति, न पुद्गलैः शब्दादिविषयैः तयोर्विलक्षणधर्मत्वात् सामर्थ्याभावाच्च । तत्तस्मादुक्तकारणतः । ज्ञानिनो ज्ञातवस्तुस्वभावस्य । परतृप्तिसमारोपः परेणान्येन कृताऽन्यस्य तृप्तिः परतृप्तिस्तद्रूपो यः समारोप उपचारकल्पनयाऽसत्यपि सतीत्युपयोगः । स न युज्यते युक्तियुक्तो न दृश्यते । विधर्मे यत् सुखित्वं स बुद्धेर्विपर्यासः । यदुक्तं—"तवइ तवं चरइ चरणं सुअं पि नव पुव्व जाव अप्पसइ । जा परसुहे सुहत्तं ता नो सम्मत्त विन्नाणं ॥ १ ॥" इति ॥ ५ ॥

अथ ये परोपभोगतृप्तास्ते सत्यां तृप्तिं न जानन्तीत्याह—

**मधुराज्यमहाशाकाग्राह्ये बाह्ये च गोरसात् । परब्रह्मणि तृप्तिर्या जनास्तां जानतेऽपि न ॥ ६ ॥**

मधुराज्येति—भोः क्रियापर । मधुराज्यमहाशाकाग्राह्ये मधुरं मिष्टरसोपेतं यदाज्यं घृतं, तथा महान्ति प्रधानानि शाकानि तिक्ताम्लरसादिसंस्कृतानि पत्रपुष्पफलात्मकानि व्यञ्जनानि तैर्यदग्राह्यं तदास्वादनैरननुमेयस्वरूपं । यद्वा मधु मनोहरं यद्राज्यं राजोचितभोगसाधनं तस्मिन्महती आशा येषां ते मधुराज्यशाकाः । शैषिके कपि केऽण इति ह्रस्वे प्राप्ते आपोऽन्यतरस्यामिति न ह्रस्वः । महाशावशवर्तिनो ये भोगलुब्धा जीवास्तैरग्राह्यमकलनीयस्वरूपं तस्मिन् । गोरसात् गोरसो गीतनृत्यस्तुतिरूपवाणीरसस्तस्मात् । बाह्ये वाचामगोचरस्वरूपे । यद्वा गोरसाद्दुग्धादेरिन्द्रियविषयरसाद्वा बाह्ये निवृत्ते । परब्रह्मणि परं सर्वप्रधानं यद्ब्रह्म सकलविकारवर्जितानन्तविज्ञानघनशुद्धचैतन्यं तस्मिन् । याऽपूर्वा वाचामगोचरा । तृप्तिः सकलेच्छानिवृत्तिः । तां प्रोक्तरूपां । जना विवेकविकलाः पुरुषाः । न जानतेऽपि न जानन्त्यपि । ॥२४॥

अहो महदाश्चर्यं तत्प्राप्त्यभिलाषोद्यमास्तु दूरे सन्तु, परं तस्या ज्ञातारोऽपि ते न सन्तीत्यपेरर्थः । यद्वा पूर्वोक्तविशेषणविशिष्टे । अ-बाह्ये । आत्मीयस्वरूपे परब्रह्मणि स्थितां पूर्वोक्तप्रकारां तृप्तिं जना गोरसात् इंद्रियविषयास्वादात् न जानन्ति तस्या इन्द्रियाग्राह्यत्वात् ॥६॥

अथ पुद्गलभोगतृष्णातुराणां विषोद्गारसदृशी दुर्गतिर्भवति ज्ञानास्वादतृप्तानां सुधोद्गारतुल्यं ध्यानं सद्गतिश्च स्यादित्याह—

**विषयोर्मिविषोद्गारः स्यादतृप्तस्य पुद्गलैः । ज्ञानतृप्तस्य तु ध्यानसुधोद्गारपरंपरा ॥ ७ ॥**

विषयेति—पुद्गलैः शब्दरूपगन्धरसस्पर्शत्वेन परिणतैः परमाणुस्कन्धैः । अतृप्तस्य तद्भोगे तृष्णातुरस्य । विषयोर्मिविषोद्गारो विषयाः शब्दादयो भोगास्तेषां तैः कृता वा ये ऊर्मय इवोर्मयो मनोरथतरंगास्त एव विषविशेषास्तेषां य उद्गार उद्वमनं दुःखफलमय-दुर्गतिपरंपरेत्युपलक्षणात् । स्याद्भवेत् । तु पुनः । ज्ञानतृप्तस्य ज्ञानं यथार्थस्वरूपबोधस्तेन तृप्तस्य पूर्णाभिलाषस्य । ध्यानसुधोद्गारपरंपरा ध्यानं धर्मशुक्लरूपं तदेव सुधाऽमृतं तस्या य उद्गाराः सुखमयसद्गत्यादिकफलप्राप्तिरूपोद्वमनानि तेषां या परंपरा श्रेणिः सुखोपरि सुख-संततिरिति यावत् । स्यादिति ॥ ७ ॥

**सुखिनो विषयातृप्ता नेन्द्रोपेन्द्रादयोऽप्यहो । भिक्षुरेकः सुखी लोके ज्ञानतृप्तो निरञ्जनः ॥ ८ ॥**

सुखिन इति—अहो चित्तचमत्कृतिकारणं । विषयातृप्ता विषयेषु शब्दादिभोगेष्वतृप्ता अनिवृत्तभोगाभिलाषास्तृष्णातुरा इति यावत् । इन्द्रोपेन्द्रादय इन्द्राः सुरपतयः, उपेन्द्राश्चक्रवर्तिवासुदेवादिराजानस्ते आदयो येषां । आदिपदात्सामान्यर्द्धिमद्देवमनुष्या ग्राह्याः । तेऽपि सुखिनः सुखभाजो न सन्ति, बहुव्याक्षेपव्याकुलितहृदयत्वात् । तर्हीतरेषां का वार्तेत्यपेरर्थः । लोके दैवमानुषजन्मनि ।

ज्ञानतृप्तो ज्ञानं स्वपरधर्मविज्ञप्तिस्तेन तृप्तो निवृत्तसकलाभिलाषः । निरञ्जन इष्टानिष्टसंकल्पप्रतिबन्धरूपाञ्जनरहितः । ईदृश एकोऽद्वितीयः । भिक्षुर्मुनिः । सुखी पूर्णानन्दविलास्यस्ति । इति ॥ ८ ॥

॥ इति तृप्त्यष्टकम् ॥ १० ॥

## ॥ अथ निर्लेपाष्टकम् ॥ ११ ॥

दशमाष्टके तृप्त उक्तः, स तु निर्लेपो भवितुमर्हतीत्यत एकादशेऽष्टके निर्लेपत्वं दर्शयन्नाह—

**संसारे निवसन् स्वार्थसज्जः कज्जलवेश्मनि । लिप्यते निखिलो लोको ज्ञानसिद्धो न लिप्यते ॥ १ ॥**

संसार इति—स्वार्थसज्जः स्वस्य देहधनकुटुंबादिममत्वभावस्यार्थः प्रयोजनं लाभ इति यावत् । तस्मिन् सज्जः संनद्धस्तत्पर इत्यर्थः । एवंविधो निखिलः समस्तोऽपि । लोकः प्राणिगणः । कज्जलवेश्मनि कज्जलमञ्जनं मषीति प्रसिद्धं, तन्मयं यद्वेश्म गृहं तस्मिन् तद्रूप इत्यर्थः । संसारे भववासे । निवसन् वसतिं कुर्वाणः । लिप्यते पापकर्मरजसाऽवगुंठ्यते । ज्ञानसिद्धो निष्पन्नज्ञानो मुनिस्तु । न लिप्यते कर्मधूल्या नावगुंठ्यते । प्रहतबहिराशबन्धहेतुत्वान्न बध्यत इत्यर्थः ॥ १ ॥

कथंभूतो ज्ञानी न लिप्यत इति शुद्धद्रव्यास्तिकेन नयेनाह—



**नाहं पुद्गलभावानां कर्ता कारयिता च न । नानुमंतापि चेत्यात्मज्ञानवान् लिप्यते कथम् ॥ २ ॥**

नाहमिति—पुद्गलभावानां पुद्गलाः परमाणवस्तैर्जाता ये भावा देहकर्मविषयपञ्चकगतिजात्याकारयोगादयस्तेषां । कर्ता स्वा-

तंत्र्येण निष्पादकः । अहं चेतनावान् शुद्धात्मा न भवामि तेषां परभावत्वात्, सर्वमपि वस्तु स्वभावे कर्तृत्वादिमदस्ति, इतरथा त्वतिप्रसंगात् सिद्धादीनामपि परभावकर्तृत्वापत्तिः।तथा तेषां कारयिता परेभ्यो निष्पादयितापि च न । तथा तेषामनुमन्ता तद्गुणानुयायिपक्षपात्यपि च न भवामि, परस्वभावत्वेन भवनरूपस्वपरिणमनशक्तेरभावात् । इतीत्थं पूर्वोक्तप्रकारेण। आत्मज्ञानवान् स्वस्वरूपवक्ता। कथं केन प्रकारेण । लिप्यते कर्मरेणुनाऽवगुंठ्यते ? न केनापि बन्धहेतुः परत्रेष्टानिष्टत्वप्रतिबन्धविरहितत्वादित्यर्थः ॥ २ ॥

तत्राप्यबन्धभवने को हेतुरित्याशंक्याह—

**लिप्यते पुद्गलस्कन्धो न लिप्ये पुद्गलैरहम् । चित्रव्योमाञ्जनेनेव ध्यायन्निति न लिप्यते ॥ ३ ॥**

लिप्यत इति—पुद्गलैः कार्मणादिवर्गणात्वेन परिणतैः परमाणुप्रचयैः । पुद्गलस्कन्धः कार्मणदेहादिरूपपुद्गलानां यः स्कन्धो राशिर्लिंगशरीरमिति लोके । स लिप्यते बध्यते । तस्मिन्नेव तैः कृतोपचयो भवति न त्वात्मनीत्यर्थः । अहं मल्लक्षण आत्मा । न लिप्ये न तैर्विमिश्रो भवामि भिन्नसत्तास्वभावत्वात् । किमिव ? यथा चित्रव्योमाञ्जनेन चित्रो विविधवर्णविच्छित्तिभिरालेखः तद्- द्व्योम गगनं तत् चित्रव्योम, अञ्जनेन श्यामवर्णपदार्थेनोपलक्षणात्पञ्चवर्णैरपि कृतो न भवति, तद्वन्ममात्मशुद्धसत्तायां कर्मालेखो नास्ति, चैतन्यमचैतन्यमिश्रं न स्यादिति । इति पूर्वोक्तप्रकारेण ध्यायंश्चिन्तयन् । न लिप्यते कर्मरेणुना न संश्लिष्यते, स्वस्वभावानुयायिपरिणामपरिणतत्वादित्यर्थः ॥ ३ ॥

अथ शिक्षामुपदिशति—

**लिप्तताज्ञानसंपातप्रतिघाताय केवलम् । निर्लेपज्ञानमग्नस्य क्रिया सर्वोपयुज्यते ॥ ४ ॥**

लिप्ततेति—लिप्तताज्ञानसंपातप्रतिघाताय लिप्तः कर्मपुद्गलनिकरैः सह संमिलितस्तस्य भावः कर्म वा लिप्तता तस्या यज्ज्ञानं कर्मणा बद्धोऽस्मीति व्यावहारिकसंकल्पाच्छेदनं, तेन यः संपातः संकल्पोदयमुखेन जीवोपयोगे संपतनं, तस्य यः प्रतिघातो निवारणं तस्मै लिप्तताज्ञानसंपातप्रतिघाताय । केवलं निश्चितशुद्धं चैकमेवेति यावत् । निर्लेपज्ञानमग्नस्य निर्लेपेन निर्बन्धात्मेति भावेन यज्ज्ञानं प्रतिभासस्तत्र यो मग्नः संलीनचित्तस्तस्य । सर्वा समग्रा । क्रिया चेष्टनं शिक्षा वा । उपयुज्यते उप सादृश्यभावेन युज्यते, तद्विघातयोगे प्रवर्तते, सर्वनयसंमतेन तु बद्धोऽस्त्येवेत्यर्थः ॥ ४ ॥

निर्लेपात्मसंपादनाय क्रियावद्भिर्मदत्यागो विधेय इत्याह—

**तपःश्रुतादिना मत्तः क्रियावानपि लिप्यते । भावनाज्ञानसंपन्नो निःक्रियोऽपि न लिप्यते ॥ ५ ॥**

तप इति—भो भद्र यः तपःश्रुतादिना तपोऽनशनादि बाह्याभ्यन्तरभेदभिन्नं द्वादशविधं कर्मवनदहनधर्मात्मकं, श्रुतं शास्त्रज्ञानं, ते आदिनी यस्य । आदिशब्दाज्जातिकुलादयो ग्राह्याः । तेन मत्तस्तत्तन्मदेनाभिमानी । स क्रियावानपि संयमक्रियायां सोद्यमोऽपि । लिप्यते पापकर्मणा श्लिष्यते । भावनाज्ञानसंपन्नो भावयति वासयति सद्धर्मस्वस्वभावरुचिवृद्ध्यौ पुनः पुनः परिणमयत्यात्मानमिति भावना, तद्रूपं यज्ज्ञानं तेन संपन्नः पूर्णः । स निष्क्रियोऽपि आवश्यकादिक्रियया वर्जितोऽपि सन् । न लिप्यते कर्मणा न बध्यते । यदुक्तं सूत्रकृदंगे—" न कम्मुणा कम्म खवंति बाला अकम्मुणा कम्म खवंति वीरा । मेहाविणो लोभभयावतीता संतोसिणो नो पकरंति पावं ॥ १ ॥ जहा कुम्मोसअंगाइं सए देहे समाहरे । एवं पावाइं मेहावी अकप्पेणं समाहरे ॥ २॥ " इति ॥५॥

अथ लिप्तालिप्तत्वं नयविभागेन दर्शयन्नाह—

**अलिप्तो निश्चयेनात्मा लिप्तश्च व्यवहारतः । शुद्धयत्यलिप्तया ज्ञानी क्रियावान् लिप्तया दृशा ॥ ६ ॥**

अलिप्त इति—आत्मा चैतन्यस्वरूपो जीवो निश्चयेन निश्चयनयदृष्ट्या शुद्धद्रव्यार्थिकेनेति यावत् । अलिप्तः कर्मरेणुसंसर्गवर्जितः । स ह्यनुत्पन्नाविनष्टस्थिरैकस्वरूपकर्तृभोक्तृत्ववर्जितमात्मानं मन्यते ततोऽलिप्त इति प्रोक्तः । व्यवहारतस्तु पर्यायार्थिकनयतस्तु । लिप्तः कर्मरेणुना संश्लिष्टोऽस्ति । स उत्पादव्ययमेव वस्तु भवतीति प्रमाणयन् शुद्धाशुद्धतया विवेचयतीत्यतो बद्ध इति मन्यत इत्यर्थः । ततो ज्ञानी ज्ञानयोगी । अलिप्तया न लिप्ताऽलिप्ता शुद्धनिरञ्जन एवात्मेत्येवंदर्शनकारिणी या दृग् तया, शुद्धस्वरूपं ध्यायन्निति यावत् । शुध्यति निर्बन्धकर्ममलवर्जितो भवति । निरुद्धरागादिबन्धहेतुत्वात् । क्रियावान तपश्चावश्यकादिषु क्रियासु प्रवर्तमानस्तु । लिप्तयाऽनादिप्रवाहिककर्ममलेन लिप्तोऽस्मि ततस्तस्माद्विमलः स्यामित्येवं दर्शनात्मिकया । दृशा दृष्ट्या । शुध्यति महामदमोहादिदोषनिरोधाद्विमलो भवति । बृहद्दोषनिवृत्तौ क्रियाया एव साधनत्वात्, ज्ञानस्य सूक्ष्मदोषविषयत्वाच्चेत्यर्थः ॥ ६ ॥

जीवस्य ज्ञानक्रिययोर्लाभो युगपद्भवतीत्याह—

**ज्ञानक्रियासमावेशः सहैवोन्मीलने द्वयोः । भूमिकाभेदतस्त्वत्र भवेदेकैकमुख्यता ॥ ७ ॥**

ज्ञानक्रियेति—द्वयोर्ज्ञानक्रियादृशोः । उन्मीलने उद्घाटने प्रादुर्भाव इति यावत् । ज्ञानक्रियासमावेशो ज्ञानं च क्रिया च तयोर्यः समावेश एकीभावः । सहैव युगपदेव । भवतीति शेषः । न तु कालभेदेन । यतो ज्ञानक्रियारुची सर्वथा भेदेन न

भवतः, किं त्वत्र सम्यग्दृष्टिजीवे । भूमिकाभेदतो भूमिका देशसर्वविरतिप्रमत्ताप्रमत्तसरागवीतरागत्वादिकाः संयमवतामवस्थास्तासां यो भेदः कालबोधगुणादिकृता भिन्नता तस्मात् । एकैकमुख्यता एकस्यैकस्येति एकैकस्य क्वचित्क्रियायाः क्वचिज्ज्ञानस्य मुख्यता प्राधान्यं । भवेदिति ॥ ७ ॥

अथाक्षिप्तस्य स्तुतिद्वारेणोपसंहरति—

**सज्ज्ञानं यदनुष्ठानं न लिप्तं दोषपंकतः । शुद्धबुद्धस्वभावाय तस्मै भगवते नमः ॥ ८ ॥**

**सज्ज्ञानमिति**—सज्ज्ञानं ज्ञानपूर्वकं । यस्य महात्मनोऽनुष्ठानं व्रतपालनी क्रिया । दोषपंकतो दोषा इहपरलोकाशंसा मिथ्यात्वविषयकषायादयस्तद्रूपो यः पंकः कर्दमादिरूपमलस्तस्मात् । न लिप्तं न दिग्धं । तस्मै प्रोक्तरूपाय । शुद्धबुद्धस्वभावाय शुद्धो विमलो निष्पापत्वेन बुद्धो ज्ञातहेयोपादेयतत्त्वस्वरूपः स्वभावश्चित्तपरिणामो यस्य तस्मै । भगवते ज्ञानवैराग्ययशऐश्वर्यसमन्विताय नम इति ॥८॥

॥ इति निर्लेपाष्टकम् ॥ ११ ॥

## ॥ अथ निःस्पृहाष्टकम् ॥ १२ ॥

अथैकादशेऽष्टके निर्लेप उक्तः स तु निःस्पृही भवितुमर्हतीत्यतो द्वादशेऽष्टके निःस्पृहत्वमाह— 

**स्वभावलाभात् किमपि प्राप्तव्यं नावशिष्यते । इत्यात्मैश्वर्यसंपन्नो निःस्पृहो जायते मुनिः ॥ १ ॥**

**स्वभावेति**—हे मुमुक्षो निर्लेपत्वोत्सुक । स्वभावलाभात् स्वभावः समग्रस्वधर्ममयवस्तुनो निजसहजस्वरूपं तस्य लाभस्तदा-

वरणविगमात्प्राप्तिस्तस्मादन्यत् । किमपि किञ्चिदपि । जीवस्य जगतीति शेषः । प्राप्तव्यं प्राप्तुं योग्यं वस्तु । नावशिष्यते शेषत्वेन न तिष्ठति सर्वप्राप्तौ तस्यैव प्रधानत्वात्पर्यन्तप्राप्तत्वाच्च । कृषौ कणनिष्पत्तिवत् । इत्यस्माद्धेतोः स्वभावलाभोद्यमे प्राधान्यत्वतः । निःस्पृहो-ऽनात्मीयभावे निःस्पृहत्वं गतः । मुनिः साधुः । आत्मैश्वर्यसंपन्न आत्मीयं सहजमैश्वर्यं ज्ञानादिविभूतिमत्त्वं तेन संपन्नो युक्तो जायते भवति । ततस्त्वं कथं स्वभावादन्यत्र स्पृहावान् भवसीत्यर्थः ॥ १ ॥

अथ सस्पृहनिःस्पृहयोरिहैव विडंबिताविडंबितत्वं दर्शयन्नाह—

**संयोजितकरैः के के प्रार्थ्यन्ते न स्पृहावहैः । अमात्रज्ञानपात्रस्य निःस्पृहस्य तृणं जगत् ॥ २ ॥**

संयोजितेति—स्पृहावहैः स्पृहां वाञ्छामावहन्ति प्राप्नुवन्तीति स्पृहावहास्तृष्णातुरास्तैः । संयोजितकरैः संयोजितौ शीर्षे-ऽञ्जल्यारोपणेन योजितौ मुकुलितौ करौ हस्तौ यैस्तैः । के के पुरुषा न प्रार्थ्यन्ते न याच्यन्ते, अपि तु सर्वेऽप्युत्तममध्यमाधमभेदभिन्ना याच्यन्ते । इत्येवं स्पृहा विडंबनाकारिणी भवति । अमात्रज्ञानपात्रस्य न विद्यते मात्रा काञ्चनाद्यर्थसंग्रहो यस्य तस्य निष्परिग्रहस्ये-त्यर्थः । स चासौ ज्ञानपात्रं ज्ञानी । यद्वा न विद्यते मात्रा परिमाणं यस्य तदमात्रमनन्तं यज्ज्ञानं तस्य पात्रं भाजनं तस्यानन्तसत्यज्ञान-रत्नाधारस्य । निःस्पृहस्य निर्गता स्पृहा वाञ्छा यस्य इच्छाशून्यस्य तस्य । जगत्त्रिभुवनवर्तिनी श्रीः श्रीमज्जनश्च । तृणं तृणतुल्यं । भातीति शेषः । निष्प्रयोजनत्वात्तत्र निरादरत्वाज्ज्ञानानन्देन समाप्तसकलेच्छत्वाच्चेत्यर्थः ॥ २ ॥

स्पृहाविषलता ज्ञानेन च्छेद्येत्याह—

**छिन्दन्ति ज्ञानदात्रेण स्पृहाविषलतां बुधाः । मुखशोषं च मूर्छां च दैन्यं यच्छति यत्फलम् ॥ ३ ॥**

छिन्दन्तीति—बुधा अध्यात्मशुध्धौ प्रवीणाः पंडितपुरुषाः। यत्फलं यस्याः फलं निष्पाद्यरूपं कार्यं वा प्राणिनां मुखशोषं मुखस्य वदनस्य यः शोषोऽसमर्थोदात्रौचित्यविकलानामग्रे याञ्चायै जातं लज्जाविवेकजलार्द्रतात्यागरूपकाठिन्यं तं । मूर्छां च चित्तशून्यतां । दैन्यं दीनत्वं च । यच्छति ददाति । तां स्पृहाविषलतां स्पृहा लोभोदयाज्जीवानां धनविषयसुखेच्छा, सैव विषलता धर्मजीवनविनाशिनी वत्सनागादिविषतरुशाखावल्ली वा तां । ज्ञानदात्रेण ज्ञानं वस्तुपरमार्थदर्शिबोधस्तदेव दात्रं छेदकारि शस्त्रं तेन । छिन्दन्ति हृदारामे प्ररोहन्ती कृन्तन्ति तदुत्थानं निवारयन्तीत्यर्थः ॥ ३ ॥

स्पृहा जातिहीनास्तीत्यतो निष्कासनीयेत्याह—

**निष्कासनीया विदुषा स्पृहा चित्तगृहाद्बहिः । अनात्मरतिचांडालीसंगमंगीकरोति या ॥ ४ ॥**

निष्कासनीयेति—विदुषाऽध्यात्मशुध्धौ विचक्षणपंडितवर्येण । सा स्पृहा वाञ्छा । चित्तगृहान्मनोभुवनात् । बहिर्दूरदेशे । निष्कासनीया निःसारयितुं योग्यास्ति । सा केत्याह—या दुष्टा स्पृहा । अनात्मरतिचांडालीसंगमनात्मनि आत्मव्यतिरिक्तपुद्गलादिवस्तुनि या रतिः प्रीतिः । सैव चांडाली सर्वोच्छिष्टभक्षिणी श्वपाकी क्रोधप्रियेति यावत् । तस्या यः संगः संबन्धस्तं । अंगीकरोति स्वीकरोति सेवत इत्यर्थः ॥ ४ ॥



स्पृहावतां सर्वत्र लघुतेति दर्शयन्नाश्चर्यमाह—

**स्पृहावन्तो विलोक्यन्ते लघवस्तृणतूलवत् । महाश्चर्यं तथाप्येते मज्जन्ति भववारिधौ ॥ ५ ॥**

स्पृहावन्त इति—स्पृहावन्तः स्पृहा विषयसुखादिषु लालसा सा विद्यते येषां ते जनाः। तृणातूलवत्तृणं घासखण्डं, तूलमर्कवृक्षफलगर्भजनितं कार्पासं वा तयोस्तुल्यं तद्वत्। लघवोऽल्पभारवन्तोऽमहान्त इति यावत्। विलोक्यन्तेऽस्मदादिभिर्दृश्यन्ते। तथापि पूर्वोक्तरीत्या लघवो दृश्यमाना अपि। एते स्पृहावन्तः। भववारिधौ संसारसागरे। मज्जन्ति बुडन्ति अधोगतिं कुर्वन्तीति यावत्। अतो लघुत्ववैलक्षण्यतः। महाश्चर्यं लभामहे। अथवा किमत्राश्चर्यं यत्परेषामग्रे याचनया लोके तृणतुल्याः सन्तोऽपि ते पराशामहाभारावहा भवाब्धौ निमज्जन्त्येवेत्यर्थः॥ ५॥

अथ निःस्पृहस्य प्रवर्तनमीदृग्भवतीत्याह—

**गौरवं पौरवन्द्यत्वात्प्रकृष्टत्वं प्रतिष्ठया। ख्यातिं जातिगुणात्स्वस्य प्रादुष्कुर्यान्न निःस्पृहः॥ ६॥**

गौरवमिति—निःस्पृहो निरीहो मुनिः। पौरवन्द्यत्वात् पुरे भवाः पौरा नगरवासिनो यद्वा पुरस्येमे पौरा नृपाद्यास्तैर्वन्द्यः सेवनीयस्तद्भावस्तत्त्वं तस्माद्धेतोः। स्वस्यात्मनः। गौरवं गुरोर्भावो गौरवं महत्त्वं गर्वं वा। न प्रादुष्कुर्यान्न प्रकटीकुर्यादित्येवं सर्वत्र क्रियासंबन्धः। तथैव प्रतिष्ठया प्रतिष्ठा सर्वजने मान्यता तया। प्रकृष्टत्वं स्वस्य सर्वोत्कृष्टत्वं न प्रादुष्कुर्यात्। तथा जातिगुणाज्जातिः प्रधानकुले जन्म तस्याः सकाशात् गुणो धैर्यगाम्भीर्यप्रौढत्वादिस्तस्मात्। जातिश्च गुणश्चेति समाहारद्वन्द्वः। यद्वा जातियुक्तश्चासौ गुणश्चेति मध्यमपदलोपी समासः। गुणो रूपादिर्ज्ञानविनयादिर्वा। तस्मात् स्वस्य ख्यातिं प्रसिद्धिं। न प्रादुष्कुर्यात्॥ ६॥

अथ निःस्पृहस्य सुखाधिक्यमाह—

**भूशय्या भैक्षमशनं जीर्णवासो वनं गृहम्। तथापि निःस्पृहस्याहो चक्रिणोऽप्यधिकं सुखम्॥७॥**

भूशय्येति—भोः श्लाघ्यो निरिच्छकस्य चमत्कारं पश्य । किं तत् ? यत् भूशय्या भूर्महीतलं सैव शय्या शयनं पर्यंको भवति । भैक्षं भिक्षया गृहिगृहेभ्य उञ्छवृत्त्या प्राप्तं भैक्षं तद्रूपं । अशनं भोजनं भवति । तथा जीर्णवासो जीर्णं शीर्णं यद्वासः परिधेयवस्त्रं । वनं महदरण्यं तदेव गृहं निवासस्थानं भवति । तथापि निःस्पृहस्येहपरलोकसुखतृष्णारहितस्य । अहो महदाश्चर्यं । चक्रिणोऽपि चक्रवर्तिनोऽपि । अधिकं विशिष्टं । सुखं शर्म भवति, निराकुलानन्दमयत्वादिति ॥ ७ ॥

अथ सस्पृहत्वनिःस्पृहत्वे एव दुःखसुखे इति दर्शयन्नुपसंहरति—

**परस्पृहा महादुःखं निःस्पृहत्वं महासुखम् । एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥ ८ ॥**

परस्पृहेति—हे वत्स त्वमिति जानीहि यज्जीवानां परस्पृहा परेषामात्मभिन्नसचेतनाचेतनपदार्थानां या स्पृहा वाञ्छा भवति सैव । महादुःखं महच्च तद्दुःखं चेति प्रभूततमकालेन भोग्यं नरकादिकष्टं वर्तते, तत्कारणत्वात् । यच्च निःस्पृहत्वं सर्वस्मिन्निरिच्छकत्वं निराशित्वमिति यावत् । तदेव महासुखं महच्च तत्सुखं चेति । सर्वेष्वाप्यनागतकालेन भोग्यं स्वर्गापवर्गगतं साद्यपर्यवसानमनन्तं शर्मेति यावत्, तत्कारणत्वात् । एतत्पूर्वदर्शितं । सुखदुःखयोर्जगत्प्रसिद्धयोः । लक्षणं स्वरूपतो ज्ञापकचिह्नं । समासेन संक्षेपेण । उक्तं जिनादिभिः प्रोक्तमिति ॥ ८ ॥

॥ इति निःस्पृहाष्टकम् ॥ १२ ॥



## ॥ अथ मुनित्वाष्टकम् ॥ १३ ॥

द्वादशेऽष्टके निःस्पृहत्वमुक्तं, तद्वान्मुनिर्भवतीत्यतस्त्रयोदशेऽष्टके मुनित्वमाह—

मन्यते यो जगत्तत्त्वं स मुनिः परिकीर्तितः । सम्यक्त्वमेव तन्मौनं मौनं सम्यक्त्वमेव च ॥ १ ॥

मन्यत इति—यो निर्धारव्यवसायी । जगत्तत्त्वं जगतः पञ्चास्तिकायात्मकचतुर्दशरज्जुप्रमितस्य लोकस्य यत्तत्त्वं उत्पादव्ययध्रौव्यमयत्वेन त्रिकालावस्थायित्वेन सप्तभेदत्वेन पारमार्थिकस्थितस्वरूपं च तत् । मन्यते श्रध्धानपूर्वकं विजानाति । स पूर्वोक्तमुनिशब्दव्युत्पत्त्यर्थयुक्तः । मुनिर्मुनित्ववान् । परिकीर्तितः पूर्णलक्षणतः प्रोक्तस्तीर्थेश्वरैः । तत्पूर्वोक्तस्वरूपं । मौनं मुनेर्भावो मौनं मुनित्वं । सम्यक्त्वमेव । एवशब्दोऽवधारणे । स चैवं प्रयोज्यः—एकं सम्यक्त्वमेव भवति, न त्वन्यत् । तथा यन्मौनं मुनिभावो वर्तते । तदेव सम्यक्त्वं भवति । अत्रायं भावः—यच्छुध्धश्रध्धया निर्धारितात्मस्वभावोपादेयता तत्रैवोपयोगपरिणतेरवस्थानं तदेव सम्यक्त्वं । यच्च सम्यग्दर्शनेन निर्धार्यहेयोपादेयतया विभक्ते सत्युपादेये रमणस्वभावश्चरणं तदेव मौनमिति द्वयोरैक्यं । यदुक्तमाचारांगे—“ जं संमंति पासह तं मोणंति पासह, जं मोणंति पासह तं सम्मंति पासह, ण इमं सकं सिढिलेहिं अदिज्जमाणेहिं गुणासएवंक समायारेहिं पमत्तेहिं गारवमावसंतेहिं मुणि मो णं समादाय धुणियकम्मसरीरगं पं तं लुहं च सेवंति वीरा सम्मत्तदंसिणो ”। इति ॥ १ ॥

पुनरपि तयोरैक्यमेव स्वरूपतो दर्शयन्नाह--

आत्मात्मन्येव यच्छुद्धं जानात्यात्मानमात्मना । सेयं रत्नत्रये ज्ञप्तिरुच्याचारैकता मुनेः ॥ २ ॥

आत्मेति—यद्यस्मात् या । इयं वक्ष्यमाणस्वरूपा । ज्ञप्तिस्त्रिधाव्यापारेण विभक्तास्ति । तस्मात् सा । रत्नत्रये एकता भवति । कथमिति चेच्छृणु--आत्मा जीव एव स्वज्ञानादिगुणरूपज्ञेयानां ज्ञायकत्वकारी ।वषयी कर्तेति यावत् । स आत्मना करणभूतेनात्मीयज्ञानवीर्येण । आत्मनि सकलधर्मपर्यायाधारे गुणिनि विषय इति यावत् । आत्मानमस्तित्ववस्तुत्वद्रव्यत्वसत्त्वप्रमेयत्वसिद्धत्वादि-

धर्मकदंबकोपेतं कर्मत्वापन्नं जीवरूपं विषयमिति यावत् । शुद्धं सकलकर्मकलंकवर्जितत्वेन निर्विकारं। जानात्यवबोधति । तस्मात् सा पूर्वोक्ता सम्यक्त्वमौनयोरेकता । इयमनन्तरं समीपतरदर्शिता ज्ञानावस्था । मुनेः साधोः । रत्नत्रये ज्ञानदर्शनचारित्रविषये । ज्ञप्तिरुच्याचारैकता ज्ञप्तिर्ज्ञानं, रुचिः श्रद्धा, आचारश्चारित्रं, तेषां यैकताऽभिन्नता ज्ञेया । चैतन्यं स्वयमेव विषयि सद्विषये विषयं वेत्तीति कारकत्रयाभेदेन स्पष्टा भवतीत्यर्थः ॥ २ ॥

अथोक्तार्थमेवाभेदग्राहिसंग्रहनयेन विवृणोति—

**चारित्रमात्मचरणाज्ज्ञानं वा दर्शनं मुनेः । शुद्धज्ञाननये साध्यं क्रियालाभात्क्रियानये ॥ ३ ॥**

चारित्रमिति—भो भव्य । मुनेः साधोः । शुद्धज्ञाननये शुद्धो रत्नत्रयस्याभेदग्राही ज्ञाननयो ज्ञानप्रधानो नयः संग्रहवाक्यस्तस्मिन् स्वीकृते सति । आत्मचरणादात्मनि निजस्वभावे यच्चरणं गमनं रमणं वेदनं निर्धारणमिति यावत् । तस्माद्धेतोः । तदेव चरणं चारित्रं । ज्ञानं वा विज्ञता वा । दर्शनं वस्तुस्वभावनिर्धारस्वभावता येन रोचते तेन नाम्ना ब्रूहि । तथा क्रियानये क्रिया कर्तव्यमावश्यकादि, यद्वा क्रियोत्पादव्ययरूपवस्तुव्यापारः, सा प्रधाना यस्य नयस्य रत्नत्रये भेदग्राहिवचनमार्गस्य तस्मिन् । क्रियालाभात् कर्तव्यप्राप्तितो यथाप्रवृत्त्यादिकरणविशेषेण तत्तदावरणविगमाच्च । साध्यं सर्वदेशविरतिरूपं चारित्रं मत्यादिकं ज्ञानमौपशमिकादिकं सम्यक्त्वं निष्पाद्यं भवति । यदुक्तं श्रुतकेवलिसमयप्राभृतके—“ जो उ सुएण भिगच्छइ अप्पाणमिणं तु केवलं सुद्धं । तं सुअकेवलि मिसिणो भणंति लोगप्पदीवयए ॥ १ ॥ जो सुअनाणं सव्वं जाणइ सुअं ते केवलीत्तमाहु जिणा । नाणा आयं सव्वं जम्हा सुअकेवली तम्हा ॥ २ ॥ ” इति ॥ ३ ॥

श्लोकद्वयेनोक्तार्थे दृष्टान्तदार्ष्टान्तिके दर्शयन्नाह—

**यतः प्रवृत्तिर्न मणौ लभ्यते वा न तत्फलम् । अतात्त्विकी मणिज्ञप्तिर्मणिश्रद्धा च सा यथा ॥ ४ ॥**

यत इति—यतो यस्मादशुद्धज्ञाने ज्ञानदर्शनयोर्निष्फलत्वं, ततस्तयोरैक्यं ज्ञेयं । कथं निष्फलत्वं ? यथा येन दृष्टान्तेन । अतात्त्विकी अन्यथात्ववती विपरीतग्राहिणीति यावत् । मणिज्ञप्तिर्मणिज्ञानं । च पुनः । मणिश्रद्धा मिथ्यामणौ मणिश्रद्धा । सा मोक्तरूपा ज्ञप्तिः श्रद्धा च । मणौ सत्यरत्ने । प्रवृत्तिस्तत्र गुणदोषविलोकनपरीक्षणाव्याकारिणी । न स्यात् । वाऽथवा । तत्फलं तस्य मणेः फलं यथोचितमूल्यं विषापहरणादिकार्यं वा । न लभ्यते न प्राप्यते । तद्वद्रत्नत्रयस्यैकतायामपरिज्ञातायां ज्ञानस्याशुद्धत्वात्फलाभाव इत्यर्थः ॥ ४ ॥

**तथा यतो न शुद्धात्मस्वभावाचरणं भवेत् । फलं दोषनिवृत्तिर्वा न तज्ज्ञानं न दर्शनम् ॥ ५ ॥**

तथेति—तथा तेनैव प्रकारेण अतात्त्विकमणिज्ञप्तिदृष्टान्तेन । यतो यस्माज्ज्ञानाच्छ्रद्धानाद्वा । शुद्धात्मस्वभावाचरणं शुद्धो निरुपाधिक आत्मनो जीवस्य स्वभावो ज्ञानादिस्वधर्मेभ्योऽनन्यत्वरूपसहजस्वरूपस्तस्य तस्मिन् वा यदाचरणं आ सर्वतः सर्वात्मनाऽभिव्याप्तिरूपेणाभेदभावेनेति यावत् । चरणं गमनं प्रापणमनुभवनरूपेणास्वादनं वा शीलनं वा । तद्रूपं फलं कार्यं । तन्न भवेन्न संपद्येत । वाऽथवा प्रकारान्तरेण । दोषनिवृत्तिर्दोषा रागद्वेषाज्ञानजन्ममरणाद्यास्तेषां या निवृत्तिरभावः सा । न भवेत् । तत्पूर्वोक्तरूपं । ज्ञानं बोधो न भवेत् । तथाभूतं दर्शनं सम्यक्त्वमपि न भवेत् । स्वकार्यकारित्वाभावादित्यर्थः ॥ ५ ॥

अत आत्मतृप्तो भवेत्याह—

**यथा शोफस्य पुष्टत्वं यथा वा वध्यमण्डनम्। तथा जानन् भवोन्मादमात्मतृप्तो मुनिर्भवेत् ॥ ६ ॥**

यथेति—मुनिः पूर्वदर्शितस्वरूपः साधुः। यथा येन रूपेण। शोफस्य शोफः शरीरे निःसारस्थूलताकारी रोगविशेषस्तस्य संबन्धि। पुष्टत्वं स्फीतत्वं शोभनं तादृशं भवोन्मादं ज्ञात्वा। वाऽथवा। यथा येन रूपेण। वध्यमण्डनं वध्यो विनाशनीयस्तस्करपश्वादिस्तस्य यन्मण्डनं कर्णिकारपुष्पस्रक्रक्तचन्दनादिनाऽलंकरणं शोभनं तद्रूपेण। तथा तेनोक्तोदाहरणयुग्मेन समं तुल्यं भवोन्मादं भवो जीवानां रागद्वेषमोहजनितसंसारस्तेन कृतस्तस्मिन् जातो वा य उन्मादो मतिभ्रंशो ग्रहिलत्वमिति यावत्। तमुक्तरूपं जानन् विदन्। आत्मतृप्त आत्मनि संतुष्टो भवेत् ॥ ६ ॥

अथ लौकिकमौनस्याप्राधान्यदर्शनपूर्वकं भावमौनं स्तौति—

**सुलभं वागनुच्चारं मौनमेकेन्द्रियेष्वपि। पुद्गलेष्वप्रवृत्तिस्तु योगाना मौनमुत्तमम् ॥ ७ ॥**

सुलभमिति—वागनुच्चारं वाग् वाणी वचनमिति यावत्। तस्य योऽनुच्चारोऽभाषणं यस्मिन् तत्। मौनं मुनित्वमभाषित्वमिति यावत्। तदेकेन्द्रियेष्वपि एकं स्पर्शनरूपमिन्द्रियं स्पर्शमात्रविषयग्राहिकरणं येषां तेषु भूजलानलानिलतरुष्वपि। सुलभं सुखेन प्राप्यमस्ति, तेषामप्यभाषकत्वात्। परं किं तन्मौनं कार्यकारि स्यात् अपि तु न स्यादित्यपेरर्थः। तु पुनः। योगानां करणभूतमनोवाक्कायवीर्यप्रसरशक्तिव्यापाराणां। पुद्गलेषु शरीराहारवस्त्रालंकारपञ्चविषयसंस्थानादिप्रकारेण परिणतेषु परमाणुस्कन्धेषु। ॥३१॥

अप्रवृत्तिस्तेषु रम्यारम्यत्वादिग्रहणान्निमुखवीर्यप्रसरस्य रोधनं। तद्रूपं मौनं मुनित्वं। उत्तमं सर्वोत्कृष्टं भवति। सकलेष्टसाधनसमर्थत्वात्तपोवदित्यर्थः ॥ ७ ॥

अथोपसंहरन्नाह—

**ज्योतिर्मयीव दीपस्य क्रिया सर्वापि चिन्मयी। यस्यानन्यस्वभावस्य तस्य मौनमनुत्तरम् ॥ ८ ॥**

ज्योतिरिति—यस्य पूर्वोक्तगुणव्रजं प्राप्तस्य। अनन्यस्वभावस्य नान्य आत्मस्वरूपाद्भिन्नः स्वभावः परिणामो यस्य स तस्य, आत्मनोऽभेदचित्तवृत्तिमत इत्यर्थः। सर्वापि समग्रापि। क्रिया गुणप्रकर्षप्रवर्तनाय वीर्यप्रवृत्तिराहारव्यवहारादिरूपा वा। सा चिन्मयी स्वगुणानुयायिनी ज्ञानमयी वा चैतन्यमयी प्रवर्तते। तस्य मौनमनुत्तरं भवति। कस्येव? दीपस्य ज्योतीरूपस्य घटादिप्रकाशनक्रिया। इव यथा। ज्योतिर्मयी प्रकाशशक्तिमती कलिकामयी प्रधानत्वेन वर्तते। तथैव तस्य मौनं मुनित्वं आत्मनोऽभेदप्रवर्तनत्वेन अनुत्तरं सर्वमौनेभ्यः प्रधानमिति स्थितमित्यर्थः ॥ ८ ॥

॥ इति मुनित्वाष्टकम् ॥ १३ ॥

## ॥ अथ विद्यातत्त्वाष्टकम् ॥ १४ ॥

अथ त्रयोदशेऽष्टके मुनित्वमुक्तं, तत्तु यथार्थविद्यातत्त्वपरिणतस्य भवतीत्यतश्चतुर्दशेऽष्टके विद्यातत्त्वमाह—

**नित्यशुच्यात्मताख्यातिरनित्याशुच्यनात्मसु। अविद्या तत्त्वधीर्विद्या योगाचार्यैः प्रकीर्तिता ॥ १ ॥**

नित्येति—अनित्याशुच्यनात्मसु न नित्या अनित्या विनश्वरा आत्मभिन्ना असर्वकालस्थायिन इति यावत्। न शुचयोऽशुचयः पूर्णब्रह्मणोऽस्पर्शनीयत्वेन सदैव स्रवन्मलत्वेन जगतामुच्छिष्टत्वेन चापवित्राः। न आत्मान आत्मरूपा अनात्मानः परकीया ये धनदेहपरिजनादयः पदार्थास्तेषु। क्रमेण नित्यशुच्यात्मताख्यातिः नित्यता शुचिता आत्मता च, तासां ख्यातिः प्रज्ञा प्रसिद्धिर्वा तथात्वेन परिणता बुद्धिरिति यावत्। सा अविद्या न विद्याऽविद्या मोहोऽज्ञानं मायेति लोके। तत्त्वधीस्तत्त्वे शुद्धात्मनि नित्यताऽविनाशित्वात्, शुचिता सकलमललेपवर्जितत्वात्, आत्मता सर्वकालं स्वस्मादभिन्नत्वात्, क्रमेण पूर्वोक्ता ख्यातिर्बुद्धेः प्रसिद्धिः सा। विद्याऽमोहो ज्ञानं भवति। योगाचार्यैः पूर्वप्रोक्तोऽर्थो योगः साम्नाययमनियमादितत्त्वविज्ञानाचारः सिद्धोऽस्ति येषां ते योगाचार्याः श्रीभद्रबाहूमास्वातिजिनभद्रगणिहरिभद्रपतञ्जलिवशिष्ठभगदत्तभास्करादयो योगशास्त्रकर्तारस्तैः। कीर्तिता कथितेति॥ १॥

आत्मदर्शने प्रवर्तमानं विद्वांसं मोहादयो न छलयन्तीत्याह—

**यः पश्येन्नित्यमात्मानमनित्यं परसंगमम्। छलं लब्धुं न शक्नोति तस्य मोहमलिम्लुचः॥ २॥**

यः पश्येदिति—यः प्राप्तविद्यातत्त्वो योगी। आत्मानमविचलितस्वरूपचिद्घनजीवं। नित्यं सनातनमविनश्वरमिति यावत्। पश्येद्विमलज्ञानोपयोगदृशा विलोकयेत्। तथा परसंगमं शरीरादिसकलपरसंयोगम्। अनित्यमशाश्वतं विनश्वरमिति यावत्। पश्येत्। तस्य विद्यावतः। मोहमलिम्लुचो मोहोऽज्ञानमविद्या मोहनीयकर्मोदयजो रागादिगणो वेति यावत्। स एव मलिम्लुचस्तस्करः। छलमवकाशरूपच्छिद्रम्। लब्धुं प्राप्तुम्। न शक्नोति समर्थो न भवति, तस्यात्मनित्यदर्शनादिज्ञानेन निरुद्धत्वादित्यर्थः॥ २॥

पुनरपि परसंयोगस्यानित्यत्वं दर्शयन्नाह—

**तरंगतरलां लक्ष्मीमायुर्वायुवदस्थिरम् । अदभ्रधीरनुध्यायेदभ्रवद्भंगुरं वपुः ॥ ३ ॥**

तरंगेति—अदभ्रधीरदभ्रा सत्यज्ञानभावत्वेन विमलोपयोगत्वेन च पुष्टा धीर्बुद्धिर्यस्य स तादृशः पुमान् । तरंगतरलां तरंगा जलधिकल्लोलास्तद्वत्तरला चपलाऽस्थिरेति यावत् ताम् । लक्ष्मीं श्रियं स्थावरजंगमसंपदमिति यावत् । अनुध्यायेत् हृदि संप्रधारयेत् । हे जीव इयं लक्ष्मीर्विनश्वरा पापमूला च चिरस्थायिनी न भवति, किं तस्यां रक्तोऽसीति भावयेदित्यर्थः । तथायुर्जीवितम् । वायुवदस्थिरं वायुः पवनस्तद्वत्तरंगवदस्थिरमनियतं क्षणभंगुरं स्मरेत् । तथा वपुः शरीरम् । अभ्रवन्मेघच्छायावद् मेघस्थितिवद्वा । भंगुरं क्षणदृष्टनष्टशीलं अनुध्यायेत् । स विद्यावान् ज्ञेय इत्यर्थः ॥ ३ ॥

पुनरविद्याकृतप्रवृत्तिं दर्शयन्नाह—

**शुचीन्यप्यशुचीकर्तुं समर्थेऽशुचिसंभवे । देहे जलादिना शौचभ्रमो मूढस्य दारुणः ॥ ४ ॥**

शुचीनीति—मूढस्याज्ञस्याविवेकिन इति यावत् । शुचीनि पवित्राणि घनसारकाश्मीरजश्रीखंडरुचीनांशुकदुग्धादीनि वस्तून्यपि । अशुचीकर्तुमपवित्रीकर्तुम् । समर्थे शक्तियुक्ते । तथा अशुचिसंभवेऽशुचौ शुक्रशोणितपुरीषमलादौ संभव उत्पत्तिर्यस्य तस्मिन् । देहे शरीरे । जलादिना जलं पानीयं तदादि यस्य । आदिपदाद्भस्ममृत्तिकादर्भादयो ग्राह्याः । तेन स्नानविलेपनेन । शौचभ्रमः शुचेर्भावः शौचं पवित्रताकरणं तद्रूपो यो भ्रमोऽनेन मद्देहः पवित्रो जात इति भ्रान्तिरूपः । दारुणो दुर्गतिदुःखहेतुत्वेनानिवार्यत्वेन च भयानकः कर्कशश्चास्तीत्यर्थः ॥ ४ ॥

विद्यायाः कृत्यं दर्शयन्नाह—

**यः स्नात्वा समताकुंभे हित्वा कश्मलजं मलम् । पुनर्न याति मालिन्यं सोऽन्तरात्मा परः शुचिः ॥ ५ ॥**

य इति—यो विद्यातत्त्वसंपन्नो योगी । समताकुंभे समता सर्वस्मिंस्तुल्यवृत्तिः सैव तद्रूपो वा कुंभो जलाशयविशेषस्तस्मिन् । स्नात्वा निमज्ज्य । कश्मलजं कश्मलं पापकर्म तस्माज्जातः समुद्भूतस्तम् । मलं कर्मलेपकृतात्ममालिन्यम् । हित्वा परिहृत्य । समरसेन पापमलप्रक्षालनाद्विमलः सन्नित्यर्थः । पुनर्भूयः । मालिन्यं प्रोक्तमलेन मलिनत्वम् । न याति न प्राप्नोति । स पूर्वप्रदर्शितस्वरूपो योगी । अन्तरात्मा कायादेर्बहिर्भावस्य साक्षिमात्रत्वेन तटस्थज्ञाता । परः सर्वोत्कृष्टः । शुचिः पवित्रः, प्रभूतकालस्थायिपावित्र्यसंपन्नत्वादित्यर्थः ॥ ५ ॥

अथाविद्याया अपूर्वबन्धनशक्तिदर्शनपूर्वकं फलं सूचयन्नाह—

**आत्मबोधो नवः पाशो देहगेहधनादिषु । यः क्षिप्तोऽप्यात्मना तेषु स्वस्य बन्धाय जायते ॥ ६ ॥**

आत्मबोध इति—देहगेहधनादिषु देहः शरीरं गेहं गृहादि धनं कांचनादि । द्वन्द्वान्ते श्रूयमाणत्वात्तान्यादीनि येषाम् । आदिपदात्पुत्रदारादयो ग्राह्याः । तेषु य आत्मबोधो मदीयत्वबुद्धिः । जीवस्येति शेषः । तद्रूपो नवो नूतनो जनप्रसिद्धबन्धनेष्वदृष्टपूर्व इति यावत् । पाशः पश्यते बध्यतेऽनेनेति पाशो मृगादिबन्धनरज्जुर्वर्तते । कोऽसौ ? य आत्मीयबुद्धिरूपः पाशः । आत्मना जीवेन । तेषु देहादिषु स्वायत्तीकरणाय क्षिप्तोऽपि स्थापितोऽपि । स्वस्य स्वात्मनः । बन्धाय कर्मरज्जुभिर्नियंत्रणाय । जायते भवति । इतरपाशस्तु येषु

ङ्खिप्तस्तेषां बन्धाय भवति, अयं तु क्षेप्तारमेव बध्नाति, तत आत्मानमात्मगुणांश्च विनाऽन्यपदार्थेषु मदीयत्वबुद्धिस्त्याज्या स्वस्य कर्मबन्धकारित्वादिति विद्यातत्त्वफलमित्यर्थः ॥ ६ ॥

अथैकक्षेत्रस्थायिनोऽपि परस्परभिन्नाः स्युस्तर्हि भिन्नक्षेत्रावगाहिनः कथं स्वकीया भवेयुरित्याह—

**मिथोयुक्तपदार्थानामसंक्रमचमत्क्रिया । चिन्मात्रपरिणामेन विदुषैवानुभूयते ॥ ७ ॥**

मिथ इति—मिथोयुक्तपदार्थानां मिथः परस्परेण युक्ता एकस्मिन्नन्तःप्रदेशे स्थिता ये पदार्था धर्मास्तिकायादयस्तेषामपि । असंक्रमचमत्क्रिया न संक्रमोऽसंक्रम इतरस्येतरत्वेनापरिणमनमिति यावत् । सैव चमत्क्रिया चमत्कारो लोकोत्तरवस्तुभावविलोकनजनितचित्तानन्दकारिणी या वर्तत इति यावत् । सा चिन्मात्रपरिणामेन चिज्ज्ञानं तन्मात्रं तदेव केवलमज्ञानादिमिश्रतावर्जितं यस्मिन् परिणामे शुद्धज्ञानोपयोगे तेन । एवशब्दोऽवधारणे । तस्य चैवं प्रयोगः—चिन्मात्रपरिणामेनैव, न त्वन्येन क्रियादिना वा । विदुषैव न त्वल्पमतिना । विदुषा जिनागमनिपुणपण्डितेन । अनुभूयते प्रबुध्यते । तच्चमत्काराज्ञास्तु भिन्नक्षेत्रावगाहिष्वपि धनकुटुंबादिपदार्थेषु स्वसंक्रान्तिं ज्ञायमाना मदीया मदीया इत्यविद्यावशेन जल्पन्ति । तन्मिथ्येति शेषः । यदुक्तं संमतौ—" अण्णुण्णागयाणं इमं च तं वत्ति विभयणमसक्कं । जं समुद्दपाणीयाणं जावंति विसेस पज्जाय ॥ १ ॥ " इत्यर्थः ॥ ७ ॥

उपसंहारपूर्वकं विद्याफलं दर्शयन्नाह—

**अविद्यातिमिरध्वंसे दृशा विद्याञ्जनस्पृशा । पश्यन्ति परमात्मानमात्मन्येव हि योगिनः ॥ ८ ॥**

अविद्येति—योगिनोऽधिगतविद्यातत्त्वा मुनीश्वराः। अविद्यातिमिरध्वंसेऽविद्याऽनात्मीये मदीयत्वबुद्धिस्तद्रूपं यत्तिमिरं तत्त्वदृग्व्याघातहेतुरन्धकारस्तस्य ध्वंसे विनाशे सति। विद्याञ्जनस्पृशा विद्या आत्मन्यात्मीयधर्मेष्वेव च मदीयत्वमतिस्तद्रूपं यदञ्जनं नेत्ररोगापहारिभैषजं तत् स्पृशति गृह्णातीति विद्याञ्जनस्पृक् तया। दृशा दृष्ट्या ज्ञानचक्षुषेति यावत्। हि स्फुटं । आत्मन्येव स्वस्मिन्नेव न तु क्वचिद्बहिर्विषये। परमात्मानं परमः सर्वोत्कृष्ट आत्मा पूर्णब्रह्म तं। पश्यन्ति विलोकयन्तीति ॥ ८ ॥

॥ इति विद्यातत्त्वाष्टकम् ॥ १४ ॥

# ॥ अथ विवेकाष्टकम् ॥ १५ ॥

चतुर्दशेऽष्टके विद्या प्रोक्ता, सा तु विवेकिना प्राप्यत इत्यतः पञ्चदशेऽष्टके विवेकमाह—

**कर्म जीवं च संश्लिष्टं सर्वदा क्षीरनीरवत्। विभिन्नीकुरुते योऽसौ मुनिहंसो विवेकवान् ॥ १ ॥**

कर्मेति—यो वक्ष्यमाणगुणव्रजं प्राप्तः। मुनिहंसो योगिश्रेष्ठः मरालश्च समुज्ज्वलगुणवत्त्वात्। सर्वदा निरंतरं। क्षीरनीरवत् क्षीरं दुग्धं नीरं पानीयं तयोर्य एकाकारसंयोगस्तद्वत्तत्तुल्यत्वेन। संश्लिष्टं समतिशयेन श्लिष्टं निर्विभागतया संयुक्तमेकाकारतया मिलितमिति यावत्। कर्म जीवं च कर्म ज्ञानावरणादिकमष्टविधं। च पुनः। जीवं चैतन्यं। इत्येतद्द्वयं विभिन्नीकुरुते विशेषेण भिन्नं विभिन्नं, अविभिन्नं विभिन्नं कुरुत इति विभिन्नीकुरुते। संयुक्तावपि तौ स्वस्वलक्षणतो जडचैतन्यत्वादिना व्यवस्थाप्य पृथक्करोतीति

यावत्। सोऽसौ। मुनिर्हंसो विवेकवान् स्वपरविवेचनकारिज्ञानवान्। स यावान् चैतन्यस्वभावोऽस्ति, तावन्मात्रं कर्मणः पृथग्जीवत्वेन निर्धारयतीत्यर्थः ॥ १ ॥

विवेकशब्दस्यार्थप्रकटनपूर्वकं तद्दुर्लभत्वं दर्शयन्नाह—

**देहात्माद्यविवेकोऽयं सर्वदा सुलभो भवे। भवकोट्यापि तद्भेदविवेकस्त्वतिदुर्लभः ॥ २ ॥**

देहात्मेति—भो विद्यातत्त्वाभिज्ञ। भवे चतुर्गत्यात्मके संसारे। अयं वक्ष्यमाणस्वरूपः। देहात्माद्यविवेको देहः शरीरं स एवात्मा जीवो यस्य अयं देहोऽहमस्मीति बुद्धिर्देहात्मा। स आदिर्येषां। आदिपदाद्वचनात्ममनआत्मादयो ग्राह्याः। यथा योऽहं जल्पामि चिन्तयामि स आत्मा, न तु यो मनोवाक्कायानां सर्वप्रवृत्तिनिवृत्तिज्ञाता तेषां विधाता भोक्ता च। स इति भेदं जानाति। अयं बहिरात्मैव मिथ्यादृष्ट्यादिः, धर्मलेशेन वर्जितत्वादसाधकः। तद्रूपो योऽविवेकः स्वपरस्वरूपावधारणज्ञानराहित्यं। स सर्वदा सुलभः सर्वस्मिन् काले सुप्रापः, मृगादिपशुगणेष्वपि तथाविधममत्वस्य दृष्टत्वात्। तु पुनः। तद्भेदविवेकस्तयोर्देहात्मनोर्भेदो भिन्नता परस्परेण निष्पाद्यनिष्पादकत्वादिनाऽन्यत्वमिति यावत्। तद्विज्ञापको यो विवेको ज्ञानरूपाविनाशिभवान्तरयायित्वेन देहाद्भिन्न एव जीव इति विवेचनकारिबोधः। स तु भवकोट्यापि भवानां जन्मान्तरविशेषाणां कोटिः प्रभूतसंख्या तयापि। अतिदुर्लभोऽतिदुःखेनापि प्राप्यो न भवति। तं यः प्राप्तः सोऽन्तरात्मा साधकतमः। स च चतुर्थगुणस्थानादारभ्याद्वादशगुणस्थानं भवति। तदुपरि तु केवली सिद्धश्च परमात्मानौ, तौ साध्यावेवेत्यर्थः ॥ २ ॥

तर्हि देहात्मनोर्भेदः कथं दृश्यत इत्याशंक्याह—

**शुद्धेऽपि व्योम्नि तिमिराद्रेखाभिर्मिश्रता यथा । विकारैर्मिश्रता भाति तथात्मन्यविवेकतः ॥ ३ ॥**

शुद्ध इति—हे भद्र यथा येन प्रकारेण । शुद्धेऽपि विमलेऽपि । आस्तामभ्रादिमलिने । स्वच्छेऽपि व्योम्नि गगने । तिमिरान्नेत्रयोर्भ्रमाद्रोगविशेषाद्वा । रेखाभिरल्पाभ्रपंक्तिभिः । मिश्रता विचित्रवर्णकर्बुरता । अविद्यमानापि दृश्यते । तथा तेनैव प्रकारेण । आत्मनि सहजशुद्धे मनोवाक्कायैः सार्धं विजातीयत्वेनामिलितेऽपि जीवे । अविवेकतो देहात्मनोर्भेददर्शकसुविचारवज्ज्ञानाभावतः । विकारैरज्ञानकर्मकामक्रोधादिकृतबोधविपर्यासैः । मिश्रता मरणाद्यवसरेऽनेकशो दृष्टभिन्नत्वेऽपि देहकर्मादिभिः सहैकता । भाति भासते । धूर्ते साधुभानवदित्यर्थः ॥ ३ ॥

पुनरप्युक्तार्थमेव विशेषयति—

**यथा योधैः कृतं युद्धं स्वामिन्येवोपचर्यते । शुद्धात्मन्यविवेकेन कर्मस्कन्धोर्जितं तथा ॥ ४ ॥**

यथेति—यथा येन प्रकारेण । योधैः सुभटैः । कृतं जयपराजयौ गच्छद्भी रचितम् । युद्धं समरः । स्वामिन्येव सकलसैन्यं परित्यज्य पूनाथ एव । उपचर्यते जितमनेन भूभुजेत्यादि जनैः प्रोच्यते । तथा तेनैव प्रकारेण । अविवेकेन निर्विचारज्ञानेन कर्मस्कन्धोर्जितं कर्मणो ये स्कन्धा राशयस्तैर्यदूर्जितं पुण्यापुण्यत्वेन विलसितम् । तच्छुद्धात्मनि सकलविकारवर्जिते जीवे उपचर्यते अस्माच्छनादेरयं सुखीत्येवं प्रोच्यत इत्यर्थः ॥ ४ ॥

ननु भिन्नमभिन्नं कथं पश्येदित्याशंक्याह—

**इष्टकाद्यपि हि स्वर्णं पीतोन्मत्तो यथेक्षते । आत्माभेदभ्रमस्तद्वद्देहादावविवेकिनः ॥ ५ ॥**

इष्टकादीति—यथा येन प्रकारेण । पीतोन्मत्तः पीतः पानीकृत उन्मत्तो धत्तूरो येन सः । हि स्फुटं । इष्टकाद्यपि इष्टका मृदादिनिर्मिता लोकप्रसिद्धा, सादिर्यस्य तत् । आदिपदात्पीतवर्णपाषाणादयो ग्राह्याः । स्वर्णं पीतवर्णभ्रमत्वेन काञ्चनं । ईक्षते विलोकते । तद्वत् तत्तुल्यमेव । अविवेकिनो निर्विचारजीवस्य । देहादौ शरीरकर्मादिरूपिपदार्थे । आत्माभेदभ्रम आत्मना जीवेन सह योऽभेद एकताभावस्तद्रूपो भ्रमो देहादेरभिन्नोऽस्मीति प्रतिभासरूपा भ्रान्तिर्भवतीत्यर्थः ॥ ५ ॥

अथैवं विवेक्यविवेकिनौ कथं जातावित्याशंक्याह—

**इच्छन्नपरमान् भावान् विवेकाद्रेः पतत्यधः । परमं भावमन्विच्छन्नाविवेके निमज्जति ॥ ६ ॥**

इच्छन्निति—अपरमान् न परमा अपरमा आत्मनो नरामरादित्वेनोत्पादव्ययरूपकर्मसंयोगजा अशुद्धा इति यावत्तान् । भावान् परिणामविशेषान् । इच्छन् जीवत्वेन निरपेक्षतया गृह्णन्नेते भावा एवात्मेति श्रद्धां कुर्वन्निति यावत् । विवेकाद्रेर्विवेकः सुविचारः स एवाद्रिः समुत्तुंगालोकपर्वतस्तस्मात् । अधोऽनात्मदर्शित्वभूतले । पतति भ्रश्यति । परमं सर्वविकारवर्जितशुद्धस्वभावरूपं । भावं सिद्धतुल्यशुद्धाशयमवस्थानं वा । अन्विच्छन् गवेषयन् । अविवेके स्वपरयोरनभिज्ञतारूपागाधजले । न निमज्जति न ब्रुडति । परमभावगवेषी सुरनरपशुरूप एवाहमस्मीति नावधारयति, किं तु तस्मादन्य एवाहं तस्य कर्मफलरूपत्वात्तद्रूपोऽहं नास्मीत्यर्थः ॥ ६ ॥

उक्तार्थमेव स्फुटीकुर्वन्नाह—

**आत्मन्येवात्मनः कुर्याद्यः षट्कारकसंगतिम् । क्वाविवेकज्वरस्यास्य वैषम्यं जडमज्जनात् ॥ ७ ॥**

आत्मनीति—यो मुनिः । आत्मना स्वस्वभावेन । आत्मनि स्वरूपे । एवशब्दोऽवधारणे, तस्य चैवं प्रयोगः—निजस्वभाव एव, न त्वन्यत्र । षट्कारकसंगतिं षड्भिः संख्येयानि कारकाणि कर्तृकर्मादीनि । तेषां या संगतिर्योग्यताऽर्थानुगमरूपघटना वा तां । कुर्यात् करोति । तस्य जडमज्जनात् जड इष्टानिष्टानभिज्ञो भेदग्रहणासमर्थो, ज्वरिणः पक्षे शीतवेगश्च तस्मिन् मज्जनान्निमग्नीभवनात् । अस्य पूर्वोक्तलक्षणस्य । अविवेकज्वरस्य निर्विचाररूपरोगविशेषस्य । वैषम्यं विषमस्य भावो वैषम्यं तद्विकारकृतविलक्षणत्वं क ? न क्वापि । अत्रायं भावः—यद्यात्मा षड्विधकारकत्वं स्वयमेव स्वस्मिन् करोति, तदाऽविवेकस्य नास्त्यवकाशः । कारकाणि त्वमूनि—कर्तृत्वं व्यापारविभजनदक्षत्वेन स्वगुणपरिणतौ परिणमनस्वभावत्वेन स्वतंत्रज्ञप्तिक्रियाकारित्वेन च कर्ता ; स एव ज्ञानक्रियानुविद्धनिवर्त्यविकार्यप्राप्यपरिणामरूपफलभाग्भवतीति कर्म । ज्ञानाद्युपयोगस्य साधकतमत्वेन करणं । शुद्धपरिणामदानाय स्वयमेव पात्रत्वात्संप्रदानं । स एव पूर्वज्ञानादिप्रकर्षादुत्तरज्ञानादिप्रकर्षस्य प्रवृत्तिं कुर्वन् पूर्वज्ञानादिपर्यायेभ्य उत्तरोत्तरपर्यायं गच्छद्विश्लेषावधित्वादपादानं । जीवत्वचेतनत्वादिरूपे सामान्याधार एव सर्वे विशेषाः परिणमन्तीत्याधारः । इत्येवं प्रवर्तमानस्य क्वाविवेकः ? न क्वापीत्यर्थः ॥ ७ ॥



अथैनमुपसंहरति—

**संयमास्त्रं विवेकेन शाणेनोत्तेजितं मुनेः । धृतिधारोद्भवणं कर्मशत्रुच्छेदक्षमं भवेत् ॥ ८ ॥**

संयमेति—मुनेः साधोः । संयमास्त्रं संयमः सामान्येन सर्वसावद्येभ्यः सम्यग् निवृत्तिः विशेषतः सप्तदशविधः तद्रूपं यदस्त्रं तोमरादिप्रहरणं तत् । विवेकेन सुविचारात्मकेन । शाणेन शस्त्रघर्षणपाषाणेन शाणोनेति लोकप्रसिद्धेन । उत्तेजितं तीव्रतेजोमयं कृतं । धृतिधारोल्बणं धृतिः स्थैर्यं संतोषो वा सैव धारा तीक्ष्णाग्रभागस्तयोल्बणमत्युत्कटं कृतं सत्कर्मशत्रुच्छेदक्षमं कर्माणि ज्ञानावरणादीनि तान्येव शत्रवोऽरयस्तेषां छेदने विनाशने क्षमं शक्तिमत् । भवेज्जायेत । पूर्वोक्तलक्षणविवेकसहितस्यैव संयमः कर्मक्षपणासमर्थ इत्यर्थः ८॥

॥ इति विवेकाष्टकम् ॥ १५ ॥

## ॥ अथ माध्यस्थ्याष्टकम् ॥ १६ ॥

पञ्चदशेऽष्टके विवेक उक्तः, स तु माध्यस्थ्येन प्राप्यत इत्यतः षोडशे माध्यस्थ्यमाह—

**स्थीयतामनुपालंभं मध्यस्थेनान्तरात्मना । कुतर्ककर्करक्षेपैस्त्यज्यतां बालचापलम् ॥ १ ॥**

स्थीयतामिति—भो भव्यक ! भवता मध्यस्थेन मध्येऽन्तरालेऽस्पृष्ट एवोभाभ्यां तिष्ठतीति मध्यस्थस्तेनारागद्वेषात्मकेन परिणामेनेति यावत् । अन्तरात्मना शुद्धान्तरंगेण देहादिषु साक्षीभावेन वा । अनुपालंभं न विद्यते उपालंभो वचनीयताऽपवाद इति यावत् यस्मिन् कर्मणि यथा स्यात्तथा पक्षपातवर्जितशुद्धाशयेनेत्यर्थः । स्थीयतां स्वधर्मे स्थितिः क्रियतां । तथा कुतर्ककर्करक्षेपैः कुत्सिता दुष्टा ये तर्काः परपक्षदूषणाय जनमनसि संशयोत्पादकवितर्कयुक्तयस्त एव कर्करा अघटितोपलखण्डास्तेषां क्षेपा दूरतरविक्षेपाः पाण्डित्यगर्वोद्धतवाक्यैस्तिरस्कारा इति यावत् तैः कृतं । बालचापलं बालोऽज्ञः शिशुश्च तद्वत्तदुचितं वा चापलं चंचलमतित्वं स्वयशोजयलाभाय समातुरत्वमिति यावत् । त्यज्यतां विमुच्यतामिति ॥ १ ॥

मध्यस्थेतरयोः ज्ञाने परिणतिभेदं दर्शयन्नाह—

**मनोवत्सो युक्तिगवीं मध्यस्थस्यानुधावति । तामाकर्षति पुच्छेन तुच्छाग्रहमनःकपिः ॥ २ ॥**

**मन इति**—मध्यस्थस्य मध्यस्थोऽपक्षपातित्वेन तत्त्वपरीक्षकस्तस्य । मनोवत्सो मन एव वत्सो बालवृषभः । युक्तिगवीं युक्तिः सन्न्यायनिपुणार्थावधारणाकारिणी चित्तवृत्तिः सैव गौः तत्त्वावबोधक्षीरदा धेनुस्तां । अनुधावति अनुकूलमना वस्तुधर्मानुपदं याति । मध्यस्थानां मनो यथार्थवस्तुस्वरूपग्राहिणीं बुद्धिं धेनुं वत्स इव प्रयातीति भावः । तुच्छाग्रहमनःकपिः तुच्छे शुष्कवादाद्यसारवस्तुनि आग्रहो बहुमानपूर्विका प्रीतिर्यस्य तादृशस्य कदाग्रहिणो मनश्चित्तं तदेव कपिर्मर्कटः सः । तां युक्तिगवीं । पुच्छेनासद्दोषारोपणरूपहस्तेन स्वमुखेन वा असदाग्रहरूपपुच्छदेशं गृहीत्वा दूषणाभावेऽपि तत्त्वे दोषारोपं कृत्वा तेन । आकर्षति समाधानस्थानाद्विवादरूपेऽसमाधानस्थाने नयतीति ॥ २ ॥

अथास्यैव नयेषु समवृत्तित्वं दर्शयन्नाह—

**नयेषु स्वार्थसत्येषु मोघेषु परचालने । समशीलं मनो यस्य स मध्यस्थो महामुनिः ॥ ३ ॥**

**नयेष्विति**—स्वार्थसत्येषु स्वकीये स्वकीयेऽर्थेऽभिप्राये सत्या यथार्थास्तेषु । नयेषु नैगमादिसप्तविधेषु वस्त्वेकांशग्राहिवचनमार्गेष्विति यावत् । परचालने परेषां स्वस्मादन्येषां नयानां चालनं स्वकीयस्वकीयाभिप्रायेण वस्तुस्वरूपावगमनं बोधनं तस्मिन् । मोघा निःफलाभिप्रायाः सर्वेषां नयानां परस्परेण प्रतिपक्षत्वात् तेषु । यस्य साधोः । मनश्चित्तं । समशीलं तुल्यस्वभावं वर्तते । कस्मिन्नपि

नयमते सर्वथादरकारि सर्वथाऽनादरकारि वा न भवति, सर्वनयसापेक्षवृत्तित्वात् । स पूर्वोक्तलक्षणः । महामुनिर्विमलबोधवान् साधुशिरोमणिः । मध्यस्थोऽपक्षपातित्वेन तत्त्वपरीक्षाकारको ज्ञेय इति ॥ ३ ॥

ज्ञाने नयेषु परिणतिर्दर्शिताऽथ जनेषु तां दर्शयन्नाह—

**स्वस्वकर्मकृतावेशाः स्वस्वकर्मभुजो नराः । न रागं नापि च द्वेषं मध्यस्थस्तेषु गच्छति ॥ ४ ॥**

स्वस्वेति—नराः सर्वे प्राणिनः । स्वस्वकर्मकृतावेशा स्वेन स्वेन शुभाशुभप्रवर्तनपरिणामेन निष्पादितानि यानि कर्माणि ज्ञानावरणादीनि तैः कृतः संपादित आवेशो ग्रहावेशादेरिव पारवश्यं येषां ते । तथा स्वस्वकर्मभुजः स्वकीयस्वकीयकर्मणः शुभाशुभं फलं भुञ्जन्ति वेदयन्ति ये ते तथाविधाः सन्ति । तेषु प्रोक्तलक्षणेषु प्राणिषु । मध्यस्थोऽपक्षपाती पुमान् । रागं प्रेमभावं । च पुनः । द्वेषमपि अरुचिभावमपि । न गच्छति न प्रयाति । सर्वजीवैः सह स्वस्यानन्तभवजातशत्रुमित्रसंबन्धावधारणतोऽत्र भवेऽप्यल्पकालसमागमावगमनत इष्टानिष्टपक्षपरिहारित्वात् समवृत्त्यैव तिष्ठतीत्यर्थः ॥ ४ ॥

अथ परेषां गुणदोषचिन्तनतः स्वस्वभावचिन्तनं वरमित्याह—

**मनः स्याद्व्यापृतं यावत्परदोषगुणग्रहे । कार्यं व्यग्रं वरं तावन्मध्यस्थेनात्मभावने ॥ ५ ॥**

मन इति—मनश्चित्तं । यावत् न प्रवृत्तं किं तु यावत्प्रवृत्त्यभिमुखं भवति तावदेवेत्यर्थः । परदोषगुणग्रहे परेषामात्मव्यतिरिक्तपदार्थानां ये दोषा अज्ञानदौर्जन्यकुरूपानैपुण्यकृतघ्नतादयो गुणा विनयविज्ञानसौजन्यसुरूपदक्षत्वकृतज्ञतादयस्तेषां यो ग्रहो ग्रहणं

स्वयं चिन्तनं परेषां कथनं तस्मिन्। व्यापृतं तत्र प्रवर्तनेऽभिमुखं। स्याज्जायेत। तावत् प्रवतनात्प्रथममेव। मध्यस्थेन रागद्वेषपरिहारिणा आत्मभावेनात्मनः स्वस्वरूपस्य यद्भावनं चिन्तनं सावरणस्य ममात्मनः कथं निरावरणत्वं स्यात् द्वयोत्पत्तिपराधीनस्य सततस्तन्निवृत्तेः स्वाधीनतासंपादनादिसाधकबाधकादिविचारणमिति यावत् तस्मिन्। व्यग्रं व्यासक्तं विशेषतो मग्नमिति यावत्। कार्यं करणीयं। तद्वरं प्रधानं श्रेष्ठमिति यावत्। परचिन्ताया रागादिहेतुत्वाद्विभावत्वाच्च। इतरा तु स्वभावत्वेन माध्यस्थ्यहेतुत्वेन समीपतरत्वेन परमसुखावहा भवतीत्यर्थः॥ ५॥



अथ मध्यस्थानां सर्वत्र मोक्षमार्ग इत्याह—

**विभिन्ना अपि पन्थानः समुद्रं सरितामिव। मध्यस्थानां परं ब्रह्म प्राप्नुवन्त्येकमक्षयम्॥ ६॥**

**विभिन्ना इति**—मध्यस्थानां मध्यस्था अरक्तद्विष्टचित्तत्वेन पक्षपातवर्जिततत्त्वदर्शिनस्तेषां। विभिन्ना अपि विदलिता अपि वस्तुधर्मैकक्रमतभेदतः पृथग्भूता अपि। किं तर्हि आचारविशेषमात्रेण भेदानां तत्रैकताप्राप्तावाश्चर्यं, ये वस्तुस्वरूपकथनतोऽपि भिन्नास्तेऽपीत्यपेरर्थः। पन्थानो मार्गाः सर्वेऽपि मतभेदजाः प्रवृत्तिप्रवाहा इत्यर्थः। एकमेकरूपाकारधरं, तत्र सर्वेषां सदृशस्वरूपत्वात्। अक्षयमविनश्वरं साद्यनन्तस्थितिमयत्वात्। परं सर्वोत्कृष्टं रूपातीतत्वेन सर्वोपाधिवर्जितत्वात्। ब्रह्म पूर्णब्रह्मस्वरूपं। प्राप्नुवन्ति गच्छन्ति तस्मिन्नवतरन्तीत्यर्थः। कासां पन्थानः कमिव? सरितां सर्वनदीनां मार्गाः समुद्रं जलधिमिव यथा गच्छन्ति, तथा मध्यस्थानां सर्वे मतभेदजा मार्गाः पूर्णब्रह्मणि प्रविशन्तीत्यर्थः॥ ६॥

अथ ग्रन्थकारः स्वप्रेम्णोऽपि मध्यस्थभावे निवासं दर्शयन्नाचरणपूर्वकमेवोपदेशस्य सार्थकत्वमाह—

**स्वागमं रागमात्रेण द्वेषमात्रात् परागमम् । न श्रयामस्त्यजामो वा किं तु मध्यस्थया दृशा ॥ ७ ॥**

**स्वागममिति**—भो भव्यात्मन् ! वयं रागमात्रेण सर्वैरस्मत्पूर्वाचार्यैर्मानितोऽस्तीत्यतोऽस्माकमप्ययमेव मान्यः स्वकीयत्वादित्येव निर्विचारकेवलप्रेमपरत्वेन हेतुना । स्वागमं जैनसिद्धान्तं । न श्रयामस्तस्मिन्नास्तिक्यं न कुर्मः । वाऽथवा । द्वेषमात्रात् द्वेषोऽरुचिः किमेतैरस्मद्धर्मप्रतिपक्षभूतैः परागमैरित्येवंरूपो निर्विचारानादरः इति यावत् । तावन्मात्र एव हेतुर्यस्मिन् त्यागे स तथा तस्माद्धेतोः । परागमं जैनव्यतिरिक्तमतांतरीयशास्त्रनिकरं । न त्यजामो न तस्य परिहारं कुर्मः । किं तु संक्षेपेणाग्रे ज्ञापयामः । कोऽसौ संक्षेप इत्यत्राह–यदाश्रयामो यत्त्यजामो वा तन्मध्यस्थया तत्त्वपरीक्षावत्या । दृशा दृष्ट्या । यथार्थवादित्वं ज्ञात्वा श्रयामोऽतत्त्वभूतं च त्यजामः । यदुक्तं—" पक्षपातो न मे वीरे न द्वेषः कपिलादिषु । युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ॥ १ ॥ न श्रद्धयैव त्वयि पक्षपातो न द्वेषमात्रादरुचिः परेषु । यथावदाप्तत्वपरीक्षया तु त्वामेव वीरप्रभुमाश्रयामः ॥ २ ॥ " इति ॥ ७ ॥

अथोपसंहरति—

**मध्यस्थया दृशा सर्वेष्वपुनर्बन्धकादिषु । चारिसञ्जीवनीचारन्यायादाशास्महे हितम् ॥ ८ ॥**

**मध्यस्थयेति**—भो भव्या ! वयं मध्यस्थया मध्यस्था रागद्वेषयोरन्तरालवर्तिनी यथास्थितजगत्तत्त्वभावग्राहिणी यादृग्दृष्टिर्भावना तया । अपुनर्बन्धकादिषु न पुनर्भूयो बध्नाति तीव्रभावेन पापं न करोतीत्यपुनर्बन्धक, एकपुद्गलपरावर्तपरिमाणशेषसंसारावस्थायी,

स आदिर्येषाम। आदिपदान्मार्गाभिमुखमार्गपतिताविरतिसम्यग्दृष्टिदेशविरतिसर्वविरत्यादयो ग्राह्याः। तेषु सर्वेषु पूर्वोक्तसमग्रभेदेषु स्थितानां। चारिसञ्जीवनीचारन्यायात् चारयतीति चारी वृषभरूपभर्तुश्चारयित्री कुलवधूस्तयाऽविदन्त्यापि यत्सञ्जीवन्यौषधस्य चारणं भर्तुर्वृषभमुखे दापनं तद्रूपो यो न्याय उदाहरणं तस्मात्। हितं गुणवृद्धिदीर्घदौर्गत्यनिवृत्तिरूपकल्याणं। आशास्महे तत्प्राप्तिवाञ्छां कुर्महे। अज्ञातेऽपि शुद्धमोक्षमार्गे मोक्षाराधकत्वं जानीम इत्यर्थः॥ ८॥

॥ इति माध्यस्थ्याष्टकम्॥ १६॥

## ॥ अथ निर्भयाष्टकम्॥ १७॥

षोडशेऽष्टके मध्यस्थ उक्तः, स तु निर्भयो भवितुमर्हति, ततोऽत्र सप्तदशेऽष्टके निर्भयत्वमाह—

**यस्य नास्ति परापेक्षा स्वभावाद्वैतगामिनः। तस्य किं न भयभ्रान्तिक्लान्तिसन्तानतानवम्॥ १॥**

यस्येति—स्वभावाद्वैतगामिनः स्वकीयो भावः स्वभावो निजस्वरूपलक्षणस्तस्याद्वैतं द्विधा इतं भेदं गतं द्वीतं, तदेव द्वैतं, न द्वैतमद्वैतमभेदैक्यं, तत्प्रति गच्छतीत्येवंशीलः स्वभावाद्वैतगामी पुनः पुनरभेदस्वभावे प्रवर्तनशीलस्तस्य। यस्य वक्ष्यमाणगुणकदंबयुक्तस्य। परापेक्षा परेभ्य आत्मव्यतिरिक्तपदार्थेभ्यो याऽपेक्षा देहविषयादिभ्यः सुखादेराकांक्षा सा। नास्ति न विद्यते। तस्य मोक्तरूपस्य। भयभ्रान्तिक्लान्तिसन्तानतानवं भयमिहलोकभयादिसप्तविधत्रासः, भ्रान्तिर्विषयादिषु सुखप्राप्त्यादिभ्रमः, क्लान्तिः सांसारिकप्रवर्तने श्रान्तस्यार्तिः, एतेषां द्वन्द्वे कृते तेषां यः सन्तानः परंपराप्रवाहस्तस्य तानवं तनोर्भावस्तानवं तनुता स्वल्पतेति यावत्। किं न भवेत्? अपि तु भवेदेवेत्यर्थः॥ १॥

सभयत्वनिर्भयत्वाभ्यां सांसारिकज्ञानसुखयोरसारतासारते दर्शयन्नाह—

**भवसौख्येन किं भूरिभयज्वलनभस्मना । सदा भयोज्झितं ज्ञानं सुखमेव विशिष्यते ॥ २ ॥**

भवेति—भो भव्य ! भूरिभयज्वलनभस्मना भूरीणि च तानि भयानि च भूरिभयानि इहलोकपरलोकादानाकस्मादजीविकापश्लोकमरणरूपाणि, तान्येव ज्वलनाः सुखेन्धनज्वालनसमर्था वह्नयस्तेभ्यो जातं यद्भस्म रक्षा तेन भयज्वलनज्वालितभस्मरूपेणेति भावः । भवसौख्येन भवे संसारे गतं यत्सुखस्य भावः सौख्यं तेन । किं किं फलं ? न किमपि । भयशोषितानन्दरसत्वेन निःस्वादनीयत्वात् । सदा सर्वकालं । भयोज्झितं भयैः पूर्वोक्तैस्त्यक्तं । यद्वा भयान्युज्झितानि येन तत् । ज्ञानं निजस्वरूपावेदनं । एव निश्चितं । सुखमानन्दरूपं विशिष्यते सर्वाधिकसुखत्वेन भेद्यते केवलसुखत्वेनावधार्यत इत्यर्थः ॥ २ ॥

योगिनां भयाभावे हेतून् दर्शयन्नाह—

**न गोप्यं क्वापि नारोप्यं हेयं देयं च न क्वचित् । क्व भयेन मुनेः स्थेयं ज्ञेयं ज्ञानेन पश्यतः ॥ ३ ॥**

न गोप्यमिति—मुनेः परमात्मभावप्राप्त्युपाये प्रवृत्तस्य साधोः । क्वापि ग्रामे वने दिवा रात्रौ च । गोप्यं गोपनीयं कपाटवस्त्रादिभिः स्थगनीयमिति यावत् । न विद्यते केनाप्यहरणीयधर्मधनत्वात् । आरोप्यमारोपणीयं क्वचित् स्थानान्तरे न्यासत्वेन स्थापनीयमपि तस्य न विद्यते, स्वभावधर्मस्यान्यत्र नेतुमशक्यत्वात् । हेयं स्वभावमध्यात्त्याज्यं । देयं परस्मै स्वरूपस्य दातव्यमपि च । न क्वचित् कुत्रचिदपि न विद्यते, अभेदे स्वात्मभावे तयोरविषयत्वात् । ज्ञेयं ज्ञातुं योग्यं वस्तु । ज्ञानेन स्वानुभवबोधस्वभावेन । पश्यतो विलोकयतः । मुनेः । भयेन प्रोक्तलक्षणत्रासेन । क्व कुत्र । स्थेयं स्थातव्यम् तस्य सभया स्थितिः क्वास्ति । न क्वापीत्यर्थः ॥ ३ ॥

पूर्वोक्तहेतुतो मुनिर्निर्भय एवेत्याह—

**एकं ब्रह्मास्त्रमादाय निघ्नन्मोहचमूं मुनिः । बिभेति नैव संग्रामशीर्षस्थ इव नागराट् ॥ ४ ॥**

एकमिति—मुनिर्धर्मवर्मधारकः साधुः । एकं सर्वपरिहारेणाद्वितीयं । ब्रह्मास्त्रं ब्रह्म जीवस्य निरञ्जनावस्थानुयायि शुद्धज्ञानं तदेव तद्रूपं वास्त्रमप्रतिहतशक्तिमद्वज्रादिप्रहरणं तत् । आदाय गृहीत्वा । मोहचमूं मोहोऽज्ञानं मोहनीयकर्म वा तस्य उपलक्षणत्वाच्छेषकर्मणामपि या चमूः सैन्यं तां । निघ्नन् नितरां ध्वंसयन् । न बिभेति भयं न गच्छति । क इव ? संग्रामशीर्षस्थः संग्रामो युद्धं तस्य यच्छीर्षं प्रकर्षतारूपं मस्तकं तत्र स्थितः । नागराट् गजराज इव यथा न बिभेति, तथा मुनिरपि भीमपरिषहोपसर्गसंपातेऽपि न बिभेति । ब्रह्मस्वरूपावेदने संलीनचित्तत्वेन देहपीडां न जानातीत्यर्थः ॥ ४ ॥

सजागरायां ज्ञानदृष्टौ भयाभाव एवेत्याह—

**मयूरी ज्ञानदृष्टिश्चेत्प्रसर्पति मनोवने । वेष्टनं भयसर्पाणां न तदानन्दचन्दने ॥ ५ ॥**

मयूरीति—हे श्लाघ्यशील । चेद्यदि । मनोवने हृदयरूपारामे । ज्ञानदृष्टिः शुद्धचैतन्यस्वरूपानुयायिनी ज्ञानपरिणतिस्तद्रूपा । मयूरी शिखिनी मयूराणां संहतिर्वा सा । प्रसर्पत्यपूर्वापूर्वज्ञानपरंपराविर्भावरूपया स्वेच्छया विलासं करोति । तदा । आनन्दचन्दने परमप्रमोदरूपे श्रीखंडवृक्षे । भयसर्पाणां भयानि पूर्वोक्तानि तान्येव सर्पा अहयस्तेषां । वेष्टनं स्वशरीराभोगेन परिवेष्टनं भयानां स्वोत्पत्तितया व्यापनं । न भवति । अयं भावः—ज्ञानेन स्वस्वरूपे अविनाशित्वादिना निर्धारिते सति भयकारणाभावः स्यादित्यर्थः ॥ ५ ॥

पुनरप्युक्तार्थमेव विशेषयन्नाह—

**कृतमोहास्त्रवैफल्यं ज्ञानवर्म बिभर्ति यः । क्व भीस्तस्य क्व वा भंगः कर्मसंगरकेलिषु ॥ ६ ॥**

कृतेति—हे शान्तचित्त । यो ज्ञानी । कृतमोहास्त्रवैफल्यं कृतं रचितं मोहस्य पूर्वोक्तरूपस्य यान्यस्त्राणि कामक्रोधहर्षशोकारत्यज्ञानभयजुगुप्सादीनि प्रहरणानि तेषां यद्विफलस्य भावः कर्म वा वैफल्यं विगतशक्तित्वं येन तत् । ज्ञानवर्म ज्ञानं स्वपरत्वविवेचनसमर्थबोधस्तदेव तद्रूपं वा यद्वर्म तनुत्राणं कवचमिति यावत् तत् । बिभर्ति स्वांगे धारयति यथार्थज्ञानं प्राप्तः । तस्य पूर्वोक्तगुणविशिष्टस्य । कर्मसंगरकेलिषु कर्मभिर्ज्ञानावरणादिभिः सह यः संगरो युद्धं तस्मिन् याः केलयो दुःखाघातरूपाः क्रीडास्तासु । भीर्भयं । क्व भवेत् ? न क्वापि । वाथवा भंगः पराजयः । क्व ? ज्ञानोदयेन निरस्तभयमोहनीयत्वान्न क्वापीत्यर्थः ॥ ६ ॥

भयकृतपीडाऽज्ञानिनामेवास्तीत्याह—

**तूलवल्लघवो मूढा भ्रमन्त्यभ्रे भयानिलैः । नैकं रोमापि तैर्ज्ञानगरिष्ठानां तु कंपते ॥ ७ ॥**

तूलवदिति—हे माध्यस्थ्यभंगभीरो ! । मूढा अज्ञातस्वरूपाः । तूलवल्लघवस्तूलमर्कतरुरुतं तद्वत्तत्सदृशा लघवोऽल्पा महत्त्वेन रहिताः । भयानिलैर्भयानि पूर्वोक्तानि तान्येवानिला वायवस्तैः । अभ्रे सकललोकाकाशात्मके गगनमंडले । भ्रमन्ति नानाजन्मरूपस्थानात्स्थानान्तरे वर्तुलाकारेणाटन्ति । तु पुनः । ज्ञानगरिष्ठानां ज्ञानेन पूर्वोक्तेन गरिष्ठा गुरुतरा विशालबोधत्वेनातिमहान्त इति यावत् तेषां । तैर्भयानिलैः । एकमासतां प्रभूतानि एकमपीत्यपेरर्थः । रोम देहजः सूक्ष्मः केशः । उपलक्षणतो जीवप्रदेशास्तदपि । न कंपते नैजत इति ॥ ७ ॥

अथोपसंहारतो निर्भयतायाः स्थानं दर्शयन्नाह—



**चित्ते परिणतं यस्य चारित्रमकुतोभयम् । अखण्डज्ञानराज्यस्य तस्य साधोः कुतो भयम् ॥ ८ ॥**

चित्त इति—हे कल्याणाचरण! । अकुतोभयं न विद्यते कुतोऽपि कस्मादपि भयं भीतिर्यस्मिंस्तदकुतोभयं । चारित्रं सकलविभावनिवृत्तिपरिणामरूपः संयमः । यस्य भव्यजनस्य । चित्ते मनसि । परिणतं सकलात्मप्रदेशेष्वंगांगिभावेन व्याप्तं जातं । तस्य पूर्वोक्तरूपस्याखण्डज्ञानराज्यस्य न खण्डितं न दूषितं मिथ्यात्वविपर्याससंशयाशंसादिभिर्ज्ञानराज्यं ज्ञानं स्वभावानुयायी बोधस्तदेव राज्ञो भावः कर्म वा राज्यं तेजोज्ञानप्रकाशो यस्येति यावत् तस्य । साधोर्योगिनः । कुतः कस्मात् । भयं भीतिर्भवेत्? न कस्मादपि । यदुक्तं प्रशमरतौ—"आचाराध्ययनोक्तार्थभावनाचरणागुप्तहृदयस्य । न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥१॥"इति ॥८॥

॥ इति निर्भयाष्टकम् ॥ १७ ॥

## ॥ अथानात्मप्रशंसाष्टकम् ॥ १८ ॥

सप्तदशाष्टके निर्भयत्वमुक्तं, तत्तु सर्वाभिलाषत्यागेन भवति । यो निरभिलाषी, स तु निराशित्वेन स्वां प्रशंसां 
त्यजतीत्यतोऽष्टादशेऽष्टकेऽनात्मप्रशंसामाह—

**गुणैर्यदि न पूर्णोऽसि कृतमात्मप्रशंसया । गुणैरेवासि पूर्णश्चेत् कृतमात्मप्रशंसया ॥ १ ॥**

गुणैरिति—तावन्मुमुक्षुणा सर्वत्रैवं ध्येयं । हे आत्मन् ! त्वं यदि गुणैर्गुणाः परमोत्कृष्टा ज्ञानदर्शनत्यागवैराग्यक्षमाविनयौदार्यधैर्यगांभीर्यशौर्यादयस्तैः । पूर्णः सर्वथा बाह्याभ्यन्तरारिवर्गजयादिना प्राप्तगुणप्रकर्षत्वात्संपूर्णः । नासि न वर्तसे । तदा तवात्मप्रशंसया आत्मनः स्वस्य प्रशंसा स्तुतिः स्वयमेव स्वस्य वर्णनं परमुखतः श्रवणं वा, यथाऽहं ज्ञानी वा धन्योऽहं विनीत इत्यादिरूपा तया । कृतं सृतं मास्तु व्यर्थत्वाद्गुणवृद्धेरकारणत्वात् । चेद्यदि । गुणैः पूर्वोक्तरूपैः । एव निश्चितं । पूर्णोऽन्यूनत्वेन संपूर्णः । असि वर्तसे। तर्हि आत्मप्रशंसया स्वस्य वर्णनया । कृतमलं, मास्तु, तया विनैव गुणापूर्णतायाः सिद्धत्वान्न तया प्रयोजनमित्यर्थः ॥ १ ॥

स्वोत्कर्षपरापकर्षाभिलाषिणः स्वप्रशंसां कुर्वन्तः कारयन्तश्चात्मनः पुण्यतरुमूलं स्वयं निष्काशयन्तीत्याह—

**श्रेयोद्रुमस्य मूलानि स्वोत्कर्षाम्भःप्रवाहतः । पुण्यानि प्रकटीकुर्वन् फलं किं समवाप्स्यसि ॥ २ ॥**

श्रेय इति—हे मुमुक्षो ! पुण्यानि पवित्राणि यद्वा पुण्यानि स्वकृतपुण्यस्य शुभकर्मणो बन्धहेतूनि दानशीलतपोवात्सल्यभावनादीनि सुखफलदानीति यावत् । श्रेयोद्रुमस्य श्रेयोऽतिशयेन प्रशस्यसकलकल्याणहेतुर्धर्मो स एव द्रुमो मोक्षसुखादिमहाफलदो वृक्षस्तस्य । मूलानि भूम्यन्तर्गता वृक्षस्य स्थितिवृद्धिहेतुभूता बृहत्तन्तवस्तानि । स्वोत्कर्षाम्भःप्रवाहतः स्वस्यात्मनो य उत्कर्षोऽतिशययशसां जनमुखे विस्तारणं स एवांभो जलं तस्य प्रवाहः प्रवृद्धपूरस्तस्मात् । प्रकटीकुर्वन् अप्रकटानि प्रकटानि यथा कृतानि भवन्ति तथा कुर्वन् । यथा वृक्षस्य मूलानि मृदाच्छादितान्यपि भूमेर्बहिः कुर्वन् पुमान् किमपिफलं नाप्नोति तद्वदप्रकाशनीयानि स्वसुकृतानि बहिः प्रशंसया प्रकटीकुर्वन् त्वं । किमिति किंचिन्मात्रमपि वा किंनामकं फलं कार्यसिद्धिजनकपुण्यबन्धादिप्राप्यं । समवाप्स्यसि प्राप्स्यसि ? न किंचिदपीत्यर्थः ॥ २ ॥

स्वप्रशंसनेनावलंबिताः स्वगुणा दुःखदा भवन्तीत्याह—

**आलंबिता हिताय स्युः परैः स्वगुणरश्मयः । अहो स्वयं गृहीतास्तु पातयन्ति भवोदधौ ॥ ३ ॥**

आलंबिता इति—हे श्रद्धालो परैरात्मव्यतिरिक्तजनैः । आलंबिताः स्तुतिद्वारेण गृहीताः । स्वगुणरश्मयः स्वस्य स्वकीया गुणा ज्ञानादयो धर्मास्त एव रश्मयो रज्जवः । हिताय परेषामायतिसुखाय । स्युर्भवन्ति । तु पुनः । अहो महदाश्चर्यं त एव स्वगुणरश्मयः । स्वयं गृहीतास्तु जीवेन स्वगुणस्तुतिकरणमुखेन गृहीताः सन्तः । भवोदधौ संसारजलधिमध्ये । पातयन्ति स्वाधारभूतात्मानं निमज्जयन्ति, नदीपूरं संतरतामेकतरहस्तेनान्यतरस्वभुजावलंबनवत् । यदुक्तं—" न सौख्यसौभाग्यकरा नृणां गुणाः स्वयं गृहीताः सुदृशां कुचाविव । परैर्गृहीता द्वयमेव तन्वते न तेन गृह्णन्ति बुधा निजान् गुणान् ॥ १ ॥ इति ॥ ३ ॥

स्वोत्कर्षरूपज्वरनिवारणमौषधमुपदिशति—

**उच्चत्वदृष्टिदोषोत्थस्वोत्कर्षज्वरशान्तिकम् । पूर्वपुरुषसिंहेभ्यो भृशं नीचत्वभावनम् ॥ ४ ॥**

उच्चत्वेति—हे पुण्याशय उच्चत्वदृष्टिदोषोत्थस्वोत्कर्षज्वरशान्तिकमुच्चत्वं स्वस्मिन् ज्ञानरूपबलकुलजातिसमृद्धितपोमुख्यगुणैरितरेभ्यः प्रधानत्वविलोकनं, यथैतेभ्यो ज्ञानादिसमृध्ध्याहं समधिकोऽस्मीति । तदेव दृष्टिदोषः क्रूरप्रकृतिजनचक्षुर्दोषः, तस्मादुत्थः समुद्भूतो यः स्वोत्कर्षज्वरः स्वस्मिन्नात्मनि य उत्कर्षोऽतिशयेन गर्वोद्रेकः स एव ज्वरो दाहकारिरोगविशेषस्तस्य यच्छान्तिकं शमनं तदुपशान्तिकारणमिति यावत् । एतदग्रे वक्ष्यमाणं ज्ञेयं । किं तत् ? यत् पूर्वपुरुषसिंहेभ्यः पूर्वं पुराकाले भूता ये पुरुषा एव सिंहाः पुरुषप्र-

धानाः शौर्यधैर्यगांभीर्याद्यनन्तगुणभाजो गौतमसुधर्मादयस्तेभ्यः । भृशमत्यर्थं । स्वस्येति शेषः । नीचत्वभावनं नीचत्वं तेभ्यो गुणै-र्हीनत्वं तस्य भावनं मनसि चिन्तनं, यथाऽहो सकलश्रुतपारगा महातपोवीर्यसंपन्नाः सर्वलब्धिनिधयो गौतमादयः क्व ? सर्वगुणशक्ति-विकलजनोपहसनीयोऽहं च क्वेति । तदेव स्वोत्कर्षमदज्वरप्रशमनमौषधमित्यर्थः ॥ ४ ॥

परवस्तुजनितोत्कर्षेऽपि आत्मनोऽणुमात्रोऽपि गुणो न भवतीत्याह—

**शरीररूपलावण्यग्रामारामधनादिभिः । उत्कर्षः परपर्यायैश्चिदानन्दघनस्य कः ॥ ५ ॥**

शरीरेति—हे गुणशालिन् यः परपर्यायैः परेषामात्मव्यतिरिक्तपुद्गलपरमाणूनां ये पर्याया नवपुराणसुन्दरासुन्दरादित्वेन परि-णमनपरिणामा वर्तन्ते तैः परपर्यायरूपैः । शरीररूपलावण्यग्रामारामधनादिभिः शरीरं बलवत्तरकायः, रूपं सुन्दराकृतिः, लावण्यं देहकान्तिविशेषः देहस्य स्निग्धा कान्तिरित्यर्थः, ग्रामा नगरविशेषाः, आरामाः पुष्पफलोपेता नानाजातीयद्रुमसंहतिमनोहरा वाटिकाः, धनानि काञ्चनादीनि, तेषां द्वन्द्वे कृते तान्यादीनि येषां, आदिपदात्मणिपुत्रवस्त्रालंकारगृहादयो ग्राह्याः, तैः । चिदानन्दघनस्य ज्ञानानन्दसन्दोहमयस्यात्मनः । कः को नाम । उत्कर्षोऽतिशयगुणः । न कोऽपि परकीयोत्कर्षस्यात्मपक्षे व्याप्तेरभावत्वादिति ॥ ५ ॥

विदितवस्तुभावस्य स्वप्रशंसाया अवकाश एव नास्तीति दर्शयन्नाह—

**शुद्धाः प्रत्यात्मसाम्येन पर्यायाः परिभाविताः । अशुद्धाश्चापकृष्टत्वान्नोत्कर्षाय महामुनेः ॥ ६ ॥**

शुद्धा इति—हे आत्मतत्वाभिलाषिन् । येन ज्ञानिनेत्यध्याहारः । शुद्धा ये सकलावरणोपाधिवर्जितत्वेन विमलाः । पर्याया

ज्ञानदर्शनवीर्यविशेषरूपात्मधर्मास्ते । प्रत्यात्मसाम्येन आत्मानमात्मानं प्रति भवतीति प्रत्यात्मैकैकं जीवं प्रतीति यावत् । समं तुल्यं सदृशं तद्भावः साम्यं तेन सर्वजीवानामन्यूनाधिकसंख्यापरिमाणत्वेनेति भावः । परिभाविताः सम्यग्ज्ञानेन परिज्ञाताः स्वबुद्धौ परिणामिताः सन्तः तुल्यवस्तुत्वज्ञातुः महामुनेः महानतुलश्चासौ मुनिर्मननशीलो यः स तस्य उत्कर्षाय न भवन्ति क्व तत्र स्वोत्कर्षावकाशः ? आत्मधर्म्या सर्वेषामपि तुल्यत्वेनाधिक्यस्य त्रिविष्टपेऽपि स्थामाभावादित्यर्थः । च पुनः । येऽशुद्धा अनात्मीयभावत्वेन कर्मपुद्गलजनितत्वेन च सदोषाः सुरेन्द्रचक्रवर्तित्वादयस्ते तु । अपकृष्टत्वात् अपकृष्टा जगज्जनोच्छिष्टत्वेन जीवस्य सर्वदाऽसहवर्तित्वेन चाधमास्तद्भावस्तत्त्वं तस्माद्धेतोः । तस्य स्वोत्कर्षाय स्वस्मिन्मदाय न भवन्तीत्यर्थः ॥ ६ ॥

अथ शिक्षामुपदिशन्नाह—

**क्षोभं गच्छन् समुद्रोऽपि स्वोत्कर्षपवनेरितः । गुणौघान् बुद्बुदीकृत्य विनाशयसि किं मुधा ॥ ७ ॥**

क्षोभमिति—हे आत्मतत्वोन्मुख । त्वयेत्थमनिशं चिन्तनीयम् । हे आत्मन् यथा स्वोत्कर्षपवनेरितः स्वस्मिन् पातालकलशानामधोभागेषु गत उत्कर्षातिशायी पवनो वायुसमूहस्तेनेरितः प्रेरितः । समुद्रोऽप्यत्यगाधजलसागरोऽपि । साधारणजलाशयानां तु का कथा इत्यपेरर्थः । क्षोभं व्यर्थमितस्ततः संचलनं । गच्छन् प्राप्नुवन् । गुणौघान् गुणा रसाजलानि तेषामोघाः समूहास्तान् । बुद्बुदीकृत्य अबुद्बुदान् बुद्बुदान् यथासंपद्यमानान् कृत्वेति बुद्बुदीकृत्य । मुधा निरर्थकं । विनाशयति । तथैव त्वं समुद्रोऽपि सह मुद्रया मुनिवेषेण काञ्चनादिधनसंग्रहेण वा वर्तते यः स समुद्रः । तर्हि निर्मुद्रस्य किमुच्यते । स्वोत्कर्षपवनेरितः स्वस्मिन् गुणित्वादिनात्मप्रशंसनोत्थ उत्कर्षोऽतिशयितो मदः, स एव पवनः प्रोच्छलनव्यापारस्तेनेरितः कंपितः । क्षोभं चित्तविक्षेपं गच्छन् । गुणौघान्

ज्ञानस्थैर्यनिःस्पृहत्वादिधर्मस्तोमान् । बुद्बुदीकृत्य वाचाटत्वेन बम्बभाटो इति लोकप्रसिद्धिम् नीत्वा । मुधा निष्फलं यथा स्यात् तथा । किं विनाशयसि किं विनाशं नयसि ? मा विनाशयेत्यर्थः ॥ ७ ॥

अथ स्वप्रशंसावर्जनं फलदर्शनद्वारेणोपसंहरति—

**निरपेक्षानवच्छिन्नानन्तचिन्मात्रमूर्तयः । योगिनो गलितोत्कर्षापकर्षानल्पकल्पनाः ॥ ८ ॥**

**निरपेक्षेति**—हे जिज्ञासो गलितोत्कर्षापकर्षानल्पकल्पना गलिता प्रणष्टा उत्कर्षोऽधिकतादृष्टिकृतमदः अपकर्षो हीनभावावलोकनजा दीनता ताभ्यामुत्पादिता या अनल्पा अतिप्रभूताः कल्पना विकल्पश्रेणयो मनोरथमाला इति यावत् येषां ते । योगिनो मुनीश्वराः । निरपेक्षानवच्छिन्नानन्तचिन्मात्रमूर्तयो निरपेक्षा निर्गताऽपेक्षा सकलाकांक्षा स्वाधीनसकलसुखत्वेनाविद्यमानपराशाऽत एवानवच्छिन्ना क्षेत्रतः स्थानपरावर्त्या कालतः स्थित्यंतरप्राप्त्या भावतः स्वरूपावस्थान्तरापत्त्या न संकुचिता विस्तरिता वा या सदैवावस्थितैकरूपेत्यर्थः । अनन्ता चिन्मात्रमूर्तिरनन्तमनन्तवस्तुविषयं सकलज्ञेयज्ञापकमिति यावत् । यत् चित् ज्ञानं तन्मात्रा तदेव सर्वात्मिका या सा मूर्तिः स्वरूपस्थितेरवस्थानं येषां ते तथोक्तप्रकारा निरंजना भवन्तीत्यर्थः ॥ ८ ॥

॥ इत्यनात्मप्रशंसाष्टकम् ॥ १८ ॥

# ॥ अथ तत्त्वदृष्ट्यष्टकम् ॥ १९ ॥

अष्टादशाष्टकेऽनात्मशंसा प्रोक्ता, सा तु तत्त्वदृष्टेः कर्तुं शक्येत्यत एकोनविंशेऽष्टके तत्त्वदृष्टिः प्रतिपाद्यते—

**रूपे रूपवती दृष्टिर्दृष्ट्वा रूपं विमुह्यति । मज्जत्यात्मनि नीरूपे तत्त्वदृष्टिस्त्वरूपिणी ॥ १ ॥**

रूप इति—रूपवती दृष्टिः रूपमाकारवर्णगन्धरसस्पर्शवत्त्वं विद्यते यस्याः सा रूपवती दृष्टिः यस्य चर्मचक्षुषः पुंसः । रूपं पुद्गलजनिताकारादिकं । दृष्ट्वा विलोक्य । रूपे सुरूपाकारवर्णादिमत्स्त्रीपुरुषशरीरादिके । विमुह्यति विविधप्रकारतोऽज्ञानजनितमूर्छया भ्रान्तिं याति । तु पुनः । यस्य अरूपिणी न विद्यते रूपमाकारवर्णादिमत्त्वं यस्याः सा । ईदृशी तत्त्वदृष्टिस्तत्त्वभूता प्रदीपेन्द्रियनिरपेक्षत्वेन स्वतंत्रा निरुपचारा स्वयमेव साक्षाद्वस्तुसद्भावविलोकनसमर्थेति यावत् । तद्रूपा दृष्टिर्ज्ञाननेत्रं । नीरूपे निर्गतं रूपमाकारवर्णादिमत्त्वं यस्मात्स तस्मिन् । आत्मनि निर्विकारचिदानन्दस्वरूपे । निमज्जति निमग्ना भवतीति ॥ १ ॥

अथ पूर्वोक्तदृष्ट्योः स्वरूपं विशदयन्नाह—

**भ्रमवाटी बहिर्दृष्टिर्भ्रमच्छाया तदीक्षणम् । अभ्रान्तस्तत्त्वदृष्टिस्तु नास्यां शेते सुखाशया ॥ २ ॥**

भ्रमवाटीति—यस्य पुंसो बहिर्दृष्टिः बहिर्बाह्या अनात्मीयाः शरीरकुटुंबादिपदार्थास्तेषु दृष्टिः स्वकीयत्वेन दर्शनं सा । भ्रमवाटी भ्रमो मिथ्याज्ञानं चित्तभ्रान्तिर्वा तस्य वाटी निवासभूमिर्ज्ञेया । तदीक्षणं तस्या बहिर्दृष्टेरीक्षणं विलोकनं नेत्रं वा । भ्रमच्छाया भ्रमस्य पूर्वोक्तरूपस्य छाया प्रतिबिंबं वर्तते । अथवा जीवस्य या बहिर्दृष्टिः सा भ्रमवाटी भ्रमस्यारामभूमिः, तदीक्षणं बहिर्दृष्ट्या विलोकनं भ्रमच्छाया भ्रमारामस्य छायाऽनातपभूप्रदेशोऽस्ति । स यदा यत्किञ्चिदवलोकयति तत्तदात्मनि भ्रमजनकत्वेन प्रतिबिंबति । तु पुनः । अभ्रान्तो भ्रमवर्जितसत्यज्ञानयुक्तः । तत्त्वदृष्टिः परमार्थदर्शी । सुखाशया सुखस्याशा वाञ्छा तया । अस्यां भ्रमभूम्यां तच्छायायां वा । न शेते न स्वपिति न भ्रमं प्राप्नोति, सर्वत्र निर्भ्रान्तमेव पश्यतीत्यर्थः ॥ २ ॥

पुनरपि द्वयोरन्तरं दर्शयन्नुपदिशति—

**ग्रामारामादि मोहाय यद्दृष्टं बाह्यया दृशा । तत्त्वदृष्ट्या तदेवान्तर्नीतं वैराग्यसंपदे ॥ ३ ॥**

**ग्रामारामेति**—बाह्यया बहिराकारादिदर्शने प्रवृत्तया । दृशा दृष्ट्या । यच्छुभाशुभानुकूलप्रतिकूलं । ग्रामारामादि ग्रामाः समृद्धासमृद्धनगरविशेषाः, आरामा रम्योद्यानानि, त आदयो यस्य तत्तथा । आदिपदाद्गजतुरंगवनितावस्त्रालंकारादयो ग्राह्याः । दृष्टं विलोकितं सत् । मोहाय मोहनीयकर्मबन्धभ्रमाज्ञानरूपजडभावद्वृद्धये भवति । तदेव ग्रामारामाद्येव । तत्त्वदृष्ट्या परमार्थग्राहिण्या ज्ञानदृशा । अन्तर्नीतं स्वरूपे प्रापितं समालोचितं सत् । वैराग्यसंपदे विगतो रागो विरागस्तस्य भावो वैराग्यं निवृत्तिस्तद्रूपा या संपत्समृद्धिस्तस्यै तत्प्राप्तये भवतीति ॥ ३ ॥

अथ श्लोकचतुष्टयेन बाह्यदृष्टितत्त्वदृष्ट्योर्विलोकनप्रकारं दर्शयन्नाह—

**बाह्यदृष्टेः सुधासारघटिता भाति सुन्दरी । तत्त्वदृष्टेस्तु सा साक्षाद्विण्मूत्रपिठरोदरी ॥ ४ ॥**

**बाह्यदृष्टेरिति**—हे विशुद्धबुद्धे । बाह्यदृष्टेर्बाह्ये देहाकारादिके दृष्टिर्दर्शनवृत्तिर्यस्य तस्य । सुन्दरी दैवी मानुषी च स्त्री । सुधासारघटिता सुधाऽमृतं तस्यास्तस्यां वा यः सारः श्रेष्ठत्वं दध्नो म्रक्षणवदग्र्यमिति यावत्, तेन घटिता रचिता । भाति दृग्मार्गेऽवतरति । तु पुनः । तत्त्वदृष्टेस्तत्त्वं परमार्थभूतवस्तुसारः तस्मिन् गता दृष्टिर्दृग् यस्य तस्यान्तर्विलोकिनः । सा पूर्वोक्ता सुन्दरी । साक्षाद्विण्मूत्रपिठरोदरी साक्षात्प्रत्यक्षेण विट् विष्ठारूपमलः, मूत्रं प्रस्रवणं तयोः पिठरं स्थाली गृहं वा तद्रूपमुदरं जठरं यस्याः सा । तादृशी भाति दृग्मार्गेऽवतरतीति ॥ ४ ॥

**लावण्यलहरीपुण्यं वपुः पश्यति बाह्यदृग्। तत्त्वदृष्टिः श्वकाकानां भक्ष्यं क्रमिकुलाकुलम् ॥ ५ ॥**

लावण्येति—बाह्यदृग् बाह्या बहिर्वर्तिनी दृग्दृष्टिर्यस्य सः। वपुः शरीरं। लावण्यलहरीपुण्यं लावण्यं कान्तेः सौन्दर्यं तस्य या लहर्यस्तरंगास्ताभिः पुण्यं पवित्रं, अहो कीदृक्शोभनमस्य शरीरमित्येवं। पश्यति विलोकयति। तत्त्वदृष्टिरन्तर्दृष्टिस्तु पुरुषः। लावण्यलहरीपुण्येन लसदपि शरीरं। श्वकाकानां शुनां कुर्कुराणां काकानां च वायसानां। भक्ष्यं भक्षणीयं। क्रमिकुलाकुलं क्रमयः कीटाविशेषास्तेषां कुलं राशिस्तेनाकुलं भृतं पश्यतीति ॥ ५ ॥

**गजाश्वैर्भूपभुवनं विस्मयाय बहिर्दृशः। तत्राश्वेभवनात्कोऽपि भेदस्तत्त्वदृशस्तु न ॥ ६ ॥**

गजाश्वैरिति—बहिर्दृशो बहिरतत्त्वग्राहिणी दृग्दृष्टिर्यस्य तस्य। गजाश्वैर्गजा हस्तिनोऽश्वाश्च तुरंगमास्तैः शोभितं। भूपभुवनं राजमंदिरं। दृग्विषयगतं सत्। विस्मयाय अहो पुण्यवानयं नृपो य ईदृग्दुर्लभं प्राप्त इत्येवंरूपाश्चर्यप्रकर्षजननाय भवति। तत्त्वदृशस्तु परमार्थदर्शिनस्तु। तत्र तस्मिन्नृपागारे। अश्वेभवनादश्वानां वाजिनामिभानां च करिणां यद्वनं तेषामुत्पत्तिस्थानभूतविन्ध्याचलाद्यटवी तस्मात्। कोऽपि कश्चिदपि। भेदो न्यूनाधिकत्वेनान्यत्वं। न विद्यते। राजमन्दिरस्थवनस्थगजादेः समानत्वादिति ॥ ६ ॥

**भस्मना केशलोचेन वपुर्धृतमलेन वा। महान्तं बाह्यदृग्वेत्ति चित्साम्राज्येन तत्त्ववित् ॥ ७ ॥**

भस्मनेति—बाह्यदृग् बाह्यदृष्टिः पुमान्। भस्मना देहावगुंठितरक्षया देहोपलिप्तभस्मनेतियावत्। केशलोचेन केशाः शिरोजादिलोमविशेषास्तेषां लोचः समुत्पाटनं तेन। वाऽथवा। वपुर्धृतमलेन वपुषि शरीरे धृतः समालीढो यो मलो बहुरजोमिश्रप्रस्वेदकृतपंकस्तेन मलमलीनवस्त्रगात्रेणेति यावत्। महान्तं गुणगणाढ्यं पुरुषोत्तमं। वेत्ति समवधारयति। तत्त्ववित् परमार्थग्राहित्वेनान्तर्गतगुणा- ॥४५॥

राशिदर्शी तु । चित्साम्राज्येन चित् अन्तःसमुद्भवत्पापनिषेधकज्ञानं तस्य साम्राज्यं शुद्धिपाटवप्रकर्षत्वेन प्रचुरत्वं तेन । महान्तं गरिष्ठं जानातीत्यर्थः ॥ ७ ॥

अथ तत्त्वदृष्टिं स्तुवन्नुपसंहरति—

**न विकाराय विश्वस्योपकारायैव निर्मिताः । स्फुरत्कारुण्यपीयूषवृष्टयस्तत्त्वदृष्टयः ॥ ८ ॥**

न विकारायेति—भो भव्यस्वान्त स्फुरत्कारुण्यपीयूषवृष्टयः स्फुरज्जाग्रत्स्वभावत्वेन विस्तरत् करुणाया भावः कारुण्यं करुणारसप्रचुरता तदेव पीयूषममृतं तस्य वृष्टयो वर्षणरूपाः । एवं विधास्तत्त्वदृष्टयस्तत्त्वं निरुपचरितवस्तुसद्भावस्तस्य दृष्टयो दृशः । यद्वा तत्त्वदृष्टयस्तत्त्वदर्शनशीलाः सत्पुरुषाः । एव निश्चितं । विश्वस्य त्रिभुवनस्य । उपकाराय सज्ज्ञानोपदेशादिनायतिसुन्दरत्वाय । निर्मिताः सज्ज्ञानसुहृद्रूपेण पुण्योदयरूपेण च धात्रा रचिताः सन्ति । परंतु विकाराय भ्रान्त्यज्ञानादिरूपचित्तविभ्रमाय परेषां सन्तापाय च न निर्मिता इति ॥ ८ ॥

॥ इति तत्त्वदृष्ट्यष्टकम् ॥ १९ ॥

## ॥ अथ सर्वसमृध्ध्यष्टकम् ॥ २० ॥

एकोनविंशे तत्त्वदृष्टिरुक्ता, सा तु निवृत्तेच्छत्वेन बाह्यदृष्टेरभावात्सर्वसमृद्धिमतां भवतीत्यतो विंशेऽष्टके सर्वसमृध्धयः प्रदर्श्यन्ते—

**बाह्यदृष्टिप्रचारेषु मुद्रितेषु महात्मनः । अन्तरेवावभासन्ते स्फुटाः सर्वाः समृद्धयः ॥ १ ॥**

बाह्यदृष्टीति—हे मेधाविन् जिज्ञासो बाह्यदृष्टिप्रचारेषु बाह्यदृष्टिः पूर्वोक्ता तस्या ये प्रचारा आत्मस्वभावव्यतिरिक्तविषयान्तरसंचारकप्रवर्तनप्रकारास्तेषु। मुद्रितेषु निरुद्धेषु सत्सु। महात्मनः सद्भाववेदिमहापुरुषस्य। अन्तरेव एवोऽवधारणे तेनान्तः स्वात्मन्येव, न तु क्वचिद्धनवनितारामादिके बाह्यभावे। सर्वास्त्रिभुवनस्था अशेषाः। समृद्धयः संपदः। स्फुटाः प्रकटप्रकाशाः। अवभासन्ते स्वानुभवेन प्रत्यक्षरूपा दृश्यन्ते। तत एव निवृत्तसकलेच्छाः सहजसुखलीनास्तिष्ठन्तीत्यर्थः॥ १॥

लोके चेन्द्रस्य सर्वसमृद्धिमत्त्वान्मुनेरपि प्रथममिन्द्रर्द्धया समृद्धत्वं दर्शयन्नाह—

**समाधिर्नन्दनं धैर्यं दम्भोलिः समता शची। ज्ञानं महाविमानं च वासवश्रीरियं मुनेः॥ २॥**

समाधिरिति—हे अंग मुनेर्योगीश्वरस्य। इयं वक्ष्यमाणस्वरूपा। वासवश्रीर्वसवो देवास्ते वशे सन्ति यस्येति वासवो महेन्द्रस्तत्संबन्धिनी तद्भोग्या वा श्रीर्विमानादिसंपद्वर्तते। का सा किंस्वरूपा चेत्याह—समाधिस्त्रियोगस्यैकाग्रत्वेन निजस्वरूपे मग्नता तद्रूपं नन्दनं मुनीन्द्रस्य रतिदो रमणीयारामः। तथा धैर्यं सत्यपि परिषहोपसर्गवर्गे निजस्वभावे स्थिरनिश्चलपरिणामित्वं, तदेव दम्भोलिः कर्मदैत्यनिकन्दनं वज्रं। तथा समता शची समता सर्वत्रेष्टानिष्टत्वविकल्पपरिहारेण तुल्यदर्शित्वं, सैव शची स्वरूपसंगमकारिज्ञानवचनादिविलासदायिनीन्द्राणी। तथा ज्ञानं स्वपरस्वरूपनिर्धारकारिबोधः, तद्रूपं महाविमानं गगनगामिदेवयानमस्ति॥ २॥ 

मनुष्येषु सर्वमहर्द्धिकश्चक्रवर्ती भवतीत्यतो मुनेश्चक्रित्वं दर्शयन्नाह—

**विस्तारितक्रियाज्ञानचर्मच्छत्रो निवारयन्। मोहम्लेच्छमहावृष्टिं चक्रवर्ती न किं मुनिः॥ ३॥**

विस्तारितेति—विस्तारितक्रियाज्ञानचर्मच्छत्रो विस्तारिते क्रमेण चक्रयपेक्षयाऽध उपरि च स्फारीकृते मुनिचक्रयपेक्षया प्रचुरतां नीते, क्रिया च सकलसाध्वाचाररूपा ज्ञानं च समस्तवस्तुस्तोमसद्भावविकाशकमत्यादिरूपं, ते एव क्रमेण चर्मच्छत्रे चर्मरत्नच्छत्ररत्ने येन सः। अत्र क्रियायाः सकलगुणसस्यस्योत्पत्तिस्थानत्वेन धर्मसैन्यस्याप्रतिपातित्वसंपादनाधारत्वेन च चर्मरत्नता, ज्ञानस्य चान्यापतध्ध-र्मोपघातसर्वपरितापपरिहारित्वेन छत्ररत्नता ज्ञेया। मोहम्लेच्छमहावृष्टिं मोहो मोहनीयकर्म स एव म्लेच्छः सर्वजनक्षितत्वेन सर्वाकार्यका-रित्वेन सतामुपद्रवकारित्वेन चोत्तरखंडवासियवनसमूहः तेन कृताऽतिदुर्वारमिथ्यात्वदैत्याराधनप्रयोगेण महावृष्टिर्निरन्तरकुवासनारूप-जलधारासंपातस्तां। निवारयन् पूर्वोक्तज्ञानक्रियाचर्मच्छत्ररत्नाभ्यां निषेधयन्। एवंगुणसमृद्धः मुनिर्योगीश्वरः। किं चक्रवर्ती सार्व-भौमो न भवति? अपि तु भवत्येवेति॥ ३॥

लोके शेषनागो महर्द्धिको गीयतेऽतस्तत्समृद्धिमत्त्वं मुनेराह—

**नवब्रह्मसुधाकुंडनिष्ठाधिष्ठायको मुनिः। नागलोकेशवद्भाति क्ष्मां रक्षन् प्रयत्नतः॥ ४॥**

नवब्रह्मेति—हे सद्भावभावन शिष्यमणे नवब्रह्मसुधाकुंडनिष्ठाधिष्ठायको नवभिः संख्येयानि यानि ब्रह्मचर्यस्वरूपप्रतिपादका-न्याचारांगस्याध्ययनानि, यद्वा वसतिकथानिषिद्येन्द्रियनिरीक्षणकुड्यान्तरस्थितिपूर्वक्रीडितस्मरणप्रणीताहारातिमात्राहारविभूषावर्ज-नरूपा नवधा ब्रह्मगुप्तयः, तान्येव ता वा ये सुधाकुंडा जन्मादिसर्वरोगापहारिसदुपायदर्शिज्ञानपीयूषभृतपात्राणि, तेषु या निष्ठा उत्क-र्षता स्थितिर्मर्यादा वा तत्रोक्ताचारस्य पारप्राप्तिर्वाऽस्ति यस्य, स चासावधिष्ठायको रक्षाप्रयत्नव्याप्तिमान् वा तत्सामर्थ्ययुक्तोऽवेक्षको

वा । स मुनिर्योगीश्वरः । प्रयत्नतः प्रौढोद्यमेन । क्ष्मां क्षान्ति महीं च । रक्षन् धारयन् । नागलोकेशवन्नागलोकः पाताललोकस्तस्य य ईशः स्वाम्यनन्तनागस्तद्वत्तेन सदृशः । भाति शोभते । अनन्तनागस्य नवसुधाकुंभस्वामित्वं क्षमाधारित्वं च लोकप्रसिध्ध्या ज्ञेयमिति ॥ ४ ॥

लोके शिवविष्णुब्रह्मणां महर्द्धिकत्वं प्रसिध्धमतस्त्रिभिः श्लोकैर्मुनेस्तत्समृध्धिमत्त्वमाह—

**मुनिरध्यात्मकैलाशे विवेकवृषभस्थितः । शोभते विरतिज्ञप्तिगंगागौरीयुतः शिवः ॥ ५ ॥**

मुनिरिति—हे विनीत अध्यात्मकैलाशे यन्निर्मोहानां शुध्धज्ञानक्रियात्मकमनुष्ठानं तदध्यात्मं तद्रूपो यः कैलाशः स्फटिकमयो लोकप्रसिद्धः शिवनिवासभूतः पर्वतस्तस्मिन् । विवेकवृषभस्थितो विवेकः स्वपरस्वरूपभिन्नतादिविचारवज्ज्ञानं स एव वृषभो नन्दिकस्तत्र स्थितः समारूढः । विरतिज्ञप्तिगंगागौरीयुतो विरतिः सकलपरभावाद्व्यावृत्तिरूपा परिणतिः, ज्ञप्तिः शुध्धज्ञानदशा, ते एव क्रमेण गंगागौर्यौ गंगोमानाम्न्यौ वल्लभे ताभ्यां युतः समालिंगितः । विरतिप्रवाहस्य सर्वलोकव्याप्येकेन्द्रियादिवधनिवृत्त्या दूरतरं यावद्व्याप्तत्वाद्गंगोक्तिः ज्ञप्तेस्त्वात्मनि सर्वांगीणतया समालिंगितत्वेनार्धांगीकृतया गौर्या समानत्वोक्तिः कृता । मुनिस्तद्रूपः । शिवो निरुपद्रवकृदीश्वरः । शोभते सकलाध्यक्षतया विराजत इति ॥ ५ ॥

**ज्ञानदर्शनचन्द्रार्कनेत्रस्य नरकच्छिदः । सुखसागरमग्नस्य किं न्यूनं योगिनो हरेः ॥ ६ ॥**

ज्ञानेति—ज्ञानदर्शनचन्द्रार्कनेत्रस्य ज्ञानं वस्तुनो विशेषस्वभावग्राहि स्याद्वादबोधः, दर्शनं शुद्धश्रद्धानात्मकं सम्यक्त्वं सामान्यस्वभावग्राहि निराकारबोधो वा, ते एव क्रमेण चन्द्रार्कौ मृगांकभास्करौ, तन्मये नेत्रे नयने यस्य तस्य । लोके हरिश्चन्द्रार्कनयनो गीयते । अत्र ज्ञानस्य तत्त्वप्रकाशकत्वेन संतापहर्तृत्वेन च चन्द्रत्वं, सम्यक्त्वस्य च तीव्ररुचिकारित्वेन तत्त्वान्तनिर्धारकारित्वेन चार्कत्व-

मिति। तथा नरकच्छिदः सम्यग्मोक्षोपायसेवनेन नरकमधोगतिगमनं छिनत्ति तत्प्रायोग्यकर्म न बध्नातीति नरकच्छित्तस्य। विष्णुनापि नरकनामासुरश्छिन्न इति लोकोक्तिः। तथा सुखसागरमग्नस्य सुखं सहजं परमानन्दरूपं तदेव सागरः क्षीरसमुद्रस्तत्र मग्नस्तन्मयतां गतस्तस्य। विष्णुरपि क्षीरसागरमग्न इति लोके प्रसिद्धं। योगिनो ब्रह्मविन्मुनीश्वरस्य। हरेर्विष्णुतः। किं किंनामकं सुखं। न्यूनं हीनमस्ति ? न किमपीत्यर्थः ॥ ६ ॥

**या सृष्टिर्ब्रह्मणो बाह्या बाह्यापेक्षावलंबिनी। मुनेः परानपेक्षान्तर्गुणसृष्टिस्ततोऽधिका ॥ ७ ॥**

या सृष्टिरिति—या लोकप्रसिद्धा। बाह्यापेक्षावलंबिनी बाह्यस्यानात्मीयत्वावस्य प्रकृतिमहत्पञ्चभूतादेर्योऽपेक्षा कार्यकारणसंबन्धस्तामवलंबते साहाय्यकतया गृह्णाति, तां विना कर्तुमशक्येति यावत्, या सा बाह्या देहेन्द्रियादिरूपा विनश्वराऽसत्या च ब्रह्मणो धातुः। सृष्टिः रचना भवति। मुनेः साधोस्तु। परानपेक्षान्तर्गुणसृष्टिः परेषां मायादीनामनपेक्षा कारणत्वेनानिच्छा यस्यां सैवान्तर्भूता विनश्वररूपा वा गुणानां ज्ञानादिधर्माणां सृष्टी रचना। ततो ब्रह्मणा रचितसृष्टितः। अधिकापरनिरपेक्षत्वेनाविनाशित्वेन विशिष्टाऽस्तीति ॥ ७ ॥

सर्वमहर्द्धिकोऽर्हन्, ततस्तत्पदप्राप्तिरपि मुनेः सुलभेति दर्शयन्नुपसंहरति—

**रत्नैस्त्रिभिः पवित्रा या स्रोतोभिरिव जाह्नवी। सिद्धयोगस्य साप्यर्हत्पदवी न दवीयसी ॥ ८ ॥**

रत्नैरिति—हे भव्य सिद्धयोगस्य सिद्धा निष्पन्ना योगा ज्ञानक्रियाध्यानेच्छाशास्त्रभक्तिसिद्धियोगादिभेदभिन्ना यस्य तस्य साधोः।

या त्रिभुवनप्रसिद्धा । त्रिभिःस्रोतोभिः प्रवाहैः । जाह्नवीव गंगेव । त्रिभिः त्रिसंख्यैः । रत्नैः सम्यग्दर्शनज्ञानचारित्रैः । पवित्रा पूजनीया विमला वा । अर्हत्पदवी अर्हन्तो जिनेश्वरास्तेषां संबन्धिनी या पदवी सुरेन्द्रश्रेणिभिः पूज्यता समवसृतिरचनाष्टप्रातिहार्यस्वर्णपंकजोपरिपादन्यासपूर्वकगमनतरुनतिपङ्क्तिप्रदक्षिणादिविभूतिभिर्विराजितपदप्राप्तिः । सापि दवीयसी दूरवर्तिनी न स्यादिति ॥८॥



॥ इति सर्वसमृध्ध्यष्टकम् ॥ २० ॥

# ॥ अथ कर्मविपाकध्यानाष्टकम् ॥ २१ ॥

गताष्टके सर्वसमृद्धिरुक्ता, तां च कर्मविपाकजयिनो लभन्तेऽत एकविंशेऽष्टके कर्मविपाको जेय इत्याह—

**दुःखं प्राप्य न दीनः स्यात् सुखं प्राप्य च विस्मितः । मुनिः कर्मविपाकस्य जानन् परवशं जगत् ॥१॥**

दुःखमिति—मुनिः साधुः । कर्मविपाकस्य कर्मणां ज्ञानावरणीयादीनां यो विपाकः फलोदयस्तस्य । परवशं पराधीनं । जगत्रिभुवनवर्ती सर्वोऽपि प्राणिगणोऽस्तीति जानन् स्वचित्ते सज्ज्ञानेन संप्रधारयन् । दुःखं परीषहोपसर्गादिजनितकष्टं । प्राप्य दुर्जनकर्मोदयाभ्यां लब्ध्वा । दीनो भयभ्रान्तहीनसत्त्वतया पीडितः । न स्यात् न भवेत् । च पुनः । सुखं पूजाबहुमानपुण्योदयादिजनितानन्दं । प्राप्य लब्ध्वा । विस्मितो हर्षाकुलो मदाकुलो वा न स्यात् । कर्मवशगानां तत्प्राप्तेः सुलभत्वादिति ॥ १ ॥



कस्मादेवं शिक्षयति भवान् ? यतः सांसारिकसुखदुःखादेरनित्यत्वादित्याह—

**येषां भ्रूभंगमात्रेण भज्यन्ते पर्वता अपि । तैरहो कर्मवैषम्ये भूपैर्भिक्षापि नाप्यते ॥ २ ॥**

येषामिति—हे शीलशालिन् येषां मुंजादिनृभुजां। भ्रूभंगमात्रेण भ्रूरुपरितननेत्रपत्रं, तस्य यो भंगः कोपाकारवक्ररचनोत्क्षेपस्तन्मात्रेण तद्भंगाज्ञासूचनमात्रोद्यमेन। पर्वता अपि गिरयोऽपि पर्वततुल्याभंगबलोपेतदुर्योधनादिसदृशपुरुषा अपि। भज्यन्ते चूर्यन्ते। अहो महत् कष्टं। तैस्तादृशबलोपेतैरपि नृपैर्भूमिपालैः, तर्हीतरेषां का वार्तेत्यपेरर्थः। कर्मवैषम्ये कर्मणां पूर्वकृतपुण्यापुण्यरूपाणां विषमस्य भावो वैषम्यं विपर्यासः शुभानां परिक्षयोऽशुभानां चोदय इति यावत्, तस्मिन् जाते सति। भिक्षापि भिक्षा कणशो याचना सापि, आस्तामन्यद्धनादिकं। नाप्यते न लभ्यते। एवं सांसारिकर्द्धेरनित्यतां मत्वा तयोर्विषये हर्षशोकौ त्यजेदित्यर्थः ॥ २ ॥

सुखस्यानित्यत्वमुक्तमथ दुःखस्य तद्दर्शयन्नाह—

जातिचातुर्यहीनोऽपि कर्मण्यभ्युदयावहे। क्षणाद्रंकोऽपि राजा स्याच्छत्रच्छन्नदिगन्तरः ॥ ३ ॥

जातीति—हे अभ्युदयेच्छो त्वं सदैवानाकुलः सन् दुःखानामप्यनित्यत्वं धारय। कुतः ? यतः कर्मणि शुभविपाकदायिनि सातावेदनीयसुरमनुजगत्युच्चैर्गोत्रादिके। अभ्युदयावहेऽभ्युदयोऽभीष्टकार्यजनकसाहाय्यगुणादिवृद्धिस्तमावहति प्रापयति यत्तस्मिन् सति। जातिचातुर्यहीऽनोपि जातिः क्षत्रियादिप्रधानकुले जन्मप्राप्तिश्चातुर्यं च सकलकलानैपुण्यं ताभ्यां हीनो वर्जितः सोऽपि। तर्हि ताभ्यां सनाथस्य तु किमुवक्तव्यम् इत्यपेरर्थः। नन्दादिवत् रंकोऽपि द्रमकभिक्षुरपि। क्षणात् स्वल्पकालात्। छत्रच्छन्नदिगन्तरश्छत्रैरातपत्रैश्छन्नानि समाच्छादितानि दिगन्तराणि दिशां विभागा येन सः। ईदृशो राजा सार्वभौममहीनाथः। स्याज्जायेत पुण्याढ्यादिवत्। तस्माच्छुभाशुभकर्मविपाके मुनिः समदृष्टिः स्यादित्यर्थः ॥ ३ ॥

कर्मसृष्टिरानन्ददायिनी न स्यादिति सदृष्टान्तमुपदिशति—

**विषमा कर्मणः सृष्टिर्दृष्टा करभपृष्ठवत् । जात्यादिभूतिवैषम्यात् का रतिस्तत्र योगिनः ॥ ४ ॥**

विषमेति—जात्यादिभूतिवैषम्याज्जातिरुत्तमाधमादिजन्मप्राप्तिः सा आदिर्यासां । आदिपदात्कुलबलरूपलक्ष्मीबुध्ध्यादयो ग्राह्याः । ता एव भूतयः संपदस्तासां वैषम्यं हीनोत्तमादिलाभरूपविषमत्वं विसदृशत्वमिति यावत् तस्मात् । कर्मणः प्राणिनां शुभाशुभादृष्टवशात् । या सृष्टिः फलोदयरचना सा । करभपृष्ठवत् उष्ट्रतनुपश्चाद्भागसदृशी । विषमा क्षणदृष्टनष्टसुखदुःखवत्त्वेन विसदृशरूपभयंकरा दृष्टा अनुभवतो ज्ञानदृष्टया च विलोकिताऽस्ति । तत्र तस्यां योगिनः साधोः । का कीदृशी । रतिः प्रीतिः स्यात् ? न कापीत्यर्थः ॥ ४ ॥

अथ त्रिभिःश्लोकैः कर्मविपाकस्य बलिष्ठतां दर्शयन्नाह—

**आरूढाः प्रशमश्रेणिं श्रुतकेवलिनोऽपि च । भ्राम्यन्तेऽनन्तसंसारमहो दुष्टेन कर्मणा ॥ ५ ॥**

आरूढा इति—अहो महत्कष्टं । यद्दुष्टेनाधमेन । कर्मणा मोहनीयादिकर्मोदयेन । प्रशमश्रेणिं प्रकृष्टः शमो मोहोदयशान्तिः सर्वथामोहानुदय इति यावत् सैव श्रेणिर्मोहोदयोपशान्तयेऽनन्तानुबन्ध्यादीनां रोधनक्रमो वा तत्परिपाटीकर्त्री परिणामधारा तां । आरूढा उपशामितसकलमोहोदयत्वेन निष्कषायचारित्रभावप्राप्तत्वेनाधःपातकारणविरहितास्तेऽपि । च पुनः । श्रुतकेवलिनः श्रुते श्रुतज्ञाने द्वादशांगीरूपे केवलिन इव केवलिनः सकलविपर्याससंशयातीतत्वेन प्राणिनामसंख्यातभवसंबन्धवेदिज्ञानवत्त्वेन श्रुतकेवलि- ||४९||

नस्तेऽपि ज्ञातसकलापायपरिहारोपाया अपि । अनन्तसंसारमनन्तोऽपरिमितो यः संसारो भवभ्रमणं तं । भ्राम्यन्ते कर्मविपाकवशेन परिवर्तयन्ते, तर्ह्यन्येषां का कथेत्यर्थः ॥ ५ ॥

**अर्वाक् सर्वापि सामग्री श्रान्तेव परितिष्ठति । विपाकः कर्मणः कार्यपर्यन्तमनुधावति ॥ ६ ॥**

अर्वागिति—भो भद्रभावन कार्यसिद्धिसाधनभूता सर्वापि समग्रापि प्राप्ता सामग्री कारणसाकल्यं । श्रान्तेव परिश्रमात् खिन्नेव । अर्वाक् कार्यसिद्धिकालात् प्राक्तन एव काले । परितिष्ठति कार्यनिष्पत्तिपर्यन्तमप्राप्तैवास्ते । कर्मणः शुभाशुभादृष्टस्य । विपाकः परिणामः । कार्यपर्यन्तं फलनिष्पत्तेरवसानं यावत् । अनुधावति कर्तुमनिष्टकार्यस्य निष्पत्त्यनुकूलभावेन गच्छति प्रवर्तमानो भवतीत्यर्थः ॥ ६ ॥

**असावचरमावर्ते धर्मं हरति पश्यतः । चरमावर्तिसाधोस्तु छलमन्विष्य दुष्यति ॥ ७ ॥**

असाविति—असौ पूर्वोक्तरूपः कर्मविपाकः । अचरमावर्ते न चरमावर्तोऽचरमावर्तस्तस्मिन् अनेकपुद्गलपरावर्तपरिमाणावशिष्टसंसारपरिभ्रमणे विद्यमाने सतीति शेषः । पश्यतः प्रयत्नेन रक्षणं कुर्वतोऽपि प्राणिनः । धर्मं सुकृतं । हरति बलाद्विनाशयति अतिक्लिष्टोदयत्वाद्धर्मपरिणामं मूलतः पातयतीत्यर्थः । तु पुनः । चरमावर्तिसाधोश्चरमः सर्वान्तिमो य आवर्तः पुद्गलपरावर्तकालोऽवशिष्टो यस्यास्ति तस्य साधोर्मुनीश्वरस्य तु । छलं प्रमादादिरूपच्छिद्रं । अन्विष्य विलोक्य । धर्मं दुष्यति मलिनयतीति ॥ ७ ॥

अथ विपाकचिन्तनफलदर्शनव्याजेनोपसंहरति—

**साम्यं बिभर्ति यः कर्मविपाकं हृदि चिन्तयन् । स एव स्याच्चिदानन्दमकरन्दमधुव्रतः ॥ ८ ॥**

साम्यमिति—यःकर्मविपाकविज्ञो योगी । कर्मविपाकं कर्मणां ज्ञानावरणादीनां विपाकं शुभाशुभविचित्रफलोदयं । चिन्तयन् निर्मलमनसा ध्यायन् । हृदि चित्ते । साम्यं समस्य भावः साम्यं सर्वस्योदयागतस्य क्षययोग्यत्वेन तुल्यदृष्टित्वं । बिभर्ति संप्रधारयति । स एव पूर्वोक्तस्वभाववानेव, न त्वनीदृशः । चिदानन्दमकरन्दमधुव्रतः चित् ज्ञानं तद्रूपस्तेन जनितो वा य आनन्दः सहजसुखरूपपरमाह्लादः, स एव मकरन्दः परिमलभरयुतं पुष्पमधु, तस्मिन् मधुव्रतस्तद्भोगिभ्रमरः । स्याद्भवेदिति ॥ ८ ॥

॥ इति कर्मविपाकध्यानाष्टकम् ॥ २१ ॥

## ॥ अथ भवोद्वेगाष्टकम् ॥ २२ ॥

एकविंशेऽष्टके कर्मविपाकचिन्तनमुक्तं, तत्तु भवोद्विग्नेन कर्तुं शक्यतेऽतो द्वाविंशेऽष्टके भवोद्विग्नत्वमाह । तत्र तावत्पञ्चभिः श्लोकैः संसारस्य समुद्रस्वरूपत्वं दर्शयति—

**यस्य गंभीरमध्यस्याज्ञानवज्रमयं तलम् । रुद्धा व्यसनशैलौघैः पन्थानो यत्र दुर्गमाः ॥ १ ॥**

यस्येति—तस्मादतिदारुणाद्भवांभोधेर्नित्यमुद्विग्नो ज्ञानी तस्य संतरणोपायं सर्वयत्नेन कांक्षतीति पञ्चमश्लोकेन संबन्धः । तस्य कस्येत्याह—यस्य वक्ष्यमाणस्वरूपस्य सागरस्य । गंभीरोऽत्यगाधो मध्योऽन्तर्वर्तिगर्तप्रदेशो यस्य तस्य । अज्ञानवज्रमयं अज्ञानं विपरीतबोधो बोधाभावश्च तद्रूपो यो वज्रो दुर्भेद्यलोहमयशस्त्रविशेषः, तन्मयं तेन निष्पादितं । तलं जलाधस्तनभूतलं वर्तते । तथा यत्र यस्मिन् भवांभोधौ । व्यसनशैलौघैर्व्यसनानि नानाजातीयकष्टानि तान्येव शैला गिरयस्तेषामोघाः समूहास्तैः । रुद्धा व्याकुलाः । पन्थानो मार्गाः । दुर्गमा दुःखेन गम्याः सन्ति । इति ॥ १ ॥

पातालकलशा यत्र भृतास्तृष्णामहानिलैः । कषायाश्चित्तसंकल्पवेलावृद्धिं वितन्वते ॥ २ ॥

पातालेति—यत्र यस्मिन् भवसागरे । तृष्णामहानिलैस्तृष्णा विषयसुखधनाद्याशास्ता एव महान्तोऽतिप्रचंडप्रभूता अनिला वायवस्तैः । भृताः पूर्णाः । कषायाः क्रोधादयः । तद्रूपाः पातालकलशाः पातालं नरकं यावत्स्वसमुच्छ्रयेण व्याप्ता लक्षलक्षयोजनोन्नतत्वात्कलशाः कुंभाकृतयो गर्ताः पातालकलशाः ते । चित्तसंकल्पवेलावृद्धिं चित्तं मनस्तेन कृतास्तस्मिन् जाता वा ये संकल्पा मनोरथास्तद्रूपा या वेला कूलपूरगतजलराशेर्विस्तीर्णदीर्घोन्नतकल्लोलवन्नितरांमनोरथोत्पत्तिस्तस्या या वृद्धिः संहतिस्तां । वितन्वते विस्तारयन्ति । इति ॥ २ ॥

स्मरौर्वाग्निर्ज्वलत्यन्तर्यत्र स्नेहेन्धनः सदा । यो घोररोगशोकादिमत्स्यकच्छपसंकुलः ॥ ३ ॥

स्मरेति—यत्र यस्मिन् भवाब्धौ । स्नेहेन्धनः स्नेहो जलं प्रेम च तद्रूपमिन्धनं दाह्यकाष्ठं यस्य स तथा । स्मरौर्वाग्निः स्मरः कामः स एवौर्वाग्निर्वडवानलः सः । सदा सर्वकालं । अन्तरभ्यन्तरे । ज्वलति प्रदीप्तोऽस्ति । तथा यो भवांभोधिः । घोररोगशोकादिमत्स्यकच्छपसंकुलो घोरा महाभयंकरा ये रोगाः कुष्ठभगंदरसन्निपातादयः शोका इष्टवियोगादिना जनितचित्तोद्वेगास्त आदयो येषां । आदिपदाद्भयमोहादयो ग्राह्याः । त एव मत्स्या झषाः कच्छपाश्च कूर्मास्तैः संकुलो व्याप्त इति ॥ ३ ॥

दुर्बुद्धिमत्सरद्रोहैर्विद्युद्दुर्वातगर्जितैः । यत्र सांयात्रिका लोकाः पतन्त्युत्पातसंकटे ॥ ४ ॥

दुर्बुद्धीति—यत्र भवांभोधौ । क्रमेण दुर्बुद्धिमत्सरद्रोहैर्दुर्बुद्धिर्दुष्टा पापकारिणी मतिः, मत्सरः परसुखादिष्वसहनपरिणामः,

द्रोहः परेषां घातादिचिन्तनं, तेषां द्वन्द्वे कृते तैः तद्रूपैः। विद्युद्दुर्वातगर्जितैरुद्देशानुक्रमतो विद्युतः सौदामिन्यः, दुर्वाता उपद्रवकारिणश्चक्रवातझंझावातादिवायवः, गर्जितानि निष्ठुरस्तनितानि, तेषां द्वन्द्वे कृते तैः। सांयात्रिका लोकाः सुदूरदेशयायिनो धर्मप्रवहणस्था जनाः। उत्पातसंकटे जन्मादिकष्टोपद्रवे। पतन्ति सुतरामवतरन्ति। इति ॥ ४ ॥

**ज्ञानी तस्माद्भवांभोधेर्नित्योद्विग्नोऽतिदारुणात्। तस्य संतरणोपायं सर्वयत्नेन काङ्क्षति ॥ ५ ॥**

ज्ञानीति—तस्मात्पूर्वोक्तस्वरूपात्। अतिदारुणादतिशयेन दारुणो भयंकरस्वरूपतस्मात्। भवांभोधेर्भवो जन्मजरामरणात्मकः संसारः स एवांभोधिः समुद्रस्तस्मात्। नित्योद्विग्नो निरन्तरमुद्विग्नस्तद्भयव्याकुलत्वेन क्षुभितः संत्रस्तचेताः। ज्ञानी विज्ञातभवमोक्षस्वरूपसाधनबाधकफलावसरादिभावः पुमान्। तस्य पूर्वोक्तस्य भयंकरभवसमुद्रस्य। संतरणोपायं सम्यगपुनरावृत्त्या तरणं पारगमनं तदर्थं य उपायोऽवन्ध्यसाधनं चारित्रनावमिति यावत् तं। सर्वप्रयत्नेन सर्वोद्यमेन। काङ्क्षति वाञ्छतीति ॥ ५ ॥

भवाद्भीतेन चारित्रक्रियायामेकाग्रचित्तेन स्थेयमित्याह—

**तैलपात्रधरो यद्वद्राधावेधोद्यतो यथा। क्रियास्वनन्यचित्तः स्याद्भवभीतस्तथा मुनिः ॥ ६ ॥**

तैलपात्रेति—यद्वद्यथा प्रकारेण। तैलपात्रधरः शिखापर्यन्तं तैलेन भृतं पात्रं स्थालं तद्धरति राजभयेन हस्ताभ्यामुद्वहति यस तद्वदित्यक्षरार्थः। भावार्थस्त्वग्रे कथानकाद्वक्ष्यामः। यथा येन प्रकारेण। राधावेधोद्यतो राधा धनुर्वेदिनः सर्वकलाकौशल्यशक्तिज्ञापिः काऽष्टचक्रस्तंभोपरिस्था काष्ठमयी पाञ्चाली तस्या यो वेधोऽधोमुखेन तैलकटाहे प्रतिबिंबमालोक्य मुक्तबाणेन चक्राष्टकं विभिद्य तद्वा-

॥९१॥

माद्भवेधनं स चैकाग्रमनःप्रयत्नाभ्यां भवति। तथा तेनैव प्रकारेण। भवभीतः संसाराद्भयं प्राप्तः। मुनिः साधुः। क्रियासु समिति-गुप्त्यादिचरणसप्ततिकरणसप्ततिरूपासु। अनन्यचित्तो नान्यद्विधीयमानक्रियोपयोगाद्भिन्नं चित्तं मनःपरिणामो यस्य स एवंविधः स्याद्भवेत्। इति। तैलपात्रधरकथानकं त्विदम्—

सुमंगलपुरे नगरे सुधर्माभिधो नृपः। स च शुद्धः श्राद्धः साधुगुणे परमरागी। तस्यश्रेष्ठिसुतो गुणधर्मा वयस्यो नवयौवनः परं त्वप्राप्तधर्मः। अथान्यदा सभायां सिंहासनोपविष्टो नृपो जनोपकाराय साधुगुणान् स्तौति। यथा—"अहो जिनमुनयस्त्यक्तसर्वप्रमादा निष्कामा गतमोहा अन्तप्रान्ताहारा देहेऽपि विगतस्पृहा महाभागा इति"। तदा स गुणधर्मा न श्रद्दधे। वक्ति च–"व्यर्थैवैषा गुण-स्तुतिः, ये षड्रसाहारभोजिनस्ते प्रोक्तगुणाधाराः कथं भवेयुः?"। तच्छ्रुत्वा नृपो दध्यौ–"कथमेष स्वयं नष्टः परान्नाशयिता मया प्रतिबो-धनीय इति। ततस्तदुद्धरणाय भूभुजा स्वविश्वस्तकुशलपुरुषहस्तात् कूटलेखप्रयोगेण तमपराधे संस्थाप्य शूलारोपणं समादिष्टं। तच्छ्रु-त्वा मरणभयात्कंपमानसर्वांगेन तेन विज्ञप्तं—"स्वामिन्। मम गृहसर्वस्वं गृहीत्वा देशनिष्कासनं कृत्वा मां जीवन्तं मुञ्च"। इत्येवं बहु विज्ञप्तोऽपि राजा न मुञ्चति तदा सर्वमहाजनैर्बहु प्रार्थितो राजाह—"भोः पौरमुख्याः! युष्मद्वचनं मन्ये। परं यद्ययं शिखाप-र्यन्ततैलपूरितमहास्थालं हस्ताभ्यां धृत्वा कौतुकपूर्णे सकले पुरे भ्रान्त्वा कुत्राप्यपातिततैलबिन्दुरत्रायाति, तदा न मारयामि। अन्यथा तु यत्रैव तैलबिन्दुः पतति तत्रैवैनं गतजीवितं कुर्याम्"। जीवनकामिना तेन तत्सर्वं स्वीकृतं। ततो राज्ञा निष्कोशासिधराश्चत्वारो भटाः समादिष्टाः–"भवद्भिर्यत्रैव तैलबिन्दुः पतति, तत्रैवायं हन्तव्यः" इत्युक्त्वा राज्ञा सकलेऽपि पुरे दिव्यरूपनेपथ्यनव्यवयोभि-र्वरतरुणीभिर्गीतवादित्रनृत्यादीनि कारयामास। गुणधर्मा तु करधृततैलपात्रस्तस्मिन्नप्रमत्तोऽनन्यमनाः सन् क्वचिदप्यपातिततैलबिन्दुः

 पुरे भ्रान्त्वागत्य नृपाग्रे पात्रं मुक्त्वा प्रणम्योपविष्टः । नृपेण पृष्टः—" भो गुणधर्मन् ! अद्य त्वया पुरे किं किं दृष्टं श्रुतं च ? " । ते- 
नोक्तं—" स्वामिन् ! मरणभयेन मया तैलपात्रं विना न किमपि दृष्टं श्रुतं ज्ञातं च " । राज्ञोक्तं—" भो गुणधर्मन् ! यद्येकमरणाद्भीतेन
 त्वया पञ्चेन्द्रियसुखदा विषया विस्मृतास्तर्हि दृष्टानन्तमरणेभ्यो भीताः साधवो दमितेन्द्रियाः कथं न भवेयुः ? " । इति श्रुत्वा ज्ञात-
धर्मसारो गुणधर्मा प्रतिबुद्धः । एवं भवभीतैः क्रियास्वनन्यचित्तैर्भाव्यमिति ॥ ६ ॥

भवाद्भीतेन परीषहोपसर्गेभ्यो न भेतव्यमित्याह—

**विषं विषस्य वह्नेश्च वह्निरेव यदौषधम् । तत्सत्यं भवभीतानामुपसर्गेऽपि यन्न भीः ॥ ७ ॥**

**विषमिति**—विषस्य सर्पादेर्गरस्य । यत्किंचित् । विषं मृत्तिकाकन्दादिरूपं हालाहलमेव । औषधं प्रतिकारहेतुद्रव्यं जनैः प्रोच्यते । च पुनः । वह्नेरग्निदग्धस्य वह्निरेव क्वचिदग्नितापदानमेव यदौषधं प्रतीकारः प्रोच्यते । तज्जनवचनं । सत्यमवितथं मन्ये । कुतः? यद्यस्माद्धेतोः । भवभीतानां भवाज्जन्मादिरूपसंसारात् ये भीतास्त्रस्तास्तेषां मुनीनां । उपसर्गेऽपि उपद्रवेऽपि उपसर्गपरीषहवर्गभय-स्योपनिपाते जाते सत्यपि । न भीर्भयं न विद्यते । अनेन च यद्भवाद्भयं, तदेव जीवस्य परीषहोपसर्गभये समुद्भूते निर्भयत्वेन तत्स-हनोपायो जिनेऽस्तीत्यावेदितं भवतीति ॥ ७ ॥

अथ कर्तव्योपदेशपूर्वकमुपसंहरति— 

**स्थैर्यं भवभयादेव व्यवहारे मुनिर्व्रजेत् । स्वात्मारामसमाधौ तु तदप्यन्तर्निमज्जति ॥ ८ ॥**

**स्थैर्यमिति**—मुनिः साधुः । व्यवहारे व्यवहारदशायां साध्वाचारे च । भवभयादेव एव निश्चयेन भवाद्भयं त्रासस्तस्माद्धेतोः

न तु तद्विना । स्थैर्यं स्थिरस्य भावः स्थैर्यं तत् निश्चलत्वं । व्रजेत् प्राप्नुयात् । अतो व्यवहारस्थैर्यभवभीतिर्ध्येया । तु पुनः । स्वात्मारामसमाधौ स्वात्मनि निजस्वरूपे आरामो विश्रामोऽथवा आसमंतात् रामो रमणं रतियुक्तत्वं यस्मिन् स चासौ समाधिर्निर्विकल्पचित्तावस्थानं तस्मिन् । तदपि पूर्वोक्तभवभयमपि । यद्यपि समाधेर्निश्चलत्वेन चलचित्तहेतुभयं चित्तेन निविश्यते तथापि तत् अन्तर्निमज्जति अन्तः समाधिमध्ये निमज्जति भवविरक्तत्वेन भयं लीनं भवति न पृथग्ध्यायतीति ॥ ८ ॥

॥ इति भवोद्वेगाष्टकम् ॥ २२ ॥

# ॥ अथ लोकसंज्ञात्यागाष्टकम् ॥ २३ ॥

द्वाविंशेऽष्टके भवोद्वेग उक्तः, तं तु लोकसंज्ञानिरपेक्ष एव चिन्तयेदिति त्रयोविंशेऽष्टके लोकसंज्ञात्यागमाह—

**प्राप्तः षष्ठं गुणस्थानं भवदुर्गाद्रिलंघनम् । लोकसंज्ञारतो न स्यान्मुनिर्लोकोत्तरस्थितिः ॥ १ ॥**

प्राप्त इति—भवदुर्गाद्रिलंघनं भवो जन्मादिप्रपञ्चभृच्चतुर्गतिरूपसंसारः, स एव दुःखेन गम्यते समारुह्यते प्राणिभिरिति दुर्गः, स चासावद्रिः पर्वतस्तस्योल्लंघनं पारगमनं यस्माज्जीवानां तदीशं । षष्ठं मिथ्यात्वादिसंख्याक्रमवशात् षण्णां पूरकं प्रमत्तसंयतनामकं । गुणस्थानं गुणाः सम्यग्दर्शनज्ञानचारित्ररूपास्तेषां यत्स्थानं शुद्धेः प्रकर्षापकर्षकृतपरिणतिस्थितिस्तत् । प्राप्तः लब्धवान् । स लोकोत्तरस्थितिर्लोकोत्तरा गृहिजनापेक्षया प्रधाना स्थितिः प्रवर्तनव्यवस्था यस्य सः । मुनिर्योगी । लोकसंज्ञारतो लोकसंज्ञा परमार्थशून्यधर्मशास्त्रविरुद्धैः सामान्यजनैः कृता दृश्यादृश्यरूपा प्रवृत्तिस्तस्यां रतस्तत्समासेवनपरः । न स्यान्न भवेदिति ॥ १ ॥

लोकरञ्जनतो धर्मो न हार्य इत्याह—

**यथा चिन्तामणिं दत्ते बठरो बदरीफलैः। हा हा जहाति सद्धर्मं तथैव जनरञ्जनैः ॥ २ ॥**

यथेति—यथा येन प्रकारेण। बठरो मूर्खः। बदरीफलैर्बदर्या वृक्षविशेषस्य फलानि तैः। चिन्तामणिं सकलेप्सितदायिदेवताधिष्ठितरत्नविशेषं। दत्ते बदरमात्रमूल्येन प्रयच्छति, अपरमार्थज्ञत्वात्। तथैव तेनैव प्रकारेण। हा हा इति महाखेदे। जनरञ्जनैर्जनानां मनुष्याणां रञ्जनानि रागजनकभूतिकर्मनिमित्तादीनि धर्मशास्त्रनिरपेक्षप्रवर्तनानि तैः। सद्धर्मं सन् समीचीनो धर्मः सत्कृतिफलदो निःस्पृहसुकृताचारस्तं। जहाति जनरागेणासारवत्त्यजति। जन इति शेषः। यदुक्तं—"त्वत्तः सुदुष्प्राप्यमिदं मयाप्तं रत्नत्रयं भूरिभवभ्रमेण। प्रमादनिद्रावशतो गतं तत्कस्याग्रतो नायक पूत्करोमि ॥ १ ॥ वैराग्यरंगोऽपरवञ्चनाय धर्मोपदेशो जनरञ्जनाय। वादाय विद्याध्ययनं च मेऽभूत् कियद्ब्रुवे हास्यकरं स्वमीश ॥ २ ॥" इति ॥ २ ॥

लोकसंज्ञानुगो निःसारो भवतीत्याह—

**लोकसंज्ञामहानद्यामनुश्रोतोऽनुगा न के। प्रतिश्रोतोऽनुगस्त्वेको राजहंसो महामुनिः ॥ ३ ॥**

लोकसंज्ञेति—लोकसंज्ञामहानद्यां लोकोऽशास्त्रज्ञजनसमूहस्तस्य या संज्ञा कथनं। यथा-यद्बहुभिः कृतं तदेव धर्मार्थिभिः कर्तव्यमिति। सैव महती विपुला नदी तस्यां। अनुश्रोतोनुगा अनु सादृश्यतयायामदीर्घं श्रोतो लोकसंज्ञानदीप्रवाहस्तदनु पश्चाल्लगमाश्रित्य गच्छन्ति व्रजन्ति भजन्तीत्यनुगास्तस्या अनुसारिण इति यावत्। के न भवन्ति? के पुरुषा न सन्ति? अपि तु भूयांसः 

सन्ति चिरकालात्परिचितत्वात् । तु पुनः । प्रतिश्रोतोनुगः प्रतिकूलं नदीप्रवाहश्रोतोवेगमनुगच्छति यः सः । एकोऽद्वितीयः । महामुनिः श्रेष्ठसाधुः । राजहंसो मरालरूप एव । न त्वन्य इति ॥ ३ ॥

लोकसंज्ञांगीकारे दोषापत्तिं दर्शयति—

**लोकमालंब्य कर्तव्यं कृतं बहुभिरेव चेत् । तदा मिथ्यादृशां धर्मो न त्याज्यः स्यात्कदाचन ॥ ४ ॥**

लोकमिति—चेद्यदि । बहुभिः प्रभूतजनसमूहैः । कृतं समासेवितं क्रियादिकं तदेव धर्मपरेण । लोकं प्रभूतजनं । आलंब्य समाश्रित्य । कर्तव्यं विधेयं न त्वन्यच्छास्त्रोक्ताद्यपेक्षणीयमिति मतिः स्याद्भवेत् । तदा तस्मिन् सिद्धे सति । मिथ्यादृशां मिथ्या विपरीता दृग् दर्शनं येषां तेषां शकयवनशाक्तादीनां संबन्धी । धर्मस्तन्मताचारः । कदाचन कस्मिंश्चिदपि काले । त्याज्यस्त्यक्तुं योग्यः । न स्याभ्र भवेदिति ॥ ४ ॥

लोकसंज्ञारहितस्त्वेवं भावयतीत्याह—

**श्रेयोऽर्थिनो हि भूयांसो लोके लोकोत्तरे च न । स्तोका हि रत्नवणिजः स्तोकाश्च स्वात्मसाधकाः ॥ ५ ॥**

श्रेयोऽर्थिन इति—हि निश्चयेन । श्रेयोऽर्थिनः श्रेयः कल्याणं विषयादिसुखं च तेनार्थः प्रयोजनमस्ति येषां ते । लोके लोकसंज्ञाप्रवाहे । भूयांसोऽतिप्रभूताः सन्ति, मिथ्यात्वाज्ञानाविरत्यशुद्धिमतां प्राचुर्यात् । च पुनः । लोकोत्तरे शुद्धमार्गे । भूयांसो न सन्ति । तत्र दृष्टान्तमाह—हि स्फुटं । रत्नवणिजो यथा महामणीनां व्यापारिणः । स्तोकाः स्वल्पतरा एव सन्ति । चशब्दस्तथार्थे । तथैव स्वात्मसाधका निजात्मस्वरूपनिष्पादकाः । स्तोकाः स्वल्पाः सन्तीति ॥ ५ ॥

लोकसंज्ञामोहिताः कुकर्महता ज्ञेया इत्याह—

**लोकसंज्ञाहता हन्त नीचैर्गमनदर्शनैः । शंसयन्ति स्वसत्यांगमर्मघातमहाव्यथाम् ॥ ६ ॥**

लोकसंज्ञेति--हन्तेति खेदे । लोकसंज्ञाहता लोकसंज्ञा पूर्वोक्ता तया हतास्ताडिता धर्मसर्वस्वहरणलकुटेन प्रहारिता इति यावत् । ते नीचैर्दुष्टजनलज्जया मायावित्वेन चावनतमस्तकाद्यंगपूर्वकक्रमेण मन्दनम्रैः । गमनदर्शनैर्गमनानि स्थानात्स्थानान्तरप्राप्तये गतागतानि दर्शनानि च भूम्यादीनां विलोकनाय चक्षुःप्रसारणानि तैः । स्वसत्यांगमर्मघातमहाव्यथां स्वस्यात्मीयं यत्सत्यं सूनृतव्रतं तदेव यदंगं मुख्यशिवोपायभूतशरीरं तस्य यानि मर्माणि तात्पर्ययुक्तसत्यसारतारूपजीवनस्थानानि तेषु तेषां वा यो घातः कपटवृत्तिरूपप्रहारस्तेन कृता या महती प्रभूततरा व्यथा पीडाऽत्र भवे धर्मे भग्नमनः परिणामरूपाऽरतिः परत्र च दुर्गतिप्राप्तिरूपा तां । शंसयन्ति स्वार्थे णिच् गमनविलोकनलक्षणैः कथयन्तीति ॥ ६ ॥

धर्मसिद्धिसमीहावतां जनसमूहमेलकेन प्रयोजनं नास्तीति सदृष्टान्तमाह---

**आत्मसाक्षिकसद्धर्मसिद्धौ किं लोकयात्रया । तत्र प्रसन्नचन्द्रश्च भरतश्च निदर्शने ॥ ७ ॥**

आत्मेति–हे भव्याशय । आत्मसाक्षिकसद्धर्मसिद्धौ आत्मा साक्षी यस्मिन्स आत्मसाक्षिकः आत्मना जीवेन साक्षिता स्वीकारिता ज्ञातेति यावत् यः सन् सहजशुद्धः समीचीनो वा धर्मः सुकृताचारस्तस्य या सिद्धिर्निष्पत्तिस्तस्यां सत्यां । लोकयात्रया लोका जनास्तेषां यात्रा भूयसामेकत्र संहतिस्तया । किं प्रयोजनं ? न किमपीत्यर्थः । धर्मसिद्धेः स्वसाक्षिकत्वात् । तत्र तस्यां आत्मसाक्षिकसद्धर्म-

सिद्धौ। प्रसन्नचन्द्रो नृपः। भरतश्च प्रथमचक्री। निदर्शने उदाहरणे भवतः। यथा लोकयात्रया दृष्टचारित्रः प्रसन्नचन्द्रः कायोत्सर्गस्थोऽपि नरकयोग्यं कर्मबन्धं कृतवान्। लोकयात्रया दृष्टभोगो भरतो विलासिनीवृन्दान्वित आत्मानमनुशासत् केवलज्ञानं प्राप्तवानिति॥

लोकसंज्ञात्यागफलं दर्शयन्नुपसंहरति—

**लोकसंज्ञोज्झितः साधुः परब्रह्मसमाधिमान्। सुखमास्ते गतद्रोहममतामत्सरज्वरः ॥ ८ ॥**

लोकसंज्ञेति—लोकसंज्ञोज्झितो लोकसंज्ञा पूर्वमुक्ता सोज्झिता परित्यक्ता येन सः। परब्रह्मसमाधिमान् परब्रह्मणि शुद्धचैतन्यस्वभावे समाधिस्त्रयोगस्वास्थ्यं विद्यते यस्य सः। गतद्रोहममतामत्सरज्वरो गतोऽपनष्टो द्रोहः परोपघातादिचिन्तनं, ममता धनपरिवारदेहादिके मदीयत्वबुद्धिः, मत्सरः परसुखादेरसहनादिपरिणामस्तेषां द्वन्द्वस्तद्रूपो यो ज्वरो दाहकरो रोगो यस्य सः। साधुः संयतात्मा। सुखं यथा स्यात्तथा। आस्ते तिष्ठतीति॥ ८॥

॥ इति लोकसंज्ञात्यागाष्टकम् ॥ २३ ॥

## ॥ अथ शास्त्रदृष्ट्यष्टकम् ॥ २४ ॥

त्रयोविंशेऽष्टके लोकसंज्ञात्याग उक्तः तं तु शास्त्रदृगेव कर्तुं पारयति अतश्चतुर्विंशेऽष्टके शास्त्रदृष्टिः प्रोच्यते—

**चर्मचक्षुर्भृतः सर्वे देवाश्चावधिचक्षुषः। सर्वतश्चक्षुषः सिद्धाः साधवः शास्त्रचक्षुषः॥ १ ॥**

चर्मेति—हे आत्मलाभोत्सुक तावत् चर्मचक्षुर्भृतश्चर्म त्वक् तन्मयं तद्रूपं वा यच्चक्षुर्नेत्रं तद्बिभ्रति ये ते तथाविधाः। सर्वे समस्ताश्चतुर्गतिगाः प्राणिनः सन्ति। चकारो विशेषणार्थः। तेन चर्मचक्षुष्मन्तोऽपि देवा भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदभिन्ना

अमराः। अवधिचक्षुषोऽवधिर्मनइन्द्रियनिरपेक्षरूपिपदार्थविषयमात्मनः साक्षाज्ज्ञानं तद्रूपं चक्षुर्नेत्रं येषां ते तथाविधा अपि सन्ति। सिद्धाः कृतकृत्या निरञ्जनाः। सर्वत उपर्यधः पार्श्वयोर्विश्वतः चक्षुः केवलज्ञानदर्शनरूपं चक्षुर्नेत्रं येषां ते तथाविधाः सन्ति । साधयन्ति मुक्तिमार्गमिति साधवो मुनयः ते। शास्त्रचक्षुषः शास्ति उपदिशति हेयोपादेयोत्सर्गापवादविभागेन स्याद्वादनीत्या मोक्षोपायमिति शास्त्रमागमस्तद्रूपं चक्षुर्येषां ते तथाविधा भवन्ति। ततः सिद्धं यत्साधुभिः सकलसाधनं शास्त्रदृष्ट्या साध्यं तेषां शास्त्रचक्षुष्ट्वात् इति ॥ १ ॥

शास्त्रज्ञानशक्तिमाह—

**पुरःस्थितानिवोर्ध्वाधस्तिर्यग्लोकविवर्तिनः। सर्वान् भावानवेक्षन्ते ज्ञानिनः शास्त्रचक्षुषा ॥ २ ॥**

पुरःस्थितानिति—भोः शास्त्रानुयायिन् ज्ञानिनो ज्ञानं यथार्थशास्त्रबोधरूपमस्ति येषां ते। शास्त्रचक्षुषा शास्त्रं पूर्वोक्तं तद्रूपं यच्चक्षुर्नेत्रं तेन। ऊर्ध्वाधस्तिर्यग्लोकविवर्तिन ऊर्ध्वं देवलोकादिरूपः, अधो नरकादिरूपः, तिर्यग् ज्योतिश्चक्रद्वीपसमुद्रादिरूपः, यो लोकः सकलविश्वं तस्मिन् विवर्तिनो विवर्त उद्वर्तनापवर्तनरूपविविधपरिणामपरिणमनमस्ति येषां तान्। सर्वान् भूतभविष्यदादिरूपान्। भावान् पदार्थान् तद्धर्मांश्च। पुरःस्थितानिव मुखाग्रे वर्तमानानिव। अवेक्षन्ते विलोकयन्तीति ॥ २ ॥

किं तच्छास्त्रमितिचेत् यद्वक्ष्यमाणलक्षणलक्षितं, तदेव शास्त्रं, न त्वन्यदित्याह—

**शासनात्त्राणशक्तेश्च बुधैः शास्त्रं निरुच्यते। वचनं वीतरागस्य तत्तु नान्यस्य कस्यचित् ॥ ३ ॥**

शासनादिति—शासनात् शास्ति निकृष्टमपि हितकारिसत्यधर्मे यथार्थवस्तुस्वरूपज्ञानादिसाधने च प्रवर्तयतीति शासनं

तस्मात् जीवानां धर्मशिक्षणात्। च पुनः। त्राणशक्तेस्त्राणं दुर्गतौ प्रपततां पापप्रवृत्तिनिषेधाल्लक्षणं तत्र शक्तिरनवद्यसामर्थ्यं रागादिभेदनशक्तिमत्त्वं वा तस्या योगतः। बुधैस्तत्त्वज्ञानपरिमितैः। शास्त्रमिति निरुच्यते पदभञ्जनव्युत्पत्त्या व्युत्पाद्य प्रोच्यते। तत्तु पुनः तत्पूर्वोक्तलक्षणं शास्त्रं। वीतरागस्य वीतो विगतो रागोऽभिष्वंगलक्षणो यस्मात्स वीतरागो निःस्पृहः। उपलक्षणाद्वीतद्वेषो वीतमोहश्च गृह्यते। तौ हि सरागस्यैव स्याताम्। तस्य वचनं वाक्यरूपं भवति। अन्यस्य वीतरागाद्भिन्नस्य तद्वचनानुयायित्वरहितस्य च। न कस्यचिन्न कस्यापि प्राणिमात्रस्य वचनानां शास्त्रत्वं, तस्य रागादिमत्त्वेन मिथ्यावचनोत्पत्तिस्थानत्वादित्यर्थः ॥ ३ ॥

शास्त्रानुसारिणां फलं दर्शयन्नाह—

**शास्त्रे पुरस्कृते तस्माद्वीतरागः पुरस्कृतः। पुरस्कृते पुनस्तस्मिन्नियमात्सर्वसिध्धयः ॥ ४ ॥**

शास्त्र इति—तस्माच्छास्त्रस्य शिक्षात्राणकारित्वाद्वीतरागवचनरूपे शास्त्रे पूर्वोक्तस्वरूपे। पुरस्कृते पुरोऽग्रे क्रियते स्मेति पुरस्कृतं बहुमानपूजया पूजितं वा तस्मिन् सति। यथा जिनप्रणीतमेतत्करोमीत्येवंविधेनाशयेन साधने कृते। एवं सति। वीतरागोऽर्हन् परमेश्वरः। पुरस्कृतोऽग्रे कृतः पूजितश्च, तदुपदेशस्याग्रे कृतत्वात्। पुनर्भूयः। तस्मिन्नर्हति। पुरस्कृते मुखाग्रे हृदये निवेशिते वा प्रधानीकृते सति वा। तत्कर्तरि जीवे। नियमान्निश्चयेन। सर्वसिध्धयः सर्वा अशेषाः सिध्धयः केवलज्ञानादिसंपदः कार्यनिष्पत्तयो वा भवन्ति, जिनाज्ञायाः सिध्धेः प्रधानांगत्वादित्यर्थः ॥ ४ ॥

विपर्ययेऽपायमाह—

**अदृष्टार्थेऽनुधावन्तः शास्त्रदीपं विना जडाः। प्राप्नुवन्ति परं खेदं प्रस्खलन्तः पदे पदे ॥ ५ ॥**

अदृष्टेति—भो भव्यात्मन् शास्त्रदीपं विना शास्त्रं पूर्वोक्तलक्षणं तदेव दीपो ज्योतिरात्मा तं विना तद्रहिताः । भग्ना यथार्थमोक्षस्वरूपतत्साधनादिरूपवस्तुबोधविकलाः । अदृष्टार्थेऽदृष्टोऽज्ञाननिशान्धकारमग्नत्वेनानवलोकितोऽर्थो मोक्षमार्गादिपदार्थस्तस्मिन् । अनुधावन्तोऽनु हीनसत्त्वतया मोक्षानुयायिसदृशतया च धावन्तः शीघ्रतरगामितया गच्छन्तः । पदे पदे स्थाने स्थाने । प्रस्खलन्तो दुर्गतिगर्तप्रपातेन भज्यमानमुक्तिप्रयाणागतयः सन्तः । परं प्रकृष्टं । खेदं सन्तापं । प्राप्नुवन्ति लभन्त इति ॥ ५ ॥

शुद्धापि क्रिया शास्त्रनिरपेक्षस्याहितवहेत्याह—

**शुद्धोञ्छाद्यपि शास्त्राज्ञानिरपेक्षस्य नो हितम् । भौतहन्तुर्यथा तस्य पदस्पर्शनिवारणम् ॥ ६ ॥**

शुद्धोञ्छादीति—हे पुण्याशय शास्त्राज्ञानिरपेक्षस्य शास्त्रं पूर्वोक्तरूपं तस्याज्ञा तदुक्तविधिना सर्वत्र प्रवर्तनं तस्यां निरपेक्षस्तदनुसारितारूपतत्साहाय्यनिरपेक्षत्वेन स्वेच्छाचारी तस्य । शुद्धोञ्छादि शुद्धा द्विचत्वारिंशद्दोषवर्जिता या उञ्छा भिक्षाग्रहणं सादिर्यस्य तत् । आदिपदाद्ग्रामानुग्रामविहारभूशय्याकेशलोचब्रह्मचर्यादयो ग्राह्याः । तदपि तर्ह्यशुद्धकर्तुरशुद्धग्राहिणस्तु का वार्तेत्यपेर्थः । हितं हितकारकं ज्ञानादिगुणवृद्धिकरमिति यावत् । नो नैव स्यात् । मिथ्यात्वाज्ञानादिदोषज्वरदूषितहृदयत्वात् शास्त्रगुणानभिज्ञत्वाच्च । कस्येव केन न्यायेन वा? यथा येन दृष्टान्तेन । भौतहन्तुर्भूतमात्रं वा पञ्चभूतमयमेव जगदित्येवं वदनशीलो भौतो भूतवादी तस्य हन्तुर्हननकारकस्य गुरोः । भक्तस्येति शेषः । तस्य जीवतो गुरोः । पदस्पर्शनिवारणं यथा शरो गुरुचरणं न स्पृशति तथा हन्तव्यं तत्पादयोः पूजनीयत्वादिति गुरुभक्तिवत् । अयं भावः—कश्चिद्भौतपार्श्वे मनोहरमायूरपिच्छच्छत्रमस्ति । तद्भक्तो भिल्लनृपः । तद्भार्या तच्छत्रे रञ्जिता । तदर्थं नृपेण याचितं । भौतो न दत्ते । नृपेण स्वसुभटः समादिष्टः—गुरुं हत्वा छत्रमानय परं गुरुपादयोः शरस्पर्शो वार्यः तयोः पूज्यत्वादिति ॥ ६ ॥

शास्त्रज्ञानमहिमानं दर्शयन्नाह—

**अज्ञानाहिमहामंत्रं स्वाच्छन्द्यज्वरलंघनम् । धर्मारामसुधाकुल्यं शास्त्रमाहुर्महर्षयः ॥ ७ ॥**

अज्ञानेति—हे विवेकबुद्धे ! महर्षयो महान्तो ज्ञानादिगुणगरिष्ठा ये ऋषयो मोक्षोपायतयाऽनुष्ठेयकर्मज्ञापकशास्त्रकृदाचार्याः । शास्त्रं पूर्वोक्तलक्षणं तदधीनत्वेन वर्तनं च तत् । अज्ञानाहिमहामंत्रं न ज्ञानमज्ञानं ज्ञानानुपलंभहेतुमिथ्यात्वे मनोऽवस्थानादि, तदेवाहिः शुद्धश्रद्धाचैतन्यविप्लुतिमहामूर्छोत्पादहेतुः सर्पः, तेनोत्पादितकुवासनादिविषवेगोत्तारणाय महान् सर्वप्रधानो मंत्रो दैवत्ववत्यक्षरावली तद्रूपं । तथा स्वाच्छन्द्यज्वरलंघनं स्वस्य छन्दोऽभिप्रायः स्वच्छन्दस्तस्य भावः स्वाच्छन्द्यं निजेच्छाकारित्वं तदेव ज्वरो रोगस्तस्मिन् लंघनं उपवासस्तत्प्रपचनाय निराहारत्वमिति यावत् तद्रूपं । तथा धर्मारामसुधाकुल्यं धर्मो निजस्वभावो मोक्षोपायसेवनं च स एवारामः स्वादिष्ठसकलसुखपुष्पफलोपेतमहोद्यानं तत्र नवपल्लवादिविधाने सुधाकुल्यं पीयूषसारणीतुल्यं । आहुः प्रोक्तवन्त इति ॥ ७ ॥

शास्त्रश्रितानां फलदर्शनपूर्वकमुपसंहरति—

**शास्त्रोक्ताचारकर्ता च शास्त्रज्ञः शास्त्रदेशकः । शास्त्रैकदृग्महायोगी प्राप्नोति परमं पदम् ॥ ८ ॥**

शास्त्रोक्तेति—हे साधक शास्त्रोक्ताचारकर्ता शास्त्रे शास्त्रेण वा पूर्वोक्तलक्षणे पूर्वोक्तलक्षणेन वोक्ताः प्रोक्ता य आचारा अहर्निशं मुमुक्षुकर्तव्यविशेषास्तेषां कर्ता तदनुसारेण संपादको यः सः । शास्त्रज्ञः शास्त्रं स्याद्वाददेशकत्वादिलक्षणेन जानाति परीक्षया वेत्ति यः सः । शास्त्रदेशकः शास्त्रोक्तमेवार्थं भव्येभ्यो दिशति सम्यगुपदिशतीति तथा । शास्त्रैकदृक शास्त्रमेवैकाऽद्वितीया दृग्दृष्टि-

र्यस्य स तथा । महायोगी महान् सर्वप्रधानो योगी मोक्षोपायसेवकः । परमं सर्वोत्कृष्टं । पदं स्थानं स्वरूपावस्थानं । प्राप्नोति लभत इति ॥ ८ ॥

॥ इति शास्त्रदृष्ट्यष्टकम् ॥ २४ ॥

# ॥ अथ परिग्रहाष्टकम् ॥ २५ ॥

चतुर्विंशेऽष्टके शास्त्रगुणा उक्ताः तांस्तु निष्परिग्रही प्राप्नोतीत्यतः पञ्चविंशेऽष्टके परिग्रहदुष्टतामुपदिशति—

**न परावर्तते राशेर्वक्रतां जातु नोज्झति । परिग्रहो ग्रहः कोऽयं विडंबितजगत्त्रयः ॥ १ ॥**

नेति—हे शास्त्रगुणोद्भासिन् । अयं सकलजनप्रत्यक्षः । परिग्रहः परि समन्तात् यो ग्रहः स्वकीयत्वेन संग्रहणायाकांक्षा स परिग्रहः । तद्रूपो ग्रहोऽङ्गारकादिपापखेटः । क इति किं सन्तापदोऽग्निर्वा सूर्यो वा रोगो वा यमो वा को वाऽज्ञातचार इति । यो राशेः प्राणिगणस्य पीडासूचकजन्मचतुर्थाष्टमद्वादशस्थानरूपात् आरंभमैथुनमायाकलहवृत्तिभेदात् । न परावर्ततेऽनादिकालादद्यपर्यन्तं न निवर्तते । स्थानान्तरगमनेन राशेरुत्तीर्णो न भवति, इतरे ग्रहास्तु राशिं परावर्तयन्ति इति तेभ्योऽयं विलक्षण इत्यर्थः । तथा वक्रतां वक्रः पश्चाद्गामी कुटिलगतिस्वभावश्च, तस्य भावः कर्म वा तत्ता तां । जातु कदापि । नोज्झति न त्यजति परिपतित एव सर्वदा तिष्ठति, इतरे ग्रहास्तु मार्गे भवन्तीत्यर्थः । तथा जगत्त्रयं जगत्त्रितयं त्रिभुवनवर्तिजनं, तत् विडंबितं नानाविधा विडंबनाः प्रापितं येन स त्रिभुवनकदर्थनाकारकः । अन्ये ग्रहास्तु सर्वं जगद्विडंबयितुमसमर्था इत्यर्थः ॥ १ ॥ 

अथ परिग्रहग्रहावेशिनो वेषभृतोऽपि ग्रहिला भवन्तीति दर्शयन्नाह—

**परिग्रहग्रहावेशाद्दुर्भाषितरजःकिराम् । श्रूयन्ते विकृताः किं न प्रलापा लिंगिनामपि ॥ २ ॥**

परिग्रहेति—हे धर्मबुद्धे परिग्रहग्रहावेशात् परिग्रहो ममत्त्वपरिणामः स एव ग्रहो भूतादिप्रवेशः शनैश्चरादिक्रूरदृष्टिखेटविशेषो वा तस्यावेशो देहप्रवेशनं तदासंगोत्थाभिमानो वा तस्मात् । दुर्भाषितरजःकिरां दुष्टमुत्सूत्रक्रोधाभिमानानुचितादिना दूषितं भाषितं वचनं तद्रूपं रजो धूलिस्तत् किरन्ति क्षिपन्ति ये तेषां । लिंगिनामपि लिंगं धर्मध्वजादिमुनिवेषो विद्यते येषां तेषामपि । गृहस्थास्तु तावद्दूरे तिष्ठन्तु, मुनिवेषभृतामपीत्यपेरर्थः । विकृता विरूपा बीभत्सा मलिना इति यावत् । प्रलापा असंबद्धवाक्यानि । किं न श्रूयन्ते नाकर्ण्यन्तेऽपि तु श्रूयन्त एव । ततः सिद्धं परिग्रहसंगदोषाज्जीवा नष्टमतयो भवन्तीत्यर्थः ॥ २ ॥

त्यक्तपरिग्रहो मुनिस्त्रिभुवनपूज्यो भवतीत्याह—

**यस्त्यक्त्वा तृणवद्बाह्यमान्तरं च परिग्रहम् । उदास्ते तत्पदांभोजं पर्युपास्ते जगत्त्रयी ॥ ३ ॥**

यस्त्यक्त्वेति—हे विविदिषो यो योगी । बाह्यं धनधान्यद्विपदचतुष्पदस्वर्णरूप्यसदनादिरूपं चर्मनेत्रदृश्यं । च पुनः । आन्तरमन्तर्मध्ये जीवेन सह संबद्धतया भवमान्तरं मिथ्यात्वकषायवेदोदयहास्यादिपरिणामरूपं ज्ञानदृग्गम्यस्वरूपं । परिग्रहमनात्मीयवस्तुसंग्रहणरूपं । तृणवन्निःसारघासवत् । त्यक्त्वा परिहृत्य । उदास्त उदासीनतां भजते, मोहहेतुनारंभमूलेन तृष्णासंवर्धकेन व्यासंगमयेन परिग्रहेण सृतं ममेति भावनापरस्तिष्ठति । तत्पदांभोजं तस्य मुनेर्ये पदे चरणौ ते एव यदंभोजं कमलं तत् । जगत्त्रयी

त्रिभुवनगतजनसमूहः । पर्युपास्ते परि सर्वोद्यमेनोपास्ते सेवते । ततः सिद्धं निष्परिग्रहिण एव त्रिभुवनपूजनीयाः, नेतरे, इति तस्मात्त्वमपि निष्परिग्रहो भवेत्यर्थः ॥ ३ ॥

यतोऽयं परिग्रहत्यागः सफलतामेति तमुपायं श्लोकपञ्चकेनोपदिशति—

**चित्तेऽन्तर्ग्रन्थगहने बहिर्निर्ग्रन्थता वृथा । त्यागात्कञ्चुकमात्रस्य भुजगो न हि निर्विषः ॥ ४ ॥**

चित्त इति—अन्तर्ग्रन्थगहनेऽन्तर्मध्ये चित्तपरिणतौ ग्रन्थो धनभोगशरीरादिषु ममत्वं मूर्छारूपं संग्रहो वा तेन गहन-मतिशयेन भृतं यत्तस्मिंस्तथाविधे । चित्ते मनसि स्थिते सति । बहिर्निर्ग्रन्थता बहिर्बाह्या स्त्रीधनाद्यग्रहणरूपा निर्ग्रन्थता निःसंग्रह-करणता । वृथा निष्फला स्यात्, त्यागफलस्य मोक्षगुणवृद्धिसद्गत्यादेरभावात्, मनसः पापकर्मसंग्रहपरत्वात् । तदपि कुतो हेतोः ? हि यस्माद्धेतोः । कञ्चुकमात्रस्योपरितनवर्तिनिर्मोकमात्रस्य । त्यागात्परिहारात् । भुजगः सर्पः । निर्विषो निर्गतं विषं गरलं यस्मात् स विषरहितो न भवति । तद्वद्बाह्यत्यागान्मूर्छितो निर्ग्रन्थो न भवतीत्यर्थः ॥ ४ ॥

परिग्रहत्यागान्महाफलं भवतीत्याह—

**त्यक्ते परिग्रहे साधोः प्रयाति सकलं रजः । पालित्यागे क्षणादेव सरसः सलिलं यथा ॥ ५ ॥**

त्यक्त इति—हे मुमुक्षो । परिग्रहे परि सर्वतः आत्मपरिणतेर्ग्रहो ग्रसनं यस्माद्भवति स परिग्रहो मूर्छापरिणामस्तस्मिन् । त्यक्ते परिवर्जिते जीवहृदयान्निर्गते सति । साधोर्मुनेः आत्मप्रदेशराशितः । सकलं समग्रं । रजः कर्मरेणुः । प्रयाति प्रकर्षेणापुनरनुबन्धतया मूलाद्याति विनश्यति । अयं भावः—परिग्रहेच्छाया अभावे प्राप्ते सति नीरागिणो जीवप्रदेशेभ्यो नीरसीभूय महान् कर्मराशिः

प्रपततीति । प्रोक्तार्थे दृष्टान्तयति—यथा येन न्यायेन । पालिस्त्यागे पालिः सरोवरादेः सेतुबन्धस्तस्य त्यागे भंगे कृते सति । सरसो जलाशयात् । सलिलं जलसमूहः । क्षणादेव स्वल्पकालादेव प्रयाति । तथैव मूर्छारहितात्साधोः सकाशात्कर्म निर्यातीत्यर्थः ॥ ५ ॥

**त्यक्तपुत्रकलत्रस्य मूर्च्छामुक्तस्य योगिनः । चिन्मात्रप्रतिबद्धस्य का पुद्गलनियंत्रणा ॥ ६ ॥**

त्यक्तेति—हे विश्वस्त । त्यक्तपुत्रकलत्रस्य त्यक्ताः परिहृताः पुत्रास्तनुजाः कलत्राणि च स्त्रियो येन तस्य । मूर्च्छामुक्तस्य मूर्छा धनदेहादिषु मोहस्तया मुक्तो रहितस्तस्य । योगिनो योगो ज्ञानादिमयमोक्षोपायसेवनं, स विद्यते यस्य तस्य । चिन्मात्रप्रतिबद्धस्य चिज्ज्ञानं चैतन्यं वा तदेव चिन्मात्रं, तस्मिन् प्रतिबद्धस्तन्निश्चयाभिमुखकृतप्रवृत्तिस्तत्स्वरूपमयरचितरूपो वा तस्य । पुद्गलनियंत्रणा पुद्गलैः पुद्गलेषु वा तज्जन्यपदार्थैस्तेषु वा या नियंत्रणा नितरां प्रतिरुद्धता बन्धनमिति यावत् । का कीदृशी ? न कापीत्यर्थः । तेषां विजातीयत्वादज्ञजनाचरितत्वाच्चेति । अत्र संप्रदायागतमेतत्कथानकम्—

अयोध्यायां पुर्यां श्रीवरो राजासीत् । स च सुगाढतरमिथ्यादृष्टिः । तस्य श्रीकान्तः कुमारः । स रूपलावण्यसौभाग्यैः पुरन्दर इव सकलकलाकलापकलितः शुद्धसम्यक्त्ववान् जीवादिनवतत्त्वविच्छास्त्रश्रवणपठनपाठनरसिक आ बाल्यादपि भोगलालसाविमुखश्च वर्तते स्म । अन्यदोद्यानगतं कुमारं प्रति बह्व्यो राजकन्याः समागताः । तेन ताः प्रोक्ताः—“हे भद्रकारिण्यः ! का यूयं ? कथं पितुर्गृहादिह समागताः ?” ताभिः प्रोक्तं—“वयं नृपसुताः । त्वद्भागायस्कान्ताकर्षिता इष्टकान्तपतिभावेन युष्मच्चरणशरणमिच्छन्त्य इह समागताः स्मः” । ततः कुमारेण प्रोक्तं—“जिनेन्द्रनिषिद्धं कर्मबन्धमूलं भवदुःखविवर्धनं रागं कः सकर्णः कुर्यात् ? सौख्यकरत्वेन धर्मसाधके बाढमेकत्वमागते देहेऽपि स निवारितोऽस्ति, तर्हि पृथग्भूते पदार्थे क्व रागावकाशः ? क्षायिकज्ञानदर्शनचारित्राणां (नरो-

धकत्वेनार्हदादिषु प्रशस्तरागोऽपि निश्चयपदे निषिद्धस्तर्ह्यत्यन्तानर्थवहो विषयरागः कथमादरणीयो भवेत्? । भवे निजस्वभावसमासक्ता वीतरागा एव सुखिनो वर्तन्ते । ततो मम रागो न युज्यते युष्माकमप्यन्येषु रागो न युज्यते" । इत्युपदेशप्रतिबोधितकन्यासहस्रपरिवृतः कुमारो मुनिर्जातः । ततः शुक्लध्यानानलज्वालितकर्मेन्धनो लब्धकेवलो निर्वृतः । ता अपि तथैव सिद्धा इति । एवं सर्वभव्यै रागस्त्याज्य इति ॥ ६ ॥



ननु धर्मोपकरणमपि परिग्रह एव, ममत्वकारणात्, गृहोपस्करवदिति । तन्नेत्याह—

**चिन्मात्रदीपको गच्छेन्निर्वातस्थानसन्निभैः । निष्परिग्रहतास्थैर्यं धर्मोपकरणैरपि ॥ ७ ॥**

चिन्मात्रेति—हे भव्य त्वं शृणु । निर्वातस्थानसन्निभैर्निर्गतो वातो वायुप्रचारो यस्मात्तद्रूपं यत्स्थानं सकपाटगृहादिप्रवेशो यथा प्रदीपस्य निष्प्रकंपताहेतुस्तेन सन्निभानि सदृशानि तैः । धर्मोपकरणैः धर्मं परिरक्षणेन धर्मविघ्नहेतुभूतशीतातपदंशमशकाहारादौ जन्तुपातसमुध्धरणादिना तद्वृद्धिकरणेन चोपकुर्वन्ति यानि रजोहरणमुखपोतिकावस्त्रपात्रादीनि तैर्विद्यमानैरपि । चिन्मात्रदीपको ज्ञानमात्रप्रकाशको ध्यानात्माऽप्रमत्तमुनिः केवली च तत्परिणामोऽपि धर्मोपकरणसाहाय्यान्निरुपद्रवदीपशिखावत् । निष्परिग्रहतास्थैर्यं निर्गतः परिग्रहः सर्वात्मप्रदेशग्रसनसमर्थमूर्छापरिणामस्तस्य भावस्तत्ता सैव तद्रूपं वा स्थैर्यं निश्चलत्वं निरिच्छकवृत्तौ स्थिरत्वमिति यावत् । गच्छेत् प्राप्नुयात् । ततो धर्मोपकरणग्रहणे कुत्र परिग्रहदोषता त्वया दृष्टा? न कुत्रापि, निर्ममभावेन धृतत्वादिति ॥ ७ ॥



परिग्रहस्वरूपं दर्शयन्नुपसंहरति—

**मूर्छाच्छन्नधियां सर्वं जगदेव परिग्रहः । मूर्छया रहितानां तु जगदेवापरिग्रहः ॥ ८ ॥**

मूर्छेति—मूर्छाच्छन्नधियां मूर्छा मोहजा तृष्णा तया छन्ना समाच्छादिता विलुप्ता धीर्बुद्धिर्येषां । तेषां । सर्वं समग्रं । जगद्विश्वं । परिग्रह एव स्वसंग्रह एव तेषां सर्वग्रहयाकांक्षाया विद्यमानत्वात् अविरतत्वाच्च अतिबुभुक्षितस्य सर्वभक्षणातृष्णावत् । तु पुनः । मूर्छयाकांक्षया । रहितानां निर्गतानां । जगदेव सकलत्रिभुवनगतपदार्थसार्थ एव निश्चयेन । अपरिग्रहस्त्याग एव भवति, सर्वस्मान्निवृत्तेच्छत्वान्न कश्चित्तैः संगृहीतोऽस्तीत्यर्थः ॥ ८ ॥

॥ इति परिग्रहाष्टकम् ॥ २५ ॥

# ॥ अथानुभवाष्टकम् ॥ २६ ॥

पञ्चविंशेऽष्टके परिग्रहत्याग उक्तः, स तु वस्तुस्वरूपानुभववतैव यथार्थतया क्रियतेऽतः षड्विंशेऽष्टकेऽनुभवगुणान् दर्शयन्नाह—

**सन्ध्येव दिनरात्रिभ्यां केवलश्रुतयोः पृथक् । बुधैरनुभवो दृष्टः केवलार्कारुणोदयः ॥ १ ॥**

सन्ध्येवेति—भोः परिग्रहत्यागाभिलाषिन् बुधैः सद्भावपण्डितैः । केवलश्रुतयोः केवलं केवलज्ञानं श्रुतं श्रुतज्ञानं तयोः । पृथक् भिन्नः केवलज्ञानावभासस्यात्यासन्नवर्तितया तदंशाधारणकारणत्वेन चिरकालाभ्यस्तयोर्मतिश्रुतयोस्तु प्रकर्षतारूपकार्यत्वेनान्तरालवर्तीति यावत् । तदेवावसरज्ञापनेन स्पष्टयति—केवलार्कारुणोदयः केवलं केवलज्ञानं तदेवार्कः सूर्यस्तस्य योऽरुणोदयोऽदृष्टसूर्यमण्डलात्प्राक् रक्ततारूपप्रकाशस्तेन सदृशो निकटवर्ती । अनुभवोऽनुभवनं साक्षादिव वस्तुस्वरूपवेदनमनुभवो मतिश्रुतयोः परिपाकावस्थारूपमनो-

विश्रामस्थानप्रातिभज्ञानमिति यावत् । यदुक्तं योगदृष्टिसमुच्चये—"मतिश्रुतयोरुत्तरभावी केवलादव्यवहितपूर्वभावी प्रकाशोऽनुभवः" । दृष्टो बुधैर्ज्ञातः । केव ? दिनरात्रिभ्यां दिनं सूर्योदयेनोपलक्षितोऽवसरः, रात्रिस्तदस्तमनोपलक्षितोऽवसरः ताभ्यां विलक्षणा सन्ध्येव द्वयोर्मध्यभागेन रात्रिंदिनयोरिव, तथा श्रुतकेवलयोश्च सन्ध्यावसरसदृशोऽनुभव इत्यर्थः ॥ १ ॥

अनुभवस्य सर्वोत्कृष्टकार्यविधायित्वं श्लोकत्रयेण दर्शयन्नाह—

**व्यापारः सर्वशास्त्राणां दिक्प्रदर्शन एव हि । पारं तु प्रापयत्येकोऽनुभवो भववारिधेः ॥ २ ॥**

व्यापार इति—भोभव्यभावन सर्वशास्त्राणां सर्वाण्यशेषाणि यानि शास्त्राणि जिनागमवेदस्मृत्यादीनि तेषां । व्यापारो वस्तुज्ञापनपराक्रमः शास्त्रज्ञानस्य शक्तिरित्यर्थः । हि स्पष्टं । एवोऽवधारणे । तेन च दिक्प्रदर्शने दिग्वस्तुस्वरूपानुकूलबोधप्रवृत्तेर्विधिकथनमात्रं । यथा पाटलिपुत्रमितो दक्षिणेन पथा गच्छेति । तस्याः प्रदर्शनं श्रोत्रादेर्दृश्यकरणं जागरितकरणं चेति यावत् तस्मिन्नेव भवति, न तु तत्स्वरूपस्य हस्तयोः समर्पणं । तु पुनः । भववारिधेः संसारसागरस्य । पारं परतीरं । एकोऽद्वितीयः । अनुभवः पूर्वव्याख्यातरूपः । प्रापयति नयति । तस्यात्मस्वरूपस्पर्शिबोधमयत्वादिति ॥ २ ॥

कुत एवं तत्प्रौढिमेत्याकांक्षायामाह—

**अतीन्द्रियं परं ब्रह्म विशुद्धानुभवं विना । शास्त्रयुक्तिशतेनापि न गम्यं यद्बुधा जगुः ॥ ३ ॥**

अतीन्द्रियमिति—हे शिष्य यद्यस्माद्वक्ष्यमाणहेतोः । विशुद्धानुभवं विना विशेषेण शुद्ध आवरणविगमाद्विमलोऽनुभवः परिपक्ववस्तुस्वरूपस्पर्शिबोधस्तं विना रहितेन । शास्त्रयुक्तिशतेनापि शास्त्रमुखेन प्रोक्ता या युक्तयो वस्तुबोधकानुमानलिंगादिप्रकारास्तासां

यच्छतं शतशः संख्यापरिमाणं तेनापि । स्तोकानां तु का कथेत्यपेरर्थः । अतीन्द्रियमिन्द्रियज्ञानशक्तिमतिक्रम्य दूरवर्ति । परं ब्रह्म सर्वोत्कृष्टं ब्रह्म शुद्धचैतन्यस्वरूपं निरञ्जनं । न गम्यं न ज्ञातुं शक्यं बुधास्तत्त्वज्ञपण्डिताः । जगुः पूर्वोक्तरूपं प्रोचुः ॥ ३ ॥

**ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः । कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ ४ ॥**

ज्ञायेरन्निति—यदि पूर्वोक्तानुभवं विना । हेतुवादेन हेतुभिः प्रमाणतर्कानुमानयुक्तिव्याप्तिफलसंगतिभिर्वादो वस्तुस्वरूपसिद्धये कथनं तेन । अतीन्द्रिया इन्द्रियजन्यज्ञानशक्तिमतिक्रान्ता अवर्णादिमत्त्वेनेन्द्रियैरग्राह्या इति यावत् । पदार्था आत्मधर्मास्त्यधर्मास्त्या-काशपरमाण्वादयो भावाः । ज्ञायेरन् यत्रार्थस्वरूपेण स्वपरहृदयेऽवतारणतोऽवबुध्येरन् । तदा तु एतावता इयत्परिमाणेनान्यासाद्य-दिनादारभ्यानादिकालाद्वारभ्याद्यतनदिनपर्यन्तेन सर्वेणापि । कालेनावसरविशेषेण । प्राज्ञैः पूर्वोक्तहेतुवादपण्डितैः । तेषु पूर्वोक्तात्मादि-पदार्थेषु । निश्चयो निश्चितस्वरूपनिर्धारः । कृतो रचितः स्यात् । तथा प्राज्ञेषु तन्निमित्तको विवादोऽपि निवृत्तो भवेत् । न चैतद्द्वय-मुपलभामहे । ततः सिद्धं अनुभवं विना भवतरणं न भवतीत्यर्थः ॥ ४ ॥

पुनरुक्तार्थमेव समर्थयन्नाह—

**केषां न कल्पनादर्वी शास्त्रक्षीरान्नगाहिनी । विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥ ५ ॥**

केषामिति—शास्त्रक्षीरान्नगाहिनी शास्त्रमागमादि तदेव क्षीरान्नं पायसभोजनं तस्मिन् गाहत इतस्ततः परिभ्रमन्ती विलोड-
११ यतीति सा । ईदृशी कल्पनादर्वी कल्पनाऽनुमानादिना वस्तुस्वरूपनिर्धारणाय विचाररचना सैव दर्वी गोजिह्वाकृतिकाष्ठादिनिर्मिता

चाटवीति लोके । साऽचेतनभूताऽरसज्ञा । केषां प्राज्ञजनानां । न विद्यते ? अपि तु भूयसामस्ति । अनुभवजिह्वयाऽनुभवः पूर्वोक्तलक्षणास्तद्रूपा या जिह्वा सचेतना रसपरीक्षणकुशला रसना तया । तद्रसास्वादविदस्तस्य शास्त्रोक्तभावस्य यो रसः सारांशज्ञानगरिष्ठप्रेमा, तस्य यदास्वादनं स्पर्शज्ञानवत्तया सर्वात्मप्रदेशेषु व्यापनं तद्रूपेण विदन्ति शास्त्रं जानन्ति ये ते । विरलाः कचिल्लभ्याः स्तोकाः सन्तीत्यर्थः ॥ ५ ॥

पुनरप्युक्तार्थमेव विशदयन्नाह—

**पश्यतु ब्रह्म निर्द्वन्द्वं निर्द्वन्द्वानुभवं विना । कथं लिपिमयी दृष्टिर्वाङ्मयी वा मनोमयी ॥ ६ ॥**

पश्यत्विति—भो विशुद्धसत्व । निर्द्वन्द्वानुभवं विना निर्गतं द्वन्द्वं सकलविरुद्धं युगलसंयोगः । यथा क्षुत्पिपासे, शोकमोहौ, रागद्वेषौ, कामक्रोधौ, कलहयुद्धे, शीतातपावित्याद्यभावेन निष्क्लेशमिति यावत् यस्मात् स चासावनुभवः शुद्धबोधस्तं विना रहिता । लिपिमयी पुस्तकन्यस्तसंज्ञाऽक्षरमयी । वाऽथवा वाङ्मयी वचनोच्चाररूपशब्दाक्षरमयी । वाऽथवा मनोमयी हृदये जल्पाकाररूपचिन्तनाक्षरमयी । प्रोक्तत्रिरूपमात्रनिष्पत्तिसंपन्ना या दृष्टिर्दृग् । सा निर्द्वन्द्वं निर्गतं द्वन्द्वं पूर्वोक्तसकलक्लेशत्वं यस्मात्तत् । ब्रह्म निर्विकारचैतन्यमात्रात्मानं । कथं केन प्रकारेण । पश्यतु विलोकयतु ? न कथमपीत्यर्थः ॥ ६ ॥

अथानुभवस्य पूर्णस्वरूपज्ञापिकां दशामाह—

**न सुषुप्तिरमोहत्वान्नापि च स्वापजागरौ । कल्पनाशिल्पविश्रान्तेस्तुर्यैवानुभवो दशा ॥ ७ ॥**

नेति—भो भव्य । अनुभवः सुषुप्तिः प्रबलमिथ्यात्वाज्ञानमोहरूपनिद्रया सुतरां सुप्तिः सर्वत्र शयनसदृशी दशा तद्रूपः स न भवति । कुतः ? यतस्तस्यामोहत्वात् न मोहोऽज्ञानममोहस्तद्भावस्तत्त्वं तस्मात् अज्ञानस्वरूपत्वादिति च पुनः । स्वापजागरौ स्वापो मिथ्यात्वस्य तथातीव्राज्ञानमोहयोरभावाच्छयनस्थनिद्रासदृशी दशा अविरतसम्यग्दृष्टिरूपजागराविरतेरभावाज्जाग्रतो विनिद्रस्वभावा दशा तयोः सदृशोऽपि स न भवति । कुतः? यतः प्रोक्तदशे सकल्पने, अनुभवस्तु कल्पनाशिल्पविश्रान्तेः कल्पनेष्टानिष्टादिविकल्पचिन्तना तद्रूपं यच्छिल्पं घटनाया रचनं तस्य या विश्रान्तिर्विशेषेण निवृत्तिस्तस्याः सकाशात् । विलक्षणत्वात् । तत इष्टानिष्टादिविकल्पविरहादनुभवो निर्विकल्पा तुर्या चतुर्थ्युज्जागरा दशाऽवस्थैव विद्यते इति ॥ ७ ॥

फलदर्शनपूर्वकमुपसंहरति—

**अधिगत्याखिलं शब्दब्रह्म शास्त्रदृशा मुनिः । स्वसंवेद्यं परं ब्रह्मानुभवेनाधिगच्छति ॥ ८ ॥**

अधिगत्येति—मुनिर्मुमुक्षुः साधुः । शास्त्रदृशा शास्त्रमागमतर्कव्याकरणादिरूपं तद्रूपा या दृक् चक्षुस्तया । अखिलं समस्तं बोधरीतिपूर्वकं । शब्दब्रह्म षड्भाषापूर्णं वाङ्मयरूपं । अधिगत्य यथार्थत्वेन ज्ञात्वा । अनुभवेन परिपक्वशुद्धात्मीयभेदविज्ञानेन । स्वसंवेद्यं स्वस्यैवात्मन एव संवेदनयोग्यं ज्ञेयमिति यावत् यत्तत् परं ब्रह्म सर्वप्रकृष्टात्मस्वरूपं । अधिगच्छति प्राप्नोति । अनेन शास्त्रबोधपूर्वकमेवानुभवज्ञानमित्यावेदितमिति ॥ ८ ॥

॥ इत्यनुभवाष्टकम् ॥ २६ ॥

## ॥ अथ योगाष्टकम् ॥ २७ ॥

षड्विंशेऽष्टकेऽनुभव उक्तः, स तु योगिभिः प्राप्यते, अतः सप्तविंशेऽष्टके योगान् प्रदर्शयति—

**मोक्षेण योजनाद्योगः सर्वोऽप्याचार इष्यते । विशिष्य स्थानवर्णार्थालंबनैकाग्र्यगोचरः ॥ १ ॥**

मोक्षेणेति—भो अनुभवाकांक्षिन् । आत्मानमित्यध्याहार्यं । ततो य आत्मानं मोक्षेण सकलकर्मसंबन्धाद्विनिर्मुक्तिर्मोक्षस्तेन सह । योजनात्तत्प्राप्तिद्वारेणैक्यविधानात् । योगोऽवन्ध्यमनःशुध्ध्यादिरूपो मोक्षोपायः । स तु सामान्येन प्रोक्तव्युत्पत्त्यर्थात् सर्वोऽपि जिनागमोक्तोऽशेषोऽपि । आचारश्चरणसप्ततिकरणसप्ततिरूपसमग्रोऽपि साधुक्रियाव्यवहारो मोक्षयोजकत्वेन योग इति यावत् । इष्यतेऽवगम्यते । तथापि विशिष्य शीघ्रं मनःशुद्ध्यादिकार्यविधायिगुणत्वेन विभिद्य समग्राचारराशेः पृथक्कृत्येति यावत् । स्थानवर्णार्थालंबनैकाग्र्यगोचरः स्थानं कायोत्सर्गचैत्यवन्दनगुरुवन्दनादिक्रियासु यथोचितासनमुद्रादिविधानं, वर्णाः सपदच्छेदास्खलितस्फुटतया सूत्रपदादेरुच्चारणरूपाः, अर्थ उच्चार्यमाणशास्त्रपदगतवाच्यभावस्य चिन्तनं, आलंबनं जिनस्वरूपजिनबिंबादिके दृग्लक्ष्यनिवेशनं, एकाग्र्यं क्रियमाणकर्तव्यविशेषादन्यत्र मनसो लक्ष्यस्याकरणत्वं, एतेषां द्वन्द्वे कृते, एते गोचरा विषयव्याप्तिस्थलानि यस्य स योगः प्रोच्यत इति ॥ १ ॥



योगस्य भेदस्वामिनौ दर्शयन्नाह—

**कर्मयोगद्वयं तत्र ज्ञानयोगत्रयं विदुः । विरतेष्वेव नियमाद्बीजमंत्रं परेष्वपि ॥ २ ॥**

कर्मेति—तत्र तस्मिन् पञ्चविधयोगसमूहे । कर्मयोगद्वयं द्विविधः स्थानवर्णात्मकः कर्मयोगः, कर्मक्रियारूपत्वेन पुण्यबन्धफलत्वेन च कर्मत्वमस्ति, यस्य योगस्य शिवोपायस्य तं विदुः । ज्ञानयोगत्रयं अर्थालंबनैकाग्र्यात्मकस्त्रिविधो ज्ञानयोग ज्ञानमान्तरपापप्रवृत्तिरोधकब्रह्मसंवेदनत्वजनकविशिष्टबोधमयो योगो मोक्षप्राप्तेरव्यभिचारि साधनं, तं विदुर्जानन्ति । एष पूर्वोक्तः पञ्चविधो द्विविधो वा योगः । विरतेषु विरता देशतः सर्वतश्च त्यक्तारंभास्तेषु । नियमान्निश्चयेन भवति तेषां सदैव मोक्षोपाये प्रवृत्तत्वात् । इतरेष्वपि प्रोक्तव्यतिरिक्तेष्वविरतसम्यग्दृष्टिमार्गानुसारिप्रभृतिष्वपि । बीजमात्रं योगोत्पत्तिहेतुमात्रं मुद्रालंबनादिकं किञ्चित्संभाव्यत इति ॥ २ ॥

पुनरस्य सप्रभावानुत्तरभेदानाह—

**कृपानिर्वेदसंवेगप्रशमोत्पत्तिकारिणः । भेदाः प्रत्येकमत्रेच्छाप्रवृत्तिस्थिरसिद्धयः ॥ ३ ॥**

कृपेति—अत्रास्मिन् पञ्चविधे योगे । प्रत्येकमेकमेकं प्रतीति प्रत्येकं स्थानादियोगस्य इच्छाप्रवृत्तिस्थिरसिद्धयो योगनामानः । भेदाः प्रकारा भवन्ति । किंविशिष्टा भेदाः ? कृपानिर्वेदसंवेगप्रशमोत्पत्तिकारिणः उद्देशानुक्रमेणेच्छादिकाः, कृपा प्राणिष्वनुकंपा, निर्वेदो भवभ्रमणतस्त्रासः कदाहमस्माद्भवभ्रमणान्मुच्येयम् इत्येवंरूपः, संवेगो मोक्षाभिलाषः जन्मादिक्लेशलेशवर्जितो मोक्षो मे कदा भविष्यतीत्येवंरूपः, प्रशमः प्रशान्तेन्द्रियविषयकषायता, तेषां योत्पत्तिर्भविनां हृदये प्रादुर्भावस्तां कुर्वन्ति रचयन्ति ते तथाविधा इच्छादयो योगभेदाः सन्तीति ॥ ३ ॥

अथेच्छादीना स्वरूपं दर्शयन्नाह—

**इच्छा तद्वत्कथाप्रीतिः प्रवृत्तिः पालनं परम् । स्थैर्यं बाधकभीहानिः सिद्धिरन्यार्थसाधनम् ॥ ४ ॥**

इच्छेति—तद्वत्कथाप्रीतिः यस्य शास्त्रोक्तक्रियां कर्तुमशक्तस्य भव्यस्येति संबन्धोऽध्याहार्यः । स पूर्वोक्तयोगोऽस्ति येषां तेषां संबन्धिनी या कथा गुणरागिविद्वज्जनैः क्रियमाणा योगिगुणवार्ता । यद्वा तद्वती योगस्वरूपप्रतिपादनवती या कथा व्याख्या तस्यां यस्य प्रीतिः प्रेमपरता भवेत् सा । इच्छेति पदैकदेशे पदसमुदायोपचारादिच्छायोगो भवति, शास्त्रोक्तभावस्य करणाभिलाषेण परिणतत्वात्, अन्यथा तं विना तत्कथायां प्रीतिर्न स्यादिति भावः । परं प्रकर्षोद्यमविधिपूर्वकं । पालनं शास्त्रोक्तव्रतक्रियाश्रुताभ्यासादीनां सेवनं । स प्रवृत्तिरिति प्रवृत्तियोगो भवति, शास्त्रोक्तार्थे प्रवृत्तत्वात् । बाधकभीहा निर्बाधयन्ति प्रतिरोधयन्ति ज्ञानादिगुणानिति बाधका धर्मविरुद्धाशयातिचारास्तेभ्यो या भीर्भयं तस्या या हानिरभावो निरतिचारवृत्तिः । स तस्य स्थैर्यं स्थिरत्वयोगो भवति, बहिरन्तश्चांचल्यवर्जितत्वात् । अन्यार्थसाधनमन्येषामात्मव्यतिरिक्तानां परेषां भव्यानामर्थसाधनं शुद्धदेशनादिभिर्यथायोगं योगांगादीनां प्राप्तिविधानं । स तस्य सिद्धिरिति सिद्धियोगो भवति, परेषां योगनिष्पत्तिकारित्वात् इति ॥ ४ ॥

योगपञ्चकस्य कर्तव्यस्थलं दर्शयन्नाह—

**अर्थालंबनयोश्चैत्यवन्दनादौ विभावनम् । श्रेयसे योगिनः स्थानवर्णयोर्यत्न एव च ॥ ५ ॥**

अर्थेति—भो योगोत्सुक । चैत्यवन्दनादौ चैत्यानि जिनबिंबानि तेषां वन्दनं प्रणिपातदण्डकपाठादिभिः स्तवनं, तदादि

यस्मिन् । आदिपदाद्गुरुवन्दनावश्यकादीनि ग्राह्याणि । तस्मिन् । अर्थालंबनयोरर्थ उच्चार्यमाणवाक्यस्य भावार्थः, आलंबनं पदवाच्यपदार्थस्वरूपमर्हदात्मगुरुसिद्धजिनवाण्यादिवस्तुरूपं, तयोरर्थालंबनयोः । विभावनमेकाग्रमनसा स्मरणं हृच्चक्षुषा विलोकनमिति यावत् । योगिनो मुनेः । श्रेयसे मोक्षप्राप्त्यादिसकलकल्याणाय संपद्यते । तथा स्थानवर्णयोः स्थानं क्रमेण शक्रस्तवसर्वत्रसूत्रोच्चारयोः १ कायोत्सर्गगुरुवन्दनयोः २ त्रिविधे प्रणिधाने च योग १ जिन २ मुक्ताशुक्ति ३ मुद्राभिः शरीरावयवनिवेशनं नानाविधासनविधानमिति यावत् । वर्णा अक्षराणि । तेषां शुद्धं सहस्वादिसविभक्तिस्फुटोच्चारणं तयोर्विषये । यत्नः सोपयोगोद्यमः । योगिनः साधोः श्रेयसे भवति, मनऐकाग्र्यकारित्वादिति ॥ ५ ॥

आलंबनं सभेदं विवृणोति—

**आलंबनमिह ज्ञेयं द्विविधं रूप्यरूपि च । अरूपिगुणसायुज्यं योगोऽनालंबनं परम् ॥ ६ ॥**

आलंबनमिति—आलंबनं हृदा विलोकनीयलक्ष्यवस्तु तद्द्विविधं भवति । रूपि मूर्तिमत् भवस्थार्हत्तद्बिंबगुरुलोकाकारादिरूपं । अरूपि सिद्धात्मज्ञानगुणगगनादिरूपं । इह चैत्यवन्दनादौ । ज्ञेयं बोध्यं लोकाकारगगनप्रदेशादीनां आलंबनं च चतुर्विंशतिस्तवश्रुतस्तवयोरुच्चारे स्पष्टं स्यात् इति ज्ञेयं । च पुनः । तयोर्मध्याद्यत् अरूपिगुणसायुज्यं अरूपि सिद्धादयो गुणा ज्ञानादयस्तैः । यद्वाऽरूपिणां ये गुणा निराकाराविनाशित्वादयस्तेषु । यत्सायुज्यं सह युज्यते समाधत्त इति सयुक् तस्य भावः सायुज्यमेकत्राभेदपरिणतौ समवस्थानं तैः सहाभेदभावेन परिणमनस्थितिरिति यावत् तत् । परं प्रकृष्टं । अनालंबनं न विद्यत आलंबनं पररूपग्रहणं यत्र तद्रूपं । योगो मोक्षप्राप्तेरुपायो भवतीति ॥ ६ ॥

पुनर्भेदान्तरं दर्शयन्नाह—

**प्रीतिभक्तिवचोऽसंगैः स्थानाद्यपि चतुर्विधम् । तस्मादयोगयोगाप्तिर्मोक्षयोगः क्रमाद्भवेत् ॥ ७ ॥**

प्रीतिभक्तीति—प्रीतिभक्तिवचोऽसंगैः प्रीतिर्यत्र कर्ता स्वात्मनि हितबुध्ध्युदयतः शेषत्यागेनोक्तानुष्ठानं परमादरपरः करोतीति प्रीत्यनुष्ठानं, भक्तिर्यत्रानुष्ठाने कर्ता निरालस्यबहुमानतया गौरवविशेषादभ्युत्थानादिसन्मानपरः सन् विशुध्दतरयोगेन करोति तद्भक्त्यनुष्ठानं, वचो यत्र कर्ता सर्वत्रौचित्यपूर्वकमागमोक्तानुसारेण प्रवृत्तिं करोति तद्वचनानुष्ठानं, असंगं यत्र कर्तुरभ्यासातिशयात्सात्मीयभावभूतमिव सहजतया शास्त्राविरुध्दशास्त्रश्रवणं विनाचरणा प्रवर्तते तदसंगानुष्ठानं, तेषां द्वन्द्वे कृते तैः । स्थानादि मुद्रादियोगपञ्चकं । चतुर्विधं प्रत्येकं चतुःप्रकारं भवति । इत्येवं योगपञ्चकमिच्छादिचतुष्केन गुणितं विंशतिविधं भवति । ततः प्रीत्यादिचतुष्केण गुणितमशीतिविधं जातं । तस्मात्पूर्वोक्तयोगाराधनात् । अयोगयोगाप्तिर्न विद्यन्ते योगा मनोवाक्कायव्यापारा यस्मिन् स चासौ योगश्च सर्वान्तिमप्रभूतकर्मक्षपणोपायः शैलेश्यवस्थारूपो योगस्तस्याप्तिः प्राप्तिः स्यात् । ततः क्रमात् तत्प्राप्तिसमनन्तरमेव । मोक्षयोगः सकलकर्ममलाभावः स्वरूपावस्थानरूपः । भवेज्जायेतेति ॥ ७ ॥

मोक्षमार्गे पूर्वोक्तयोगानामावश्यकतां दर्शयन्नुपसंहरति—

**स्थानाद्ययोगिनस्तीर्थोच्छेदाद्यालंबनादपि । सूत्रदाने महादोष इत्याचार्याः प्रचक्षते ॥ ८ ॥** 

स्थानादीति—आचार्याः श्रीहरिभद्रादयो योगशास्त्रकर्तारः । स्थानाद्ययोगिनः स्थानं मुद्रासनादिरूपं तदादि येषां । आदिपदात्पूर्वोक्तवर्णादयो ग्राह्याः । तैर्योऽयोगी योगरहितस्तस्य । तीर्थोच्छेदाद्यालंबनात् तीर्थं श्रुतं जिनशासनं च तस्य य उच्छेदो

ऽभावः यदि सर्वथाऽप्राप्तयोगत्वेन विगुणामप्येनं न पाठयामि तदा श्रुताभावो भविष्यति तस्मादयोगिनमप्येनं पाठयामीति। स आदि-र्येषां। आदिपदादापन्नाणासाहाय्यवैयावृत्त्यादयो ग्राह्याः। रोगाद्यापत्सु मे सहायो भविष्यतीत्येवं भावनीयं। तद्रूपं यदालंबनमपवाद-सेवने कारणं तस्मादपि सकारणेऽपि, तर्हि निःकारणे तु का वार्तेत्यपेरर्थः। सूत्रदाने चैत्यवन्दनादिसूत्राणामध्यापने। महादोषो महाननन्तसंसारदुर्लभबोध्यादिप्रदो दोषः सूत्राशातनाविनाशादिरूपोऽपराधो भवति। इत्येवं दुःखहेतुत्वं। प्रचक्षते वदन्तीति ॥ ८ ॥

॥ इति योगाष्टकम् ॥ २७ ॥

# ॥ अथ नियागाष्टकम् ॥ २८ ॥

सप्तविंशेऽष्टके योग उक्तः, स तु नियागवता प्राप्यतेऽतोऽष्टाविंशेऽष्टके नियागं प्रदर्शयति—

**यः कर्म हुतवान् दीप्ते ब्रह्माग्नौ ध्यानधाय्यया। स निश्चितेन यागेन नियागप्रतिपत्तिमान् ॥ १ ॥**

य इति—हे योगोत्कशिष्यप्रवर यो विजितेन्द्रियो योगी। ध्यानधाय्यया ध्यानं ध्येयविषये मनस ऐकाग्र्यं तद्रूपा या धाय्या यज्ञाग्नौ समित्प्रक्षेपाय याज्ञिकानामुपकरणविशेषस्तया संगृह्य सत्तात आकर्ष्यति यावत्। दीप्ते जाज्वल्यमाने तीव्र इति यावत्। ब्रह्माग्नौ ब्रह्म निर्विकारचैतन्यस्वरूपं शुद्धाचारश्च तदेव तद्रूपो वा योऽग्निर्हुतभुक् तस्मिन् कर्मेन्धननिष्ठापनसमर्थे। कर्म ज्ञाना-वरणाद्यष्टविधपशुगणं। हुतवान् होमं कृतवान्। धर्मध्यानादिपरिणामयुक्तशुद्धाचारप्रवृत्तिरूपब्रह्मणि स्थितः सन् कर्मनिकरं क्षपि-तवानित्यर्थः। स पूर्वोक्तलक्षणो मुनिः। निश्चितेन निर्धारिताभ्यन्तरिकरत्नत्रयात्मकतीव्रवीर्यपरिणाममयेन। यागेन सुविचाररूपम-

हामंत्रयुक्तत्वेन । नियागप्रतिपत्तिमान् निर्गताग्निक्रियारंभविधिर्ज्ञानयज्ञस्वीकारवान् यद्वा नितरां यागोऽतिशयेन परमेश्वरपूजा तस्मिन् प्रतिपत्तिमान् गौरववान् स्वीकारकर्ता च भवेत् ॥ १ ॥

पूर्वोक्तयज्ञाय भव्यानुपदिशति—

**पापध्वंसिनि निष्कामे ज्ञानयज्ञे रतो भव । सावद्यैः कर्मयज्ञैः किं भूतिकामनयाविलैः ॥ २ ॥**

पापेति—भो भव्य पापध्वंसिनि पापमशुभकर्मकल्मषं तद्ध्वंसते नाशयतीति तस्मिन् । निष्कामे निर्गतः कामो निखिलाभिलाषो यस्मात्तस्मिन् । ज्ञानयज्ञे ज्ञानं स्वपरस्वरूपावभासिपरमविशुद्धकारिबोधः तद्रूपस्तन्मयो वा यो यज्ञो देवताविशेषस्य पूजा तस्मिन् रतः प्रीतचित्तः । भव तिष्ठ । सावद्यैः सहावद्येन पशुवधादिपापेन वर्तन्ते तैः पापमयैः । भूतिकामनया भूतयः सुखसंपदस्तासां या कामना प्राप्त्यभिलाषस्तया । आविलैर्मलिनैः । कर्मयज्ञैः कर्म होमाहुतिप्रक्षेपणादिक्रिया तन्मया ये यज्ञा अग्निष्टोमादिका देवतोद्देशेन बलिप्रदानरूपास्तैः । किं किं कार्यं सिध्यति । न किमपीत्यर्थः ॥ २ ॥

अथ ये कर्मयज्ञं वेदोक्तत्वेन मनःशुध्धिहेतुं ब्रह्मयज्ञमेव मन्यन्ते तान् शिक्षयन्नाह—

**वेदोक्तत्वान्मनःशुध्ध्या कर्मयज्ञोऽपि योगिनः । ब्रह्मयज्ञ इतीच्छन्तः श्येनयागं त्यजन्ति किम् ॥३॥** 

वेदोक्तेति—कर्मयज्ञोऽपि कर्मयज्ञः पूर्वोक्तपशुवधादिक्रियारूपः सोऽपि । यद्यपि हिंसामयस्तथापि वेदोक्तत्वात्तस्य वेदशास्त्रे कर्तव्यत्वेन प्रतिपादितत्वाद्वेदोक्तकरणे दोषाभावाद्धेतोः । मनःशुध्ध्या मनश्चित्तं तस्य शुद्धिर्विमलता तया हेतुभूतया वर्तते । कर्मय-

ज्ञेन सा मनःशुद्धिः संपद्यते । यद्वा वेदोक्तं करोमीति परिणामशुद्ध्या क्रियत इत्यर्थः । तया हेतुभूतया । योगिनो ब्रह्मज्ञानिनः जनस्य । ब्रह्मयज्ञो ज्ञानयज्ञो यद्वा ब्रह्मणो निमित्ते यज्ञो भक्तिः पूजा तज्ज्ञानकृद्भवति । इतीत्थं पूर्वोक्तप्रकारं फलं । इच्छन्तः कर्मयोगेन ब्रह्मयागमभिलषन्तः । किं कस्मात् । श्येनयागं श्येनः शक्रपक्षी तेन यागो यजनं तं । त्यजन्ति त्यागं कुर्वन्ति । भवतां वेदप्रामाण्यात् । सोऽपि ब्रह्मयज्ञत्वेन स्वीकर्तुमुचितः, तस्यापि वेदोक्तत्वात् । यदुक्तं—" श्येनेनाभिचरन् यजेदिति " । यथा कश्चिद्भक्ति प्रतिपाद्यफलत्यागेन वेदोक्तक्रियया मनः सत्त्वशुद्धिद्वारा विविदिषासंपत्तये स्यात् तथा न ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसेत्यादिश्रुतेः । यथात्र श्येनयागे श्रुतफलत्यागेन विविदिषार्थता नास्ति तथा भूतिकामः पशुमालभेतेत्यादिवाक्येऽपि यथाश्रुतफलत्यागेन विविदिषार्थता न स्यादित्यर्थः ॥ ३ ॥

गृहस्थोद्देशेन कर्मयज्ञमाह—

**ब्रह्मयज्ञः परं कर्म गृहस्थस्याधिकारिणः । पूजादि वीतरागस्य ज्ञानमेव तु योगिनः ॥ ४ ॥**

ब्रह्मयज्ञ इति—गृहस्थस्य सदैव कुटुंबपालनादिना गृहारंभे प्रवर्तमानस्य । अधिकारिणो न्यायोपार्जितद्रव्यादिमत्त्वेन कर्मयज्ञविधौ योग्यस्य सावद्यप्रवृत्तिमत्वात्तस्य । वीतरागस्य सकलकर्मोपाधिविगमान्निरञ्जनार्हत्परमेश्वरस्य । पूजादि पूजा जलचन्दनपुष्पधूपदीपालंकारैरर्चनं सादिर्यस्य । आदिशब्दाज्जिनभुवनबिंबप्रतिष्ठोद्यापनमुनिदानयात्रादयो ग्राह्याः । तद्रूपं परं प्रकृष्टमुचितत्वाच्छुद्धं निर्दोषमिति यावत् । कर्म प्रोक्तपूजारूपकर्मयज्ञः । ब्रह्मयज्ञः पूर्वोक्तज्ञानयज्ञहेतुत्वेन ब्रह्मयज्ञरूपो ज्ञेयः । योगिनस्तु सर्वारंभवर्जितमुनेः पुनः । ज्ञानमेव स्तुतिस्तोत्रादिना पूर्वोक्तो ज्ञानयज्ञ एवोचितो न कर्मेत्यर्थः ॥ ४ ॥

उक्तार्थमेव समर्थयन्नाह—

**भिन्नोद्देशेन विहितं कर्म कर्मक्षयाक्षमम् । क्लृप्तिभिन्नाधिकारं च पुत्रेष्ट्यादिवदिष्यताम् ॥ ५ ॥**

भिन्नेति—भो भव्य यत्कर्म पूजादिकर्तव्यं । भिन्नोद्देशेन भिन्न आत्मनो मोक्षप्राप्तिं विहायान्यो भोगप्राप्त्यादिरूपो यद्वा त्यागिनं विहाय गृहस्थाधिकाररूप उद्देशः प्रवृत्तेः प्रयोजनं तेन । विहितं कृतं । तत्कर्म । कर्मक्षयाक्षमं ज्ञानावरणादिकर्मणां क्षयाय विनाशायाक्षममसमर्थं, इतरोद्देशाशादोषेण नष्टसामर्थ्यात् । च पुनः । क्लृप्तिभिन्नाधिकारं क्लृप्ती रचना नियतता वा तया भिन्नो गृहिमुनिभेदेनारंभविपर्यासादिना वा पृथग्भूतोऽधिकारो योग्यता यत्र तदपि । पुत्रेष्ट्यादिवत् पुत्रस्य पुत्रार्थमिष्टिर्यजनं । यदुक्तं—"गृहीत्वापञ्चवर्षीयां पुत्रेष्टिं प्रथमं चरेदिति " सादिर्येषां तद्वदनर्थकरं । इष्यतां स्वमनसि गृह्यताम् । अयं भावः—यथा जमदग्निना स्वेच्छया रेणुकाकृतप्रार्थनया च पुत्रेष्ट्या विप्रपुत्रत्वक्षत्रियपुत्रत्वोत्पत्तिनिमित्तं विप्रक्षत्रियचरुद्वयं साधितं । ततो लोभान्धया रेणुकया क्षत्रियचरुर्भक्षितः । विप्रचरुस्तु कृतवीर्यनृपपत्न्यै स्वभगिन्यै दत्तः । ततो योग्यताभेदविधानतो महाननर्थः समुपस्थितः । तथैव गृहियोग्यस्नानपूजादिकं कुर्वन् त्यागी, त्यागियोग्यदेशनाभिक्षाटनादिकं कुर्वन् गृही चानर्थं लभतेऽनधिकारप्रयोगत्वादिति ॥ ५ ॥

ननु स्वकृतत्वगर्वत्यागेनेश्वरसमर्पणपूर्वकं सर्वं कुर्वन्न कश्चिदनधिकारीति चेदत्राह—

**ब्रह्मार्पणमपि ब्रह्मयज्ञान्तर्भावसाधनम् । ब्रह्माग्नौ कर्मणो युक्तं स्वकृतत्वस्मये हुते ॥ ६ ॥**

ब्रह्मार्पणमिति—भो विद्वन् यदि त्वं ब्रह्मार्पण सर्वं स्वकृतं ब्रह्मणि परमेश्वरे यदर्पणं प्रयच्छन् तत्रैवारोपणं एतत्सर्वं परमेश्वरकृतं जातं मत्कृतं न किंचनेति धीरिति यावत् । तत् ब्रह्मयज्ञान्तर्भावसाधनं ब्रह्मयज्ञो ज्ञानयज्ञस्तस्य योऽन्तर्भाव आत्मीयभावफ-

लप्राप्तिस्वीकारस्तस्य साधनं तन्निष्पादकत्वकारणं मन्यसे, यद्वा तत्फलमिच्छसि । तर्हि त्वं तत्कृते स्वकृतत्वस्मये स्वस्य जीवस्य यत्कृतं निर्मितं कर्म तद्भावस्तत्त्वं तद्रूपो यः स्मयोऽहंकारस्तस्मिन् निमित्तभूते । हुते हुतमग्नौ प्रक्षेपणं मया निर्मितमिति अहंकारहोमनिमित्त इति यावत् । कर्मणो ज्ञानावरणादिकस्य । ब्रह्माग्नौ ब्रह्म शुद्धतीव्रोपयोगिज्ञानं निराशंसतपश्च तद्रूपो योऽग्निरूर्ध्वं गच्छतीति व्युत्पत्तिमत्तेजस्तस्मिन् । आहुतिकरणं युक्तं घटमानं । न तु पश्वादेरित्यर्थः ॥ ६ ॥

अथ श्लोकद्वयेन स्वरूपफलदर्शनपूर्वकमुपसंहरति—

**ब्रह्मण्यर्पितसर्वस्वो ब्रह्मदृग्ब्रह्मसाधनः । ब्रह्मणा जुह्वदब्रह्म ब्रह्मणि ब्रह्मगुप्तिमान् ॥ ७ ॥**

**ब्रह्माध्ययननिष्ठावान् परब्रह्मसमाहितः । ब्राह्मणो लिप्यते नाघैर्नियागप्रतिपत्तिमान् ॥ ८ ॥ युग्मम् ॥**

ब्रह्मणीति—ब्रह्माध्ययनेति—वक्ष्यमाणस्वरूपो ब्राह्मणोऽघैर्नलिप्यत इति द्वितीयश्लोकेन संबन्धः । कीदृशोऽसावित्याह—ब्रह्मण्यर्पितसर्वस्वो ब्रह्मणि निर्विकारचैतन्यस्वभावेऽर्पितं निक्षिप्तं सर्वस्वं सर्वात्मभावो येन सः । तथा ब्रह्मदृग् ब्रह्म श्रुतज्ञानं तदेव दृग् नेत्रं यस्य स शास्त्रदृष्टिरित्यर्थः । तथा ब्रह्मसाधनो ब्रह्म शुद्धस्वभावमयो मोक्षः स एव साधनं सदुपायसेवनेन निष्पादनं यस्य सः । तथा ब्रह्मणा शुद्धतपसा । अब्रह्म मदनविकारं । ब्रह्मणि ब्रह्मरूपेऽग्नौ । जुह्वत् हुतवान् । तथा ब्रह्मगुप्तिमान् ब्रह्मणि ब्रह्मचर्ये नवधा शीलरक्षणाकृत ॥ ७ ॥ तथा ब्रह्माध्ययननिष्ठावान् ब्रह्म शुद्धसाध्वाचारस्तस्य प्रतिपादकानि यान्याचारांगस्य नवाध्ययनानि तेषु तदुक्ताचारेषु या निष्ठा परिपूर्णता सा विद्यते यस्य सः । तथा परब्रह्मसमाहितः परब्रह्म परिपूर्णशुद्धात्मस्वरूपं तस्मिन्

सावधानः । तथा नियागप्रतिपत्तिमान् नितरां यागः परमेश्वरपूजनं तस्मिन् प्रतिपत्तिमान् कर्तव्यताज्ञानवान् । ईदृग्ब्राह्मणो ब्रह्मवेदी । अघैः पापकर्मभिः । न लिप्यते नावगुंठ्यत इति ॥ ८ ॥

॥ इति नियागाष्टकम् ॥ २८ ॥

# ॥ अथ भावपूजाष्टकम् ॥ २९ ॥

अष्टाविंशेऽष्टके नियाग उक्तः, स तु भावपूजासाध्योऽत एकोनत्रिंशेऽष्टके भावपूजां निरूपयति । तत्र तावत् श्लोकयुग्मेन तस्या उपस्करं दर्शयति—

**दयांभसा कृतस्नानः संतोषशुभ्रवस्त्रभृत् । विवेकतिलकभ्राजी भावनापावनाशयः ॥ १ ॥**

दयांभसेति—हे नियागोत्सुक शिष्यवर त्वं दयांभसा दया सर्वप्राणिषु द्रव्यभावकरुणारसमग्नता सैवांभो जलं तेन । कृतस्नानः कृतं निर्मितं स्नानं पापमलत्यागरूपात्मांगप्रक्षालनं येन सः । तथा संतोषशुभ्रवस्त्रभृत् संतोषः संतुष्टस्वभावे निश्चलपरिणामित्वं तद्रूपाणि शुभ्रानि सकलसुखहेतुत्वेनोज्वलानुपहतानि वस्त्राणि वासांसि तानि बिभर्तीति मनसांगे धरतीति तथा । तथा विवेकतिलकभ्राजी विवेकः स्वपरस्वरूपभिन्नतानिर्धारकारि ज्ञानं तद्रूपस्तिलको भालस्थलपौंड्रं तेन भ्राजते शोभते यः सः । तथा भावनापावनाशयो भावना आत्मनोऽविनाशित्वादिरूपदेहाद्यनित्यत्वादिचिन्तनपरिणतयस्ताभिः पावन उज्ज्वलः पवित्रश्चाशयोऽभिप्रायश्चित्तभूमिरूपाधारो वा यस्य सः ॥ १ ॥

**भक्तिश्रद्धानघुसृणोन्मिश्रपाटीरजद्रवैः । नवब्रह्मागतो देवं शुद्धमात्मानमर्चय ॥ २ ॥**

भक्तीति—भक्तिश्रद्धानघुसृणोन्मिश्रपाटीरजद्रवैर्भक्तिरेकाग्रचित्तवृत्तिरूपाराध्यतापरिणतिः, श्रद्धानं चित्तप्रसन्नतापूर्वकं जिने जिनमते च परमास्तिक्यं, ते एव तद्रूपे वा घुसृणं कुंकुमं तेनोन्मिश्राः संमिलिताः पाटीरजद्रवाः परमेश्वरे सुरंजनताकारिचान्दनपंकास्तैः । नवब्रह्मांगतो नवभिः संख्येयानि ब्रह्मेति ब्रह्मचर्यरक्षणस्यांगान्युपायास्तत्रार्चनतः । शुद्धात्मानं निर्विकारात्मस्वभावरूपं । देवं परमविलासिनं । अर्चय पूजयेति ॥ २ ॥

पुनः पञ्चभिः श्लोकैः पूजां विशेषयन्नाह—

**क्षमापुष्पस्रजं धर्मयुग्मक्षौमद्वयं तथा । ध्यानाभरणसारं च तदंगे विनिवेशय ॥ ३ ॥**

क्षमेति—हे नियागरत त्वं क्षमापुष्पस्रजं क्षमा क्रोधत्यागपरिणतिस्तद्रूपा या पुष्पस्रक् सुवासनापरिमलभृत् पुष्पमाला तां । तथा धर्मयुग्मक्षौमद्वयं धर्मयोः श्रुतचारित्ररूपयोर्देशसर्वविरतिरूपयोर्निश्चयव्यवहाररूपयोर्वा युग्मं द्वित्वसंयोगस्तद्रूपं क्षौमद्वयं क्षमाऽतसी तद्विकारौ क्षौमे दुकूले तयोर्द्वयं युगलं तत् । च पुनः । ध्यानाभरणसारं ध्यानं मनोवाक्कायैकाग्र्यरूपं धर्मशुक्ललक्षणं तद्रूपं यदाभरणमलंकारजातं तदेव सारं न्याय्यं श्रेष्ठं तत् । तदंगे तस्य पूर्वोक्तशुद्धात्मदेवस्यांगे शरीरे तत्प्राप्त्युपाये च । विनिवेशय विशिष्टविधिना निवेशय रचय स्थापयेत्यर्थः ॥ ३ ॥

**मदस्थानभिदात्यागैर्लिखाग्रे चाष्टमंगलीम् । ज्ञानाग्नौ शुभसंकल्पकाकतुंडं च धूपय ॥ ४ ॥**

मदेति—च पुनः हे नियोगिन् त्वं मदस्थानभिदात्यागैर्मदस्याहंकारविशेषस्य स्थानानि जातिकुलबलरूपश्रुततपोवाल्लभ्यला-भरूपाश्रयास्तेषां भेदाः प्रकारास्तेषां त्यागाः परिहारविशेषास्तैरष्टमदस्थानपरिहारप्रकारैरिति भावः । अग्रे शुद्धात्मदेवमुखाग्रे । अष्ट-मंगलीमष्टानां मंगलानां स्वस्तिकादीनां समाहारोऽष्टमंगली तां । लिख रचय । च पुनः । ज्ञानाग्नौ निर्मलज्ञानज्योतीरूपे निर्धूमव-ह्नौ । शुभसंकल्पकाकतुंरूं शुभाः समुज्ज्वला ये संकल्पा मनोरथास्तद्रूपं काकतुंरूं कृष्णागुरुं । धूपय दीपय निर्विकल्पावस्थापेक्षया ज्वालयेति ॥ ४ ॥

**प्राग्धर्मलवणोत्तारं धर्मसन्न्यासवह्निना । कुर्वन् पूरय सामर्थ्यराजन्नीराजनाविधिम् ॥ ५ ॥**

प्रागिति—हे प्राज्ञ त्वं धर्मसन्न्यासवह्निना धर्माणामौदयिकस्वभावरूपकामनापरिणामानां सन्न्यासस्त्यागो यत्र द्वितीयेऽपूर्वक-रणे स एव वह्निरग्निकुंरूस्तेन । प्राग्धर्मलवणोत्तारं प्राक् सरागावस्थाजन्याः क्षायोपशमिका ये धर्माः सम्यग्दर्शनादयस्तान् क्षायिकभाव-प्राप्त्या लवणोत्तारं लवणावतरणं । कुर्वन् रचयन् सन् । सामर्थ्यराजन्नीराजनाविधिं सामर्थ्ययोगाख्यः क्षपकश्रेणिशिखरे लब्धपरि-णामस्तेन राजन् शोभमानो नीराजना दीपादिभिः सत्करणमारात्रिकमिति यावत् तस्य विधिस्तं । पूरय कुर्विति ॥ ५ ॥ 

**स्फुरन्मंगलदीपं च स्थापयानुभवं पुरः । योगनृत्यपरस्तौर्यत्रिकसंयमवान् भव ॥ ६ ॥**

स्फुरदिति—हे भावनापर अनुभवं आत्मस्वभावास्वादनयुक्तस्पर्शज्ञानं तं । तद्रूपं स्फुरन्मंगलदीपं स्फुरन्ति विलासं दधन्ति मंगलानि अभीष्टसिद्ध्यात्मकानि सर्वोपद्रवशान्तिरूपाणि च तेषां कारकं दीपं दीपवत्प्रकाशकं । पुरः शुद्धात्मदेवमुखाग्रे । स्थाप-

योपढौकय । च पुनः । योगनृत्यपरो योगानां मनोवाक्कायानां शुद्धात्मभावेष्वैकाग्र्यप्रवर्तनं तद्रूपं यन्नृत्यं नर्तनं तस्मिन् परस्तत्परो भव सोपयोगवृत्तिं कुरु । तथा तौर्यत्रिकसंयमवान् तुर्ये मुरजादिवाद्ये भवास्तौर्या वादित्रध्वनयस्तेषां यत्त्रिकं संघः तांत्र्यसुषिरास्फाल्यात्मकं तद्रूपः संयम इन्द्रिययोगकषायनिग्रहरूपः तद्वान् यतनाबन्धनवान् भवेति ॥ ६ ॥

**उल्लसन्मनसः सत्यघंटां वादयतस्तव । भावपूजारतस्येत्थं करक्रोडे महोदयः ॥ ७ ॥**

उल्लसदिति—इत्थं पूर्वोक्तविधिप्रकारेण । भावपूजारतस्य भावेन शुद्धस्वभावेन, वा भावरूपा शुद्धस्वभावसामग्रीमयी, वा भावस्य शुद्धस्वभावस्य या पूजाऽर्चना तस्यां रतस्तत्परस्तस्य । अत एवोल्लसन्मनस उल्लसत्परमाह्लादं प्रकाशं वा गच्छन्मनश्चित्तं यस्य तस्य अत एव सत्यघंटां सत्यं यथार्थवस्तुस्वरूपं तस्य वादस्तथा प्रवर्तनं च तद्रूपा या घंटा प्रसिद्धा तां । वादयतो वादयति नादयतीति तथा तस्य । ईदृशस्य तव । महोदयो महानुदयो योगाधिपत्यं यत्र स मोक्ष इति यावत् । करक्रोडे हस्ततलमध्येऽस्तीति ॥ ७ ॥

अथाधिकारितां दर्शयन्नुपसंहरति—

**द्रव्यपूजोचिता भेदोपासना गृहमेधिनाम् । भावपूजा तु साधूनामभेदोपासनात्मिका ॥ ८ ॥**

द्रव्यपूजेति—भो भव्य भेदोपासना भेदे स्वात्मसत्तातो भिन्ने निष्पन्नानन्दचिद्विलासिनि सिद्धसकलकृतकृत्येऽर्हत्परमेश्वरेऽवलंबनवती, यद्वा भेदैः स्वस्माद्भिन्नरूपपदार्थैः या उपासनाराधना सा तद्रूपा । द्रव्यपूजा द्रव्येण जलचन्दनादिपदार्थेन पूजाऽर्चा

सा । गृहमेधिनां गृहैर्दारैर्मेधन्ते संगच्छन्ते ये तेषां गृहस्थानां । उचिता योग्यास्ति । तु पुनः । अभेदोपासनात्मिका न भेदः स्वात्मनः सकाशान्न भिन्नाधारावलंबिनी योपासनाराधना सैवात्मा स्वरूपं यस्याः सा । भावपूजा निर्विकल्पसेवा । साधूनां त्यागिनामुचिता । सविकल्पा तु गृहिणामपि भवतीत्यर्थः ॥ ८ ॥

॥ इति भावपूजाष्टकम् ॥ २९ ॥

# ॥ अथ ध्यानाष्टकम् ॥ ३० ॥

एकोनत्रिंशेऽष्टके भावपूजोक्ता, सा तु ध्यानेन लभ्यतेऽतस्त्रिंशेऽष्टके ध्यानं प्रदर्शयति—

**ध्याता ध्येयं तथा ध्यानं त्रयं यस्यैकतां गतम् । मुनेरनन्यचित्तस्य तस्य दुःखं न विद्यते ॥ १ ॥**

ध्यातेति—हे भावपूजननिरत यस्य वक्ष्यमाणगुणैर्युक्तस्य । अनन्यचित्तस्य नास्त्यन्यदात्मस्वरूपाद्भिन्नं चित्तं मनस उपयोगो यस्य तस्यैकाग्रचित्तस्य । मुनेः साधोः । ध्याता ध्यानकर्ता । ध्येयं ध्यातुं योग्यं वस्तु । ध्यानं ध्यातुर्व्यापारः । एतत्त्रयं पूर्वोक्तवस्तुत्रिकं । एकतामेकस्य भाव एकताऽभिन्नाधारता तां । गतं वक्ष्यमाणप्रकारेण प्राप्तं, आत्मैव ध्यातादित्रिरूपतां गत इत्यर्थः । तस्य पूर्वोक्तलक्षणस्य मुनेः दुःखं संतापो रागादिजनितक्लेशो वा । न विद्यते नास्ति, तन्निमित्तभूतमनश्चापल्याभावादिति ॥ १ ॥

ननु तदैक्यं कथं स्यादित्यत्राह—

**ध्यातान्तरात्मा ध्येयस्तु परमात्मा प्रकीर्तितः । ध्यानं चैकाग्र्यसंवित्तिः समापत्तिस्तदेकता ॥२॥**

ध्यातेति—भो भद्र शृणु, तत्र तावत् ध्याता ध्यानभावसाधकः। अन्तरात्मा त्यक्तबहिर्मतिर्वक्ष्यमाणलक्षणो जीवः। तल्लक्षणं श्रीहेमसूरिपूज्यैरेवं प्रोक्तं—" अमुञ्चन् प्राणनाशेऽपि संयमैकधुरीणताम्। परमात्मसमं पश्यन् स्वस्वरूपापरिच्युतः॥ १॥ उपतापमसंप्राप्तः शीतवातातपादिभिः। पिपासुरमराकारयोगामृतरसायनम्॥ २॥ रागादिभिरनाक्रान्तं क्रोधादिभिरदूषितम्। आत्मारामं मनः कुर्वन्निर्लेपः सर्वकर्मसु॥ ३॥ विरतः कामभोगेभ्यः स्वशरीरेऽपि निःस्पृहः। संवेगोदधिनिर्मग्नः सर्वत्र समतां श्रयन्॥४॥ नरेन्द्रे वा दरिद्रे वा तुल्यकल्याणकामनः। अमात्रकरुणापात्रं भवसौख्यपराङ्मुखः॥ ५॥ सुमेरुरिव निष्कंपः शशीवानन्ददायकः। समीर इव निःसंगः सुधीर्ध्याता प्रशस्यते॥ ६॥ एवं साधकदशां प्राप्तोऽन्तरात्मा ध्याता भवतीत्यर्थः। ध्येयं तु क्षपितघातिकर्मचतुष्टयोऽनन्तविज्ञानमयोऽर्हन्, यद्वा नष्टाष्टकर्मपरमज्योतीरूपः सिद्धः। परमात्मा प्रकीर्तितः कथितः। ध्यानं तु अर्हत्सिद्धस्वरूपे ऐकाग्र्यसंवित्तिरेकं एवाग्रं चिन्तनीयभावो यस्यां सैकाग्रा, तस्या भाव ऐकाग्र्यं तेन संवित्तिर्ज्ञानं भवति। समापत्तिः समेकीभावेन ध्यातरि ध्येयध्यानयोरापत्तिः प्राप्तिर्लयसमवतारपरिणामितेति यावत्। सा तदेकता तेषां ध्यातृध्येयध्यानानामेकताऽभेदता, तेषामात्मभावत्वाद्भवतीत्यर्थः॥ २॥

समापत्तिलक्षणमाह—

**मणाविव प्रतिच्छाया समापत्तिः परात्मनः। क्षीणवृत्तौ भवेद्ध्यानादन्तरात्मनि निर्मले॥ ३॥**

मणाविति—हे भव्य। इव यथा। मणौ चन्द्रकान्तस्फटिकादिरत्ने। प्रतिच्छायाऽनन्तरितघटादिपदार्थस्य प्रतिबिंबं भवति।

तथा ध्यानादेकाग्रपरिणतिलयवशात्। क्षीणवृत्तौ क्षीणा अभावं प्राप्ता वृत्तयो बुद्धेर्विक्षोभजा मनःप्रवृत्तयो यस्य तस्मिन्। अत एव निर्मले रागादिविक्षोभपंकवर्जिते। अन्तरात्मनि पूर्वोक्तसाधकदशाविराजिते जीवे तदुपयोगे वा। परमात्मनो निष्कर्मचैतन्यस्य। समापत्तिः प्रतिबिंबतया प्रतिभासरूपेण वा समेकीभावरूपापत्तिः प्राप्तिः सा भवति। यदुक्तं—"मणेरिवाभिजातस्य क्षीणवृत्तेरसंशयम्। तात्स्थ्यात्तदञ्जनत्वाच्च समापत्तिः प्रकीर्तिता ॥ १ ॥" इह तात्स्थ्येनान्तरात्मनि परमात्मगुणानां संसर्गारोपः, तदञ्जनत्वेन त्वन्तरात्मनि परमात्मनस्तद्गुणानां चाभेदारोपो ज्ञेय इति ॥ ३ ॥

अथ ध्यानफलं दर्शयन्नाह—

**आपत्तिश्च ततः पुण्यतीर्थकृत्कर्मबन्धतः। तद्भावाभिमुखत्वेन संपत्तिश्च क्रमाद्भवेत् ॥ ४ ॥**

आपत्तिरिति—ध्यानतः प्रथममापत्तिः परिपूर्णात्मस्वरूपानुभवशुद्धसम्यक्त्वज्ञानचारित्रपरमभक्तिभावादीनां प्रापणं सा। ततश्च पूर्वोक्तगुणप्राप्तितः। पुण्यतीर्थकृत्कर्मबन्धतः पुण्यं पवित्रं सकलातिशयसनाथं सद्धर्माधारतीर्थप्रवर्तकतीर्थकृज्जिनस्तत्फलं यन्नामकर्म तस्य यो बन्ध उपार्जनं ततस्तत्प्रदानतः सा फलति। च पुनः। क्रमाज्जन्मान्तरस्थित्यादेः परिपाकात्। तद्भावाभिमुखत्वेन तस्य पूर्वबद्धतीर्थकृन्नामकर्मणो यो भाव उदयावस्था तस्य यदभिमुखत्वं स्वफलदानं प्रति संमुखीभवनत्वं तेन उदयागतत्वेन संपत्तिस्तीर्थकरादिपदप्राप्तिस्तदैश्वर्यभोगश्च भवेज्जायेतेति ॥ ४ ॥

**इत्थं ध्यानफलाद्युक्तं विंशतिस्थानकाद्यपि। कष्टमात्रं त्वभव्यानामपि नो दुर्लभं भवे ॥ ५ ॥**

इत्थमिति—इत्थं पूर्वोक्तप्रकारेण । ध्यानफलाद्ध्यानस्य पूर्वोक्तरूपस्य फलमर्हत्पदप्राप्त्यादि विद्यते यस्मिन् कृते तत्तस्माद्धेतोः । विंशतिस्थानकाद्यपि विंशतिभिः संख्येयानि स्थानकान्यर्हदादिपदानि यत्र तपःस्थितौ तदपि, न त्वेकं ध्यानमेव, किं तु तत्फलवत्तपोऽपीत्यपेरर्थः । युक्तं न्याय्यं मन्यामहे । तु पुनः । कष्टमात्रं तनुशोषणमात्रफलं तपस्तु । भवे संसारे । अभव्यानामपि मुक्तिप्रापणेऽयोग्यजीवानामपि । नो दुर्लभं दुष्प्रापं न भवति, तर्हीतरेषां तत्प्रापणे किं चित्रं ? न किमपीत्यर्थः ॥ ५ ॥

अथ श्लोकत्रयेण ध्यानविधिकथनपूर्वकं ध्यानिनं स्तुवन्नुपसंहरति—

**जितेन्द्रियस्य धीरस्य प्रशान्तस्य स्थिरात्मनः । सुखासनस्य नासाग्रन्यस्तनेत्रस्य योगिनः ॥ ६ ॥**

जितेन्द्रियस्येति—हे ध्यानानन्दप्रवण वक्ष्यमाणस्वरूपस्य ध्यानिनो लोके उपमा नास्तीति तृतीयश्लोकेनान्वयः । कीदृशस्य ध्यानिनः ? जितेन्द्रियस्य जितानि बहिर्वृत्तिनिरोधेन निजस्वरूपग्रहणाभिमुखतां नीतानि इन्द्रियाणि श्रोत्रादीनि येन तस्य । धीरस्य परीषहोपसर्गवर्गनिपातेऽपि निष्प्रकंपस्य । प्रशान्तस्य प्रहतविषयकषायविकारभावस्य । स्थिरात्मनः स्थिरः स्वस्वरूपरमणे निश्चलीकृत आत्मा मनस उपयोगो येन तस्य । सुखासनस्य सुखकारि ध्यानस्यानुपघाति आसनं पद्मासनादिरूपं यस्य तस्य । नासाग्रन्यस्तनेत्रस्य नासाग्रेऽन्यदिग्विलोकननिषेधान्नासिकाया अग्रभागे न्यस्ते स्थापिते नेत्रे चक्षुषी येन तस्य । योगिनो योगा ज्ञानादीच्छादिभक्त्यादिरूपा विद्यन्ते यस्य तस्य ॥ ६ ॥

**रुद्धबाह्यमनोवृत्तेर्धारणाधारया रयात् । प्रसन्नस्याप्रमत्तस्य चिदानन्दसुधालिहः ॥ ७ ॥**

रुद्धेति—धारणाधारया धारणा ध्येयविषये मनसो निरन्तरस्थिरनिवेशनरूपा तस्या या धाराऽखंडसदृशैकपरिणामस्य तीव्रोत्कर्षप्रवाहस्तया। रयाच्छीघ्रं। रुद्धबाह्यमनोवृत्ते रुद्धा निरोधभावं प्राप्ता बाह्याऽनात्मीया मनोवृत्तिश्चेतसः प्रवृत्तिर्यस्य तस्य। प्रसन्नस्य निष्क्लेशत्वेन विशदहृदयस्य। अप्रमत्तस्य मिथ्यात्वादिसर्वप्रमादवर्जितस्य। चिदानन्दसुधालिहश्चिज्ज्ञानं चैतन्यं वा तेन जनितो य आनन्दः स्वाभाविकहर्षप्रकर्षस्तद्रूपा या सुधा पीयूषं तां लेढि समास्वादते यस्तस्य ॥ ७ ॥

**साम्राज्यमप्रतिद्वन्द्वमन्तरेव वितन्वतः। ध्यानिनो नोपमा लोके सदेवमनुजेऽपि हि ॥ ८ ॥**

साम्राज्यमिति—अन्तरेव स्वात्मस्वभावाभ्यन्तरे एव। अप्रतिद्वन्द्वं न विद्यते प्रति निषिद्धं द्वन्द्वं रागादियुगलं यत्र तत्। साम्राज्यं संपूर्णमभंगुरधारावाहिज्ञानं तत्। वितन्वतो विस्तारयतः प्रकृष्टध्यातृदशां प्राप्तस्येत्यर्थः। ध्यानिनो ध्यानवतो योगिजनस्य। सदेवमनुजे देवैश्चतुर्विधामरैर्मनुजैश्च मनुष्यैः सह वर्तते यस्तस्मिन्नपि। लोके सचराचरे विश्वे। हि निश्चयेन। उपमा सादृश्यं न विद्यते, अविनाशिस्वाधीनपरमसुखप्राप्तत्वादिति ॥ ८ ॥

॥ इति ध्यानाष्टकम् ॥ ३० ॥

# अथ तपोऽष्टकम् ॥ ३१ ॥

त्रिंशत्तमेऽष्टके ध्यानं प्रोक्तं, तत्तु तपःसाध्यं अतो ध्यानाभिलाषिभिर्निःस्पृहं तपो विधेयमिति एकत्रिंशत्तमेऽष्टके तपःस्वरूपं प्रदर्शयति—

**ज्ञानमेव बुधाः प्राहुः कर्मणां तापनात्तपः । तदाभ्यन्तरमेवेष्टं बाह्यं तदुपबृंहकम् ॥ १ ॥**

ज्ञानमिति—हे ध्यानासक्त बुधास्तत्त्वसंवेदने कुशला मनीषिणः । ज्ञानमेव । एवोऽवधारणे । तेन ज्ञाननिरपेक्षकायकष्टरूपानशनातापनादिकं विहायैकं ज्ञानस्वरूपमेव, यद्वा ज्ञानविशिष्टं । तपः स्वात्मकनकशोधिकां तपस्यां । प्राहुरुक्तवन्तः । कुतः ? यतः कर्मणां स्वात्मप्रदेशेषु गाढतरसंबन्धेन संश्लिष्टानां ज्ञानावरणाद्यष्टविधानां । तापनात् हेम्नः कीटवज्ज्वालनात् तपो भवति । तत् तथारूपं कर्ममलप्रज्वालनस्वभावमाभ्यन्तरमभ्यन्तरे सम्यग्ज्ञाने सम्यग्दर्शने वा जैनशासने भवमन्तर्गतकार्मणशरीरतापकं च स्वाध्यायध्यानकायोत्सर्गविनयवैयावृत्तिप्रायश्चित्तरूपमेव न त्वन्यत् । इष्टं प्रमाणं, तस्य कर्मप्रज्वालनस्वभावत्वात् । बाह्यं जैनशासनेऽन्यत्रापि च प्राप्यं शरीरकार्श्यकारित्वेन चर्मचक्षुर्दृश्यं च बाह्यशरीरस्य तापनाच्च बाह्यत्वं भवति तत्तु । तदुपबृंहकं तस्याभ्यन्तरतपसः उपबृंहकं वर्धकं भवति । तेन हेतुना तदपीष्टं भवति च द्रव्यसाधनं भावसाधनस्य वृद्धिकरं गात्रज्ञानस्याध्यापकत्रासवदित्यर्थः ॥ १ ॥

तपोवृद्ध्यै स्वात्माऽनादिप्रवृत्तेर्व्यावृत्तमुखो विधेय इत्याह—

**आनुश्रोतसिकी वृत्तिर्बालानां सुखशीलता । प्रातिश्रोतसिकी वृत्तिर्ज्ञानिनां परमं तपः ॥ २ ॥**

आनुश्रोतसिकीति—हे विशुद्धमते बालानां बाला इव बाला अज्ञातपरमार्थतत्त्वास्तेषां । आनुश्रोतसिकी अनु लोकप्रवर्तनेन सह सदृशं श्रोतो दृष्टादृष्टसुखाभिलाषपूर्वकं तपस्यादिप्रवर्तनप्रवाहस्तस्मिन् भवा आनुश्रोतसिकी । वृत्तिर्वर्तना स्थितिः सा । सुखशीलता सुखेनानायासेन शीलनीयाऽभ्यसनीया सुखशीला तद्भावस्तत्ता भवति, अनादितोऽभ्यसितत्वात् । ज्ञानिनां विदितय-

यथार्थवस्तुस्वभावानां तु । प्रातिश्रोतसिकी प्रतिवस्तुस्वरूपे निश्चितं प्रतिबद्धं लोकप्रवृत्तितो व्यावृत्तं च श्रोतो निराशंसभावस्य प्रवाह-स्तस्मिन् भवा प्रातिश्रोतसिकी । वृत्तिर्वर्तनास्थितिः । सा परमं सर्वोत्कर्षरूपं । तपस्तपस्या । ज्ञेयमित्यर्थः ॥ २ ॥

दुष्करमप्यनशनादिकं तपस्तेषां दुःसहं न भवतीत्याह—

**धनार्थिनां यथा नास्ति शीतातपादि दुःसहम् । तथा भवविरक्तानां तत्त्वज्ञानार्थिनामपि ॥ ३ ॥**

धनार्थिनामिति—भो भद्र यथा येन न्यायेन । धनार्थिनां धनेन स्वर्णरत्नादिवित्तार्जनेनार्थः प्रयोजनमस्ति येषां तेषां । शीतातपादि दुःसहं शीतं हिमकणमिश्रितवातादिस्पर्शः, आतपोऽतिखरकिरणरविजनितघर्मः तावादी येषां । आदिपदात्क्षुत्तृषादयो ग्राह्याः । तत् दुःखेन सह्यते यत्तद्दुःसहं । नास्ति न विद्यते । तथा तेनैव प्रकारेण । भवविरक्तानां भवाज्जन्मादिमयसंसाराद्विरक्ता उद्विग्न-चित्ता निर्विण्णास्तेषां । तत्त्वज्ञानार्थिनामपि तत्त्वं वास्तविकात्मस्वरूपं तस्य साक्षात्कारि यज्ज्ञानमनुभवावधिमनःपर्यवकेवलात्मकं तेन तत्प्राप्तिभावेनार्थः प्रयोजनं विद्यते येषां मुनीनां तेषामपि शीतातपक्षुत्तृषादिसहनेन महातपो दुःसहं नास्तीत्यर्थः ॥ ३ ॥

ननु विषयातुराणां धनादिप्रियत्वमिव ज्ञानिनां शीतातपादिक्लेशसहनैः दुःसाध्ये तपसि किं स्वादुतममस्ती-त्याशङ्कायामाह—

**सदुपायप्रवृत्तानामुपेयमधुरत्वतः । ज्ञानिनां नित्यमानन्दवृद्धिरेव तपस्विनाम् ॥ ४ ॥**

सदुपायेति—सदुपायप्रवृत्तानां सन् समीचीन इष्टसिद्धावव्यभिचारी य उपायस्तपःसंयमादिरूपदशविधमुनिधर्मस्तत्र प्रवृत्ता

विहितोद्यमास्तेषां । ज्ञानिनां विदितवस्तुपरमार्थानां । तपस्विनां तपोऽनशनादिषण्मासीपर्यन्तं बाह्यं प्रायश्चित्तादिध्यानकायोत्सर्गपर्यन्तमाभ्यन्तरमस्ति कर्तव्यतया येषां तेषां । उपेयमधुरत्वत उपेयः सर्वोपायेन साध्यः प्रापणीयो विशिष्टानन्दमयो मोक्षस्तस्मिन् यन्मधुरत्वं प्रेमगरिष्ठतारूपं माधुर्यं तस्माद्धेतुतः । एव निश्चयेन । नित्यं सर्वदा सर्वकृत्येषु । आनन्दवृद्धिरानन्दो हर्षोल्लासस्तस्य या वृद्धिः प्रकर्षतावती समृद्धिरेव स्यात्, न तु दुःसहत्वं तेषां चित्ते भातीत्यर्थः ॥ ४ ॥

एवं क्रियास्वानन्दवृद्धिं सदा संवेदनमात्मनश्चिरस्थायित्वं च संसाध्य बौद्धमतं निराकरोति—

**इत्थं च दुःखरूपत्वात्तपो व्यर्थमितीच्छताम् । बौद्धानां निहता बुद्धिर्बौद्धानन्दापरिक्षयात् ॥ ५ ॥**

इत्थमिति—इत्थं पूर्वोक्तप्रकारेण तपस आनन्ददायित्वं ज्ञात्वाऽनुभूय च । दुःखरूपत्वाद्दुःखं कायकष्टं तदेव रूपमाकारभावो यस्य तद्भावस्तत्त्वं तस्माद्धेतोः । तपोऽनशनादितपस्या । व्यर्थं निःप्रयोजनमर्थशून्यमिति यावत् तत्फलभोगिभवान्तरानुयायिजीवस्याभावत्वान्न कर्तव्यं । इतीच्छतां इत्येवं पूर्वोक्तप्रकारमभिलषतां भोगलुब्धानां मोहमूढानां तेषां । बौद्धानां सुगतमतप्रविष्टानां । बुद्धिर्मतिः । निहता निश्चितं नितरां वा हताऽनुभवप्रमाणदंभेन ताडिता, चिरस्थायिपरमानन्दस्य स्पष्टदृष्टत्वात् । कस्माद्धेतोरित्याह—बौद्धानन्दापरिक्षयात् बुद्धिर्ज्ञानं तस्यां तस्याः सकाशाद्वा भवः समुत्पन्नो य आनन्दः परमप्रमोदो बौद्धानन्दस्तस्य योऽपरिक्षयोऽविनाशस्तस्मात्, तपसि ज्ञानानन्दधाराया अखंडत्वदर्शनादित्यर्थः ॥ ५ ॥

१३ अथ श्लोकत्रयेण तपसः शुद्धस्वरूपं दर्शयन्नुपसंहरति—

**यत्र ब्रह्म जिनार्चा च कषायाणां तथा हतिः । सानुबन्धा जिनाज्ञा च तत्तपः शुद्धमिष्यते ॥ ६ ॥**

यत्रेति—हे मुने। यत्र यस्मिंस्तपसि कृते सति। ब्रह्म ब्रह्मचर्यं शुद्धं निर्मलं सुकरमिति यावत्। च पुनः। जिनार्चा वीतरागपूजा सुखेन भवति। तथा तेन भूयोऽनुदयरूपेण। कषायाणां क्रोधादीनां। हतिर्हानिरपकर्षो भवति। च पुनः। जिनाज्ञा सर्वज्ञानुज्ञा प्रवचनानुसारितेति यावत्। सानुबन्धा जिनोक्तिसादृश्यं प्राप्ताराध्यतानुयायिनी भवति इन्द्रियाभिलाषनिराशंसं क्लेशवर्जितं जिनोक्तविधिकृतं निराशंसं यद्भवति। तत्पूर्वोक्तस्वरूपं। तपोऽनशनादिकं। शुद्धं दोषरहितं। इष्यते जिनादिभिः प्रोच्यत इति ॥ ६ ॥

**तदेव हि तपः कार्यं दुर्ध्यानं यत्र नो भवेत्। येन योगा न हीयन्ते क्षीयन्ते नेन्द्रियाणि वा ॥ ७ ॥**

तदेवेति—मुमुक्षुभिः तदेव वक्ष्यमाणविधियुक्तमेव, न त्वनीदृशं। तपोऽनशनषष्ठाष्टमादिकं कार्यं कर्तव्यं। तदेवेति किमित्याह—हि निश्चितं। यत्र यस्मिन् तपसि कृते सति। दुर्ध्यानं क्षुत्तृष्णाशक्तिपीडोत्थार्तध्यानं। नो भवेत् नोत्पद्येत। तथा येन कृतेन तपसा। योगाः स्वाध्यायादयः संयमव्यापाराः। न हीयन्ते कर्तुमशक्यतया हानिं न गच्छन्ति। वाऽथवा। इन्द्रियाणि श्रोत्रादीनि धर्मवृद्धिहेतूनि। न क्षीयन्तेऽन्धबधिरत्वादिना न विनश्यन्तीति ॥ ७ ॥

**मूलोत्तरगुणश्रेणिप्राज्यसाम्राज्यसिद्धये। बाह्यमाभ्यन्तरं चेत्थं तपः कुर्यान्महामुनिः ॥ ८ ॥** ॥७३॥

मूलोत्तरेति—महामुनिर्महान् तत्त्ववेदित्वेन निःस्पृहत्वेन च प्रधानो मुनिः साधुः। मूलोत्तरगुणश्रेणिप्राज्यसाम्राज्यसिद्धये

मूलगुणा धर्मतरोर्मूलभूता ये गुणा ज्ञानचारित्रादयश्चरणसप्ततिरूपा उत्तरगुणास्तस्यैव शाखाप्रतिशाखादितुल्याः समितिपिण्डविशुद्ध्यादयः करणसप्ततिरूपास्तेषां या श्रेणिरुत्तरोत्तरविशुद्धिप्रकर्षरूपप्रवाहस्तद्रूपं यत्साम्राज्यं प्रचुरं विशालं साम्राज्यं साकल्येनाराधकत्वं तस्य या सिद्धिर्निष्पत्तिः संप्राप्तिस्तस्यै । इत्थं पूर्वोक्तविधिप्रकारेण । बाह्यमनशनादिरूपं । आभ्यन्तरं प्रायश्चित्तादिरूपं । तपो ज्ञानविशिष्टतपःक्रियां । कुर्यात्समाचरेदिति ॥ ८ ॥

॥ इति तपोऽष्टकम् ॥ ३१ ॥

# ॥ अथ सर्वनयाष्टकम् ॥ ३२ ॥

पूर्वमेकत्रिंशताऽष्टकैः साध्यसाधने प्रतिपादिते, ते च सर्वनयेषु साम्यं बिभ्रतां यथोक्तफलप्रदानसमर्थे भवतः नैकान्तपक्षपातिनां-तस्मात्सर्वनयसमवतारिवस्तुज्ञानं विधेयं, तदेव च परमार्थसच्चारित्रं भवतीत्यतो द्वात्रिंशत्तमं सर्वनयाष्टकमाह—

**धावन्तोऽपि नयाः सर्वे स्युर्भावे कृतविश्रमाः । चारित्रगुणलीनः स्यादिति सर्वनयाश्रितः ॥ १ ॥**

धावन्त इति—भो वस्तुज्ञानार्ह । सर्वे नैगमादिभेदभिन्नाः समग्राः । नया वस्तुस्वरूपोद्भापनकृते वचनमार्गाः । धावन्तोऽपि स्वस्वपक्षस्थापनाय प्रतिपक्षनयेषु निरपेक्षतया शीघ्रगत्यागच्छन्तोऽपि प्रोक्तरीत्या स्वस्वपक्षपातिनः सन्ति तदपि ते सर्वे । भावे वस्तूनां मूलस्वभावे वस्तुधर्मकदंब इति यावत् । कृतविश्रमाः कृतो विहितो विश्रमः प्रवृत्तिव्यापारस्यावसानं यैस्ते तथाविधाः स्युर्भवन्ति । अत्रायं भावः–सर्वे नयाः स्वस्वमतसमर्थनरसिका वस्तुधर्माणामानन्त्यादेकैकधर्ममुख्यत्वेन भिन्नभिन्नस्वभावं वस्तु शोधयन्ति

स्थापयन्ति च, तथापि तेषां सर्वोऽपि व्यापारो वस्तुधर्मेष्वेव समाप्तो भवति, न तस्माद्बहिरस्ति, वस्तुनोऽनन्तधर्मात्मकत्वात् तेन तेन रूपेण वस्तु वर्ततेऽतः सर्वे वस्तुवादिन इत्यर्थः । इतीत्येवं पूर्वोक्तहेतुतः । चारित्रगुणलीनश्चारित्रस्य निश्चयव्यवहाररूपसंयमस्य ये गुणाः शुद्धात्मस्वरूपप्राप्तिरूपफलानि तेषु यो लीनस्तत्प्रेममग्नचित्तः । स सर्वनयाश्रितः सर्वनयमताराधनायामर्पितमनाः स्याद्भवेदित्यर्थः ॥१॥

**पृथग्नया मिथः पक्षप्रतिपक्षकदर्थिताः । समवृत्तिः सुखास्वादी ज्ञानी सर्वनयाश्रितः ॥ २ ॥**

पृथगिति—पृथग्नयाः पृथगेकैकत्वेन भिन्नाः स्वस्वमतापेक्षिणः परसापेक्षतां विनेति यावत्, नयाः पूर्वोक्ता नैगमादयः । मिथः परस्परमन्योऽन्यमिति यावत् । पक्षप्रतिपक्षकदर्थिताः पक्षः स्वसंमतबलेऽत्याग्रहित्वं, यथा ज्ञानमेवास्तु किं चारित्रेणेति । प्रतिपक्षः स्वविरोधिपरसंमतबले प्रतिघातः । ताभ्यां कदर्थिता विडंबिताः सन्ति । यदुक्तं–“ अन्योऽन्यपक्षप्रतिपक्षभावाद्यथा परे मत्सरिणः प्रवादाः । नयानशेषानविशेषमिच्छन्न पक्षपाती समयस्तथा ते ॥ १ ॥ ” अत्र धर्मग्रहणेऽपि धर्मधर्मिणोरभेदोपचारात्तानाश्रिता धर्मिजीवा ग्राह्याः, नयपक्षस्य धर्मत्वात् । यतः पृथग्नयाश्रितस्य विडंबनास्ति तत एव । ज्ञानी यथार्थवस्तुस्वरूपवेदी स्वज्ञानसाफल्यमिच्छन् । सर्वनयाश्रितः सर्वे च ते नयास्तेषां संमतविशेषा आश्रिता ज्ञानत्वेन वस्तुधर्मत्वेन सापेक्षभावेन च स्वीकृता येन सः । समवृत्तिः समा सर्वनयोक्तभावेषु माध्यस्थ्यभावेन तुल्या वृत्तिः प्रवर्तनमरक्तद्विष्टपरिणतिस्थितिर्यस्य सः । सुखास्वादी सुखस्य विमलज्ञानश्रद्धाजनितानन्दस्यास्वादस्तद्रसानुभवनं विद्यते यस्य स सुखास्वादी भवतीत्यर्थः ॥ २ ॥



ननु तत्सर्वनयाश्रितं ज्ञानं किमुल्लेखवद्भवतीत्याशंक्याह—

**नाप्रमाणं प्रमाणं वा सर्वमप्यविशेषितम् । विशेषितं प्रमाणं स्यादिति सर्वनयज्ञता ॥ ३ ॥**

नेति—नो नैव सर्वमशेषमपि नयवाक्यं, न त्वेकं किंचित्। अविशेषितं स्वीकार्यपरिहार्यस्वभावाभ्यां न भेदितमपरिशोधितविषयस्वरूपं, नित्यत्वमेव सद्वस्तुत्वमित्येवं नावधारितं चेति यावत्। किं तु सामान्येन वस्तुस्वरूपप्रतिपादनमात्रस्वभावं वाक्यं यद्भवेत् तत्तु। अप्रमाणं हेयस्वभावमपि न भवति। वाऽथवा। प्रमाणमुपादेयस्वभावमपि न भवति। किं तूभयोः समत्वाज्ज्ञेयज्ञानस्वभावमात्रं समवस्थितं, ईदृगाशयमद्वाक्यं यथा घटोऽयमिति सर्वनयसम्मतत्वं भजतीत्यर्थः। तथा विशेषितं विषयस्वरूपपरिशोधकनये योजितं शेषनये योजितं शेषनयसापेक्षताशयोपेतं, यथा स्यान्नित्यमित्येवं चोक्तं वाक्यं प्रमाणमुपादेयरूपं भवतीत्यर्थः। इति सर्वनयज्ञता इतीत्येवं पूर्वोक्तप्रकारेण सर्वनयज्ञता सर्वनयज्ञस्य भावस्तत्ता सर्वनयसंमतवाक्याशयस्यबोधकता। स्याद्भवेत्। उक्तं च—" तत्रापि न च द्वेषः कार्यो विषयस्तु यत्नतो मृग्यः। तस्यापि न सद्वचनं सर्वं च यत्प्रवचनादन्यत्॥ १॥ " इति॥ ३॥

सर्वनयज्ञाशयपृथगनयज्ञाशयभृतां क्रमेणेहलोकेऽनन्तरभवं फलं दर्शयन्नाह—

**लोके सर्वनयज्ञानां ताटस्थ्यं वाप्यनुग्रहः। स्यात्पृथग्नयमूढानां स्मयार्तिर्वातिविग्रहः॥ ४॥**

लोक इति—लोके प्रगाढस्वमतकदाग्रहविषयकषायाज्ञानमोहोदयग्रस्ते जने। सर्वनयज्ञानां सर्वे नैगमादयोऽशेषा नया वाक्याशयास्तान् जानन्ति विदन्तीति। यद्वा सर्वनयानां संमतं वाक्योच्चारस्वरूपं जानन्तीति तेषां। तटस्थस्य भावस्ताटस्थ्यं दुराग्रहिणां मार्गेसमवतारणमशक्यं इति बुध्ध्वा माध्यस्थ्यरागद्वेषादिबन्धनेभ्यः पृथक्त्वं भवतीत्यर्थः। वाऽथवा। अनुग्रहः केनोपायेनायं जनः सम्यग्मार्गेऽवतार्य इति करुणारसांचितपरोपकाराशयो भवति। पृथग्नयमूढानां पृथगेकैकनयमताशयेन मूढा व्यामोहितमतयस्तेषां। स्मयार्तिः

स्मयः स्वपांडित्यदर्पोत्थ इतरेषां पराजयकरणाय गर्वः तत्संबन्धिनी आर्तिः पीडा । वाऽथवा । अतिविग्रहोऽतिशायी दुर्निवार्यो विग्रहो विवादसमुत्थवाग्युद्धादिक्लेशो भवतीत्यर्थः ॥ ४ ॥

पुनरिहलोकपरलोकमाश्रितं फलं दर्शयन्नाह—

**श्रेयः सर्वनयज्ञानां विपुलं धर्मवादतः । शुष्कवादाद्विवादाच्च परेषां तु विपर्ययः ॥ ५ ॥**

श्रेय इति—सर्वनयज्ञानां सर्वेषां नयवाक्यानामाशयवेदिनो ये सन्ति तेषां । धर्मवादतो धर्ममयो वादस्तत्त्वावबोधाय परस्परं प्रश्नोत्तरयोः कथनश्रवणेन वस्तुस्वरूपनिर्धारणाय वा परोपकाराय धर्मोपदेशदानाय वदनं वादः स धर्मवाद इत्यर्थः, तस्मात् । विपुलमत्रामुत्रलोके विस्तीर्णं । श्रेयः कल्याणं सुखसंपत्तिरिति यावत् भवति । परेषां तु पृथङ्नयमते व्यामोहितानां तु सर्वत्र । शुष्कवादात् शुष्को यथार्थतत्त्वस्वरूपलाभफलेन शून्यः कंठशोषकरो वादः कषायोदयकारी जल्पस्तस्मात् । च पुनः । विवादाद्विवादः परपक्षपराजयस्वपक्षस्थापनबुध्ध्योत्तरप्रत्युत्तररूपस्तस्मात् । विपर्ययः पूर्वोक्तफलाद्विपरीतत्वं प्रचुरकषायपरिणामेन पापकर्मबन्धाद्विपुलदुःखपरंपरा भवतीत्यर्थः ॥ ५ ॥

अथ सर्वनयज्ञताप्रकाशकांस्तद्रोचकांश्च नमस्करोति—

**प्रकाशितं जनानां यैर्मतं सर्वनयाश्रितम् । चित्ते परिणतं चेदं येषां तेभ्यो नमो नमः ॥ ६ ॥** 

प्रकाशितमिति—यैर्विशालपुण्यवद्भिर्महोपकारिपुंरत्नैरर्हदाचार्यादिकैः । इदं साक्षाद्वर्तमानं पूर्वोक्तलक्षणालक्षितं । सर्वनयाश्रितं सर्वैः सप्तशतसंख्यैर्नयैर्नैगमादिकैराश्रितं सेवितं पूर्णं च । मतमागमशास्त्रं । जनानां गुणप्रियादिसर्वभव्यजीवानां । हिता-

येति शेषः । प्रकाशितमुक्तं । च पुनः । येषां मुमुक्षूणां । चित्ते मनसि । इदं सर्वनयसुन्दरं जिनागमशास्त्रं । परिणतं परि सर्वप्रकारेण नतमात्मनि श्रद्धानभासनरमणरतितयाङ्गाङ्गीभावेन व्याप्तं । तेभ्यो नमो नमो भूयो भूयो नमस्कारोऽस्तु इति ॥ ६ ॥

अथ श्लोकद्वयेन सर्वनयज्ञानां वृत्तिदर्शनपुरःसरमुपसंहरति—

**निश्चये व्यवहारे च त्यक्त्वा ज्ञाने च कर्मणि । एकपाक्षिकविश्लेषमारूढाः शुद्धभूमिकाम् ॥७॥**

**अमूढलक्ष्याः सर्वत्र पक्षपातविवर्जिताः । जयन्ति परमानन्दमयाः सर्वनयाश्रयाः ॥ ८ ॥ युग्मम् ॥**

**निश्चय इति—अमूढेति च—**भोः सर्वनयाश्रयणोचित परमानन्दमयाः परमः सर्वोत्कृष्टो य आनन्दः सहजसुखप्रोल्लासस्तन्मयास्तत्प्रचुरतां प्राप्ता ये ते । सर्वनयाश्रयाः सर्वेषां नयाशयानामाश्रया आधारभूता ये ते पुंरत्नरूपाः । जयन्ति सर्वोत्कर्षेण वर्तन्ते । ते के ? येऽमूढलक्ष्या न मूढं व्यामोहवर्जितं लक्ष्यमन्तर्दृष्टिनिवेशो येषां ते । सर्वत्र सर्वस्मिन् द्रव्यक्षेत्रकालादौ । पक्षपातवर्जिता एकान्तेन विधिनिषेधाग्रहरहिताः सन्तः । निश्चये शुद्धात्मादिद्रव्यमात्रस्वभावे । च पुनः । व्यवहारे गुणपर्यायादिप्रवृत्तिविभागरूपे । ज्ञाने च मतिश्रुताद्युपयोगे । कर्मणि च प्रत्युपेक्षणादिक्रियायां । एकपाक्षिकविश्लेषं एकस्मिन्नेव पक्षः स्वीकारप्रतिज्ञा यत्र, यथा निश्चय एव वरीयान् किं व्यवहारेणेत्येवंरूपः सोऽस्ति यस्मिन् तद्रूपो यो विश्लेषो विपरीतसंसर्गस्तं । त्यक्त्वा विहाय । शुद्धभूमिकां शुद्धा निष्कदाग्रहत्वेन विमला भूमिका चित्तावस्था परिपक्वज्ञानदशा वा तां । आरूढाः प्राप्ताः सन्ति । ते जयन्तीत्यर्थः । तथा त्वमपि तामारोह ॥ ७ ॥ ८ ॥

॥ इति सर्वनयाश्रयणाष्टकम् ॥ ३२ ॥

अथ पञ्चभिः श्लोकैर्द्वात्रिंशदष्टकगतविषयनामानि मुनिविशेषणत्वेन हेतुमद्भावेन योजयित्वा चूर्णायां दर्शयन्नाह—

**पूर्णो मग्नः स्थिरोऽमोहो ज्ञानी शान्तो जितेन्द्रियः । त्यागी क्रियापरस्तृप्तो निर्लेपो निःस्पृहो मुनिः॥१॥**

पूर्ण इति—हे ज्ञानसार शिष्यप्रवर ईदृशो मुनिर्ज्ञानसारं महोदयं समधिगच्छतीति पञ्चमश्लोकेन संबन्धः । कीदृशोऽसावित्याह—पूर्ण आत्मनः पूर्णस्वभावे न्यस्तदृष्टिः १ । तत्प्राप्त्यर्थमेव मग्नः पूर्णानन्दगुणे लीनः २ । तदर्थमेव स्थिरः कृतनिश्चलमनाः ३ । तदर्थमेवामोहस्त्यक्तरागद्वेषविषयकषायममत्वः ४ । तज्जयार्थमेव ज्ञानी सदैव कृतसज्ज्ञानाभ्यासः ५ । तत्प्राप्तय एव शान्तो मितान्तःकरणः ६ । तदर्थमेव जितेन्द्रियो निरुद्धेन्द्रियप्रसरः ७ । तज्जयार्थमेव त्यागी त्यक्तधनकुटुंबादिसंगः ८ । असंगतायै च-क्रियापरः संयमक्रियायां सोद्यमः ९ । तत्संप्राप्तये च तृप्त आत्मनात्मनि संतुष्टः १० । आत्मतुष्टये च निर्लेपः पापलेपरहितः ११ । तदर्थं च निःस्पृहो निरभिलाषः १२ । तदर्थमेव च मुनी रत्नत्रयैकताविन्मौनवान् १३ । इति ॥ १ ॥

**विद्याविवेकसंपन्नो मध्यस्थो भयवर्जितः । अनात्मशंसकस्तत्त्वदृष्टिः सर्वसमृद्धिमान् ॥ २ ॥**

विद्येति—मौनत्वप्राप्तये च विद्या शुद्धज्ञानदशा विवेकश्च जीवकर्मणोर्भेदज्ञानं ताभ्यां संपन्नः, द्वन्द्वान्ते श्रूयमाणत्वात् विद्यासंपन्नः १४ विवेकसंपन्नश्च १५ । तदर्थमेव मध्यस्थः सर्वत्रापक्षपाती १६ । तत्प्राप्तय एव भयवर्जित इहलोकादिभयरहितः १७ । तत्सिद्ध्यै चानात्मशंसकः स्वगुणप्रशंसावर्जितः १८ । तत्सिद्ध्य एव तत्त्वदृष्टिः परमतत्त्वदर्शी १९ । तदर्थमेव सर्वसमृद्धिमान् आत्मन्येव ज्ञातसर्वर्द्धिः २० । इति ॥ २ ॥

ध्याता कर्मविपाकानामुद्विग्नो भववारिधेः । लोकसंज्ञाविनिर्मुक्तः शास्त्रदृग् निःपरिग्रहः ॥ ३ ॥

ध्यातेति—सर्वसमृद्ध्यर्थमेव कर्मविपाकानां कर्मोदयानां ध्याता चिन्तकः २१ । कर्मविमोक्षणायैव च भववारिधेः संसारसागरादुद्विग्नो विरक्तः २२ । तत्प्राप्तये च लोकसंज्ञाविनिर्मुक्तो लोकप्रवाहेऽपतितः २३ । तदर्थं च शास्त्रदृक् सर्वकार्येष्वग्रकृतजिनागमलोचनः २४ । तदर्थं च निष्परिग्रहोऽकिंचनोऽमूर्छितश्च २५ । इति ॥ ३ ॥

शुद्धानुभववान् योगी नियागप्रतिपत्तिमान् । भावार्चाध्यानतपसां भूमिः सर्वनयाश्रयः ॥ ४ ॥

शुद्धेति—निष्परिग्रहार्थमेव शुद्धानुभववान् वस्तुस्वरूपस्पर्शिशुद्धज्ञानवान् २६ । तदर्थं च योगी ज्ञानकर्मादियोगवान् २७ । तत्सिद्धये च नियागप्रतिपत्तिमान् निश्चितकर्तव्यताज्ञानवान् निरवद्यक्रियास्वीकारकारी च २८ । तत्सिद्धये भावार्चाध्यानतपसां भूमिः भावपूजायाः २९ ध्यानस्य ३० तपसश्च ३१ भूमिः स्थानं तद्रूपचित्तावस्थां गतो वा । पूर्वोक्तसर्वसाधनविशुद्ध्यै च सर्वनयाश्रयः सर्वेषां नैगमादिनयवाक्याशयानामाश्रयो भाजनभूतः ३२ तान् समाश्रित इत्यर्थः ॥ ४ ॥

स्पष्टं निष्टंकितं तत्त्वमष्टकैः प्रतिपन्नवान् । मुनिर्महोदयं ज्ञानसारं समधिगच्छति ॥ ५ ॥

स्पष्टमिति—स्पष्टं प्रकटतया । अष्टकैः पूर्वव्याख्यातस्वरूपैर्द्वात्रिंशत्संख्याकैः । निष्टंकितं निर्धारितं । तत्त्वं पारमार्थिकज्ञानक्रिययोः स्वरूपं । प्रतिपन्नवान् स्वीकृतवान् । मुनिः साधुः । ज्ञानसारं ज्ञानस्य सारं फलं परमार्थरूपं । महोदयं मोक्षं महावृद्धिं च । समधिगच्छति सम्यगतिशयेन प्राप्नोतीति ॥ ५ ॥

पुनः श्लोकद्वयेन ज्ञानसारप्राप्तानां फलं दर्शयति—

**निर्विकारं निराबाधं ज्ञानसारमुपेयुषाम् । विनिवृत्तपराशानां मोक्षोऽत्रैव महात्मनाम् ॥ ६ ॥**

**निर्विकारमिति**—निर्विकारं निर्दोषं । निराबाधं वस्तुधर्मे बाधाविरोधरहितं । ईदृशं ज्ञानसारं ज्ञानस्य सारं परमार्थं । उपेयुषां प्राप्तानां । विनिवृत्तपराशानां विशेषेण निवृत्ता विनाशं गता परेषां पौद्गलिकभोगादीनामाशा तृष्णा येषां तेषां । महात्मनां सम्यगात्मभावविलासयुत्तमपुरुषाणां । अत्रैव वर्तमानजन्मन्येव । मोक्षः कर्मबन्धवियोगस्तद्रूपसुखास्वादनतोऽस्तीति ॥ ६ ॥

**चित्तमार्द्रीकृतं ज्ञानसारसारस्वतोर्मिभिः । नाप्नोति तीव्रमोहाग्निप्लोषशोषकदर्थनाम् ॥ ७ ॥**

**चित्तमिति**—हे विज्ञाततत्त्व ज्ञानसारसारस्वतोर्मिभिः ज्ञानं वस्तुस्वरूपनिर्धारकारिबोधस्तस्य सारो रहस्यमस्ति यस्मिंस्तच्च तत्सारस्वतं वाणीविलासरूपं वाङ्मयं तस्योर्मयः कल्लोलास्तैः । आर्द्रीकृतं सुस्निग्धमृदुतां प्रापितं । चित्तं मनः । तीव्रमोहाग्निप्लोषशोषकदर्थनां तीव्रो भयानको यो मोहोऽज्ञानं विषयकषायस्वभावश्च स एवाग्निस्तस्य यः प्लोषो महादाहस्तेन कृतो यः शोषः परमानन्दरसशुष्कता तद्रूपा या कदर्थना पीडा तां । नाप्नोति प्रथमप्रोक्तचित्तं न लभत इति ॥ ७ ॥

ज्ञानसारगरिम्णश्चमत्कारमाह— 

**अचिन्त्या कापि साधूनां ज्ञानसारगरिष्ठता । गतिर्ययोर्ध्वमेव स्यादधःपातः कदापि न ॥ ८ ॥**

**अचिन्त्येति**—भो भव्य साधूनां परमार्थज्ञमुनीनां । ज्ञानसारगरिष्ठता ज्ञानस्य सारांशप्राप्तिजनिता गरिष्ठता प्रौढिमा ।

कापि चित्तचमत्कारदाऽपूर्वा वा । अचिन्त्या चिन्तयितुमशक्यास्ति । किंरूपा सा ? यया गरिष्ठतया । ऊर्ध्वमेव तिर्यगधोगतित्यागेनोपर्येव प्रदेशे भावे च । गतिर्वेगः । स्याद्भवेत् । कदापि कस्मिंश्चिदपि काले । अधःपातो नीचैः प्रदेशे भावे च पतनं । न स्यान्न भवेदिति ॥ ८ ॥

ज्ञानकृते केवलक्रियाकृते च क्लेशक्षये विशेषं दर्शयति—

**क्लेशक्षयो हि मंडूकचूर्णतुल्यः क्रियाकृतः । दग्धतच्चूर्णसदृशो ज्ञानसारकृतः पुनः ॥ ९ ॥**

क्लेशक्षय इति—भो भव्य हि स्फुटं । क्रियाकृतो ज्ञाननिरपेक्षया केवलक्रियासेवनया कृतो निष्पादितः । क्लेशक्षयः क्लेशा रागादयस्तेषां क्षयो विनाशः सः । मंडूकचूर्णतुल्यो मंडूकस्य दर्दुरस्य यानि चूर्णानि पादघातादिना जातानि सूक्ष्मतरशरीरखंडानि तैस्तुल्यः सदृशो भवति, पुनरप्युद्भवं लभत इत्यर्थः । पुनः त्वर्थे योजनीयः । ज्ञानसारकृतो ज्ञानस्य सारांशप्राप्तिपूर्वकध्यानादिना कृतो निष्पादितः क्लेशक्षयस्तु दग्धतच्चूर्णसदृशो दग्धं ज्वालितं तस्य मंडूकस्य चूर्णं तेन सदृशः समानो भवति, भूयस्तद्रूपेण नोत्पद्यत इत्यर्थः ॥ ९ ॥

ज्ञानयुक्तक्रियायां परदर्शनिनामपि संमतिं दर्शयति—

**ज्ञानपूतां परेऽप्याहुः क्रियां हेमघटोपमाम् । युक्तं तदपि तद्भावं न यद्भग्नापि सोज्झति ॥ १० ॥**

ज्ञानेति—परेऽपि व्यासादयोऽपि । ज्ञानपूतां ज्ञानसंयोगेन पवित्रां ज्ञानपूर्वकत्वेनाचरितां शुद्धामिति यावत् । क्रियां धर्मकर्तव्यतां ।

हेमघटोपमां काञ्चनकलशतुल्यां । आहुर्वदन्ति । तदपि तेषां वचोऽपि । युक्तं न्याय्यं । कुतः ? यद्यस्माद्धेतोः । सा ज्ञानयुक्ता क्रिया । नग्नापि कर्मोदयवशात् पतितापि । तद्भावं तदल्पकर्मस्थितिबन्धरूपो यो भावः परिणामस्वन्नावस्तं कोटाकोटीसागरोपमाज्यन्तरबन्धस्थितिस्थानमिति यावत् । नोज्झति न त्यजति । यथा नग्नस्वर्णघटः स्वर्णमूल्यं न त्यजति, तथा पतितापि ज्ञानयुक्तक्रिया बन्धस्थितिवर्धका न नवति, ग्रन्थेर्जिन्नत्वात् सर्वधमुक्तावदित्यर्थः ॥ १० ॥

उक्तार्थमेव समर्थयति—

**क्रियाशून्यं च यज्ज्ञानं ज्ञानशून्या च या क्रिया । अनयोरन्तरं ज्ञेयं नानुखद्योतयोरिव ॥ ११ ॥**

क्रियेति—क्रियाशून्यं क्रियया रहितं । यत् कस्मिंश्चिज्जने ज्ञानं सम्यग्बोधः । च पुनः । ज्ञानशून्या सम्यग्बोधरहिता । या कस्मिंश्चिज्जने । क्रिया चारित्रव्यापारः । सा फलेनातिन्यूनेत्याह—अनयोः पूर्वोक्तज्ञानक्रिययोर्विषये । नानुखद्योतयोरिव नानुः सूर्यः, खद्योतश्च जनप्रसिद्धः पतंगापरनामा कीटविशेषस्तयोरिव । अन्तरं फलतो दूरवर्त्यन्तरालं । ज्ञेयं बोध्यं । क्रियाया देशनिवृत्तिविषयत्वादल्पफलं, ज्ञानस्य च सर्वनिवृत्तिविषयत्वान्महाफलं सार्वत्रिकनानुप्रकाशवदित्यर्थः ॥ ११ ॥

उक्तार्थमेव विशदयन्नाह—

**चारित्रं विरतिः पूर्णा ज्ञानस्योत्कर्ष एव हि । ज्ञानाद्वैतनये दृष्टिर्देया तद्योगसिद्धये ॥ १२ ॥**

चारित्रमिति—जो नव्य पूर्णाऽन्यूना । विरतिः सकलविन्नावस्य निवृत्तिः । एतादृशं चारित्रमात्मनो निवृत्तिस्वरूपं

तत्तु । हि स्फुटं । एव निश्चितं । ज्ञानस्य सद्बोधस्य । उत्कर्षः परमप्रकर्ष एव भवति, न त्वन्यत् । तद्योगसिध्द्ये तस्य पूर्वोक्तस्वरूपचारित्रस्य योगो ह्याभसंबन्धस्तस्य सिध्द्ये निष्पत्तये । ज्ञानाद्वैतनये ज्ञानादभिन्नचारित्ररूपे सद्बोधमार्गे । दृष्टिः शुध्दोपयोगचक्षुः । देयाऽवतारणीयेति ॥ १२ ॥

अथ वाचकेश्वरैः श्रीमद्यशोविजयपादैरेष ज्ञानसारो यत्र क्षेत्रादिके कृतस्तत्प्रकटयन्नाह—

**सिद्धिं सिद्धपुरे पुरन्दरपुरस्पर्धावहे लब्धवान्, चिद्दीपोऽयमुदारसारमहसा दीपोत्सवे पर्वणि ।**
**एतद्भावनभावपावनमनश्चंचच्चमत्कारिणा, तैस्तैर्दीपशतैः सुनिश्चयमतैर्नित्योऽस्तु दीपोत्सवः ॥ १३ ॥**

सिद्धिमिति—अयं पूर्वोक्तगुणः । चिद्दीपो ज्ञानसारदीपकः । पुरन्दरपुरस्पर्धावहे पुरन्दरः सुरेन्द्रस्तस्य पुरममरावती तेन सह स्पर्धावहं साम्यतासंपादकं तस्मिन् । सिद्धपुरे सिद्धपुरनाम्नि नगरे । सिद्धिं निष्पत्तिं । लब्धवान् प्राप्तवान् । कदेत्याह—उदारसारमहसा उदारं स्फारं सारं च मनोहरं यन्महस्तेजोभरस्तेनोपलक्षिते । दीपोत्सवे पर्वणि दीपालिकादिवसे । एतद्भावनभावपावनमनश्चंचच्चमत्कारिणां एतस्य ग्रन्थोक्तार्थस्य भावनभावो रहस्यचिन्तनभावस्तन्मयभवनपरिणामस्तेन पावनं पवित्रीभूतं मनश्चित्तं तस्मिन् चंचन्मनोहरश्चमत्कारोऽस्ति येषां तेषां सतां । तैस्तैरपूर्वापूर्वविलासैः । सुनिश्चयमतैर्निश्चयनयमतप्राप्तिभावजनितैः । दीपशतैर्दीपकश्रे-
१४ णिभिः । नित्योऽविनाशी । दीपोत्सवोऽस्तु भवत्विति ॥ १३ ॥

ज्ञानसारप्राप्तिः केषांचिदेवास्तीत्याह—

केषांचिद्विषयज्वरातुरमहो चित्तं परेषां विषावेगोदर्ककुतर्कमूर्छितमथान्येषां कुवैराग्यतः।
लग्नालर्कमबोधकूपपतितं चास्ते परेषामपि स्तोकानां तु विकारभाररहितं तज्ज्ञानसाराश्रितम् ॥ १४ ॥

केषांचिदिति—अहो आश्चर्य। यत्सत्यपि ज्ञानसारे। केषांचिद्विवेकहीनानां। चित्तं मनः। विषयज्वरातुरं विषयो भोगतृष्णा तद्रूपो यो ज्वरो रोगविशेषस्तेनातुरं व्याकुलं वर्तते। परेषां पुनश्चित्तं। विषावेगोदर्ककुतर्कमूर्छितं विषस्यावेगस्त्वरा स एवोदर्कः भाविफलं धर्मजीवितहरं यस्य तादृशो यः कुतर्को दुष्टन्यायस्तत्र मूर्छितं संलीनं वर्तते। अथान्येषामुक्तेभ्यो व्यतिरिक्तानां चित्तं। कुवैराग्यतो दुःखगर्भमोहगर्भविरक्तत्वतः। लग्नालर्कं लग्नः संसक्तोऽलर्को रोगविशेषः 'हरकवाय' इति लोके। यस्य तत्। च पुनः। परेषां पूर्वोक्तेभ्योऽन्येषां चित्तं। अबोधकूपपतितं न बोधो ज्ञानफलविकलमिथ्याज्ञानं स एव कूपोऽदृष्टतलोऽन्धुस्तस्मिन् पतितमधःक्षिप्तं। आस्ते भवति। पुनः स्तोकानामत्यल्पानां जनानां। तच्चित्तं विकारभाररहितं विकारा रागादयः क्लिष्टपरिणामास्तेषां भारो गुरुता तेन रहितं वर्जितं सत्। ज्ञानसाराश्रितं ज्ञानस्य स्पर्शबोधपरिणामस्य यः सारः सारांशिकभावप्राप्तिः स आश्रितो येन तत्तादृशमास्ते भवतीति ॥ १४ ॥

येषां मनो ज्ञानसाराश्रितं जातं तेषां भाविनीं मंगलश्रेणिप्राप्तिं दर्शयन्नाह—



जातोऽङ्कविवेकतोरणततौ धावल्यमातन्वति हृद्गेहे समयोचिते प्रसरति स्फीते च गीतध्वनौ।
पूर्णानन्दघनस्य किं सहजया तद्भाग्यभंग्याऽभवन्नैतद्ग्रन्थमिषात्करग्रहमहश्चित्रश्चरित्रश्रियः ॥ १५ ॥

जातेति—पूर्णानन्दघनस्य पूर्णः संपूर्णो न तु न्यूनो य आनन्दः प्रमोदस्तेन घनो निबिडव्याप्तो यः सम्यग्दर्शनशुद्धात्मा तस्य । हृदेहे हृन्मानसं तद्रूपं यद्गेहं भुवनं तस्मिन् । कीदृशे ? जातोद्रेकविवेकतोरणततौ जातः संपन्न उद्रेकोऽतिशयवृद्धिर्यस्य स चासौ विवेको जीवकर्मणोर्भेदज्ञानं तद्रूपा या तोरणानां वन्दनमालानां ततिः श्रेणिर्यत्र तस्मिन् । धावल्यं उज्ज्वलत्वं । आतन्वति विस्तारयति । समयोचितेऽवसरोचिते । स्फीते वृद्धिंगते । गीतध्वनौ गीतशब्दे हृद्यपद्यपरावर्तनारूपे । प्रसरति सति विस्तारं गच्छति सति एतद्ग्रन्थमिषात् ज्ञानसारस्य रचनाच्छलात् । सहजया स्वाभाविकया । तद्भाग्यभंग्या तस्य भाग्यरचनया । किमिति प्रश्ने । चित्रः विविधोत्सवमयः । चरित्रश्रियश्चारित्रलक्ष्म्याः । करग्रहमहो विवाहोत्सवः । नाभवत् ? अपि तु अभवदेवेति ॥ १५ ॥

**भावस्तोमपवित्रगोमयरसैर्लिप्तैव भूः सर्वतः संसिक्ता समतोदकैरथ पथि न्यस्ता विवेकस्रजः ।**
**अध्यात्मामृतपूर्णकामकलशश्चक्रेऽत्र शास्त्रे पुरे पूर्णानन्दघने पुरं प्रविशति स्वीयं कृतं मंगलम् ॥ १६ ॥**

भाव इति—पूर्णानन्दघने सच्चिदानन्दपूर्णब्रह्मस्वरूपशुद्धात्मनि । स्वीयमात्मीयं । पुरं द्वात्रिंशदधिकाररचितप्रमादनगरं । प्रविशति समापतति सति । मंगलं मंगलभरं । कृतं वक्ष्यमाणरीत्या रचितं भवति । तदेवाह—भूर्मनोभूमिका । सर्वतो दिक्षु विदिक्षु च । समतोदकैः समतारसजलैः । संसिक्ता संसेकवती कृता । भावस्तोमपवित्रगोमयरसैर्भावस्तोमा ग्रन्थोक्तभावसमूहास्तद्रूपा ये पवित्रगोमयरसाः कामधेनुच्छगणरसास्तैः । लिप्तैव कृतविलेपनैव । अथेत्यनन्तरं । पथि मार्गे । विवेकस्रजो विवेकरूपपुष्पमालाः । न्यस्ता अवलंबिताः । तथाऽध्यात्मामृतपूर्णकामकलशोऽध्यात्ममात्मीयभावस्तद्रूपेणामृतरसेन पूर्णो भृतः कामकलशो मंगलकुंभसमूहः । अत्रास्मिन् । शास्त्रे शास्त्रनामके पुरे नगरे । चक्रे विदधे । तेन स्वीयमात्मीयं मंगलं वांछितं कृतमित्यर्थः ॥ १६ ॥

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः । तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशोः श्रीमन्न्यायविशारदस्य कृतिनामेषा कृतिः प्रीतये १७

गच्छ इति—गुणानां गणैर्ज्ञानादीनां समूहैः । स्वच्छे विमले । प्रौढिमधाम्नि सकलवृद्धिसद्मनि । श्रीविजयादिदेवसुगुरोः श्रीर्ज्ञानवैराग्यादिलक्ष्मीस्तयाऽन्वितो विजयो विजयशब्द आदिर्यस्य नाम्नः स एव देवनाम्ना सुगुरुः श्रीविजयदेवसूरिस्तस्य । गच्छे देवसूरीयतपोगणे । जीतविजयप्राज्ञास्तन्नामानः सूरयः । परामुत्कृष्टां । प्रौढिं वृद्धिं । ऐयरुर्लेभिरे । तत्सातीर्थ्यभृतां गुरुभ्रातृणां । नयादिविजयप्राज्ञोत्तमानां श्रीनयविजयपंडितप्रधानानां । शिशोः शिष्यस्य । श्रीमन्न्यायविशारदस्य पंडितानां मध्ये 'श्रीमन्न्यायविशारद' इत्येवंरूपां पदवीं प्राप्तस्य श्रीयशोविजयवाचकस्य । एषा पूर्वोक्ता कृतिः ग्रन्थकविता । कृतिनां पंडितानां प्रीतये प्रेम्णे भूयादिति ॥१७॥

स्वपरभावविलोकनदर्पणः शिवसुवर्त्मविशोधनदीपकः । परमशर्मनिवाससुधीवरो जयति सोऽस्य यशोविजयो विधिः ॥ १ ॥

इति श्री ज्ञानसारस्य विवरणम् ॥

# अथ विवरणकारप्रशस्तिः

वसन्ततिलका

यस्यानुसानु शतशोंऽशुविलासिनो द्राक् संजज्ञिरेऽन्तरतमोहृतये नवीनः ॥
पट्टाभिधोदयगिरिर्जयति त्रिलोक्याम् योगीन्द्रवन्द्यचरणस्य सुधर्मभानोः ॥ १ ॥

द्रुतविलम्बिते छन्दसी

तदनुगाः करुणारससागराः सकलशास्त्रमहोदधिपारगाः ।
सुगुरवस्त्वुदिताः प्रशमाश्रया विजयसिंहतपोगणमौलयः ॥ २ ॥
विनयशीलसुशीलनशीलताश्रुतविलासरता गतदूषणाः ।
तदनु सत्यमुखा विजयाभिधाः समभवन् भुवि भाग्यवशान्नृणाम् ॥ ३ ॥

आर्या छन्दः

योगाभ्यासे पूर्णाः कर्पूरादिमजयान्तनामानः ॥ क्षमाजिनोत्तमपद्मा विजयान्ताः संज्ञया जाताः ॥ ४ ॥

उपगीतिच्छन्दसी

रूपादिमकीर्त्यादिमविजयान्ता योगिभिर्वन्द्याः ॥ प्रादुरभूवन् भूत्या पट्टालङ्कारभूतास्ते ॥ ५ ॥
पूर्णानन्दे मग्ना मग्नाष्टकोक्तसुचारित्राः ॥ कस्तूरविजयसंज्ञा मणिविजयाश्चापि तत्तुल्याः ॥ ६ ॥

द्रुतविलम्बितानि

वरकृपारससिञ्चितभूतला विजितमोहशमामृतसागराः ॥
विजयसंयुतबुद्ध्यभिधानगाः सुगुरवो ह्यभवन्मुनिसंस्तुताः ॥ ७ ॥
मुनिगणेहितवत्सलधीधना अनयभीतिकुरङ्गमृगारयः ।
शमगभीरिमासिन्धुजयावहा गणिवरा विजयान्तिममुक्तिगाः ॥ ८ ॥
तदनुजाःस्थिरबुद्धिमहोमया मुदितशान्तकृपाशयसत्प्रभाः ।
स्वयशसा विमलीकृतदिङ्मुखाः समुदिता गुरुवृद्धिसुधांशवः ॥ ९ ॥

वसंततिलका

तत्पादसेवनवशाद्विमलैकचेता गंभीरमुख्यविजयस्तनुभृद्धिताय ।
स्वल्पेऽपि बुद्धिविभवे करवह्निसंख्येऽस्मिन्नष्टके विवरणं व्यदधात्सुबोधम् ॥ १० ॥

द्रुतविलम्बितम्—उदधिबाणनवेन्दुसुवत्सरे ( १९५४ ) शुचिगतेन्दुमहोदयपर्वणि ।
कृतमिदं क्षितिभूषणनाम्निभूजिनविभूषितभावपुरे वरे ॥ ११ ॥

आर्या—संशोधितेऽपि यत्नादस्मिन् बुद्धेर्भ्रमाद्धि दोषश्चेत् । संशोध्यो विद्वद्भिः परोपकारैकचेतोभिः ॥ १२ ॥

इति श्रीतपागच्छगतसंविग्नशाखीयमुनिश्रीबुद्धिविजयमुख्यशिष्यगणिमुक्तिविजयतत्सतीर्थ्यशिरोमणिमुनिश्रीवृद्धिविजयचरणारविन्दमकरन्दपर्युपासनाचञ्चरीकेण पण्डितगम्भीरविजयगणिना विरचितं ज्ञानसारविवरणम्.